VYAKARANAM

SASTRI I st YEAR

Paper - I

# VAYAKARASIDDANTAKOUMUDI

*( Panchasandiprakaranam, Sabdadikare halanthaprakaranam, Avyayaprakaranam )*

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

Tirupati - 517 507 (A.P.)

## विषयसूची

**विषयः** **पृष्ठसङ्ख्या**


| | |
|---|---|
| भूमिका | १ |
| सञ्ज्ञाप्रकरणम् | ३ |
| परिभाषाप्रकरणम् | २२ |
| अच्सन्धिप्रकरणम् | ३० |
| प्रकृतिभावप्रकरणम् | ५४ |
| हल्सन्धिप्रकरणम् | ६३ |
| विसर्गसन्धिप्रकरणम् | ९४ |
| स्वादिसन्धिप्रकरणम् | १०३ |
| शब्दाधिकारे हलन्तपकरणस्य सामान्यकथनपुरस्सरं युष्मद्-अस्मद्शब्दरूपसाधनप्रकारः | ११३ |
| ह-व-न-ज-कारान्तहलन्तशब्दानां संविज्ञानं साधनप्रकारश्च | १४४ |
| त-द-च-प-र-श-ष-स-कारान्तहलन्तशब्दानां संविज्ञानं साधनप्रकारश्च | १७५ |
| ------------------------- | २०५ |
| हलन्तसंख्यावाचकशब्दानां रूपसाधनप्रकारः (ससूत्रम्) | २३० |

# ।। वैयाकरणसिद्धान्तकौमुदी ।।
# भूमिका

व्याकरणशास्त्रस्य ज्ञानं सर्वेषाम् अपेक्षते। स्व-अभिप्रायं प्रकटयितुम्, अन्यैः सह वार्तालापं कर्तुं भाषा अपेक्षते। भाषायाः संस्कारः व्याकरणशास्त्रेण क्रियते। व्याकरणज्ञानं विना भाषाशुद्धिः न भवति। अत एव उक्तम्-

**यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत्।।** इति।

यद्यपि बहु न पठति चेत् अपि हे पुत्र व्याकरणं पठ। किमर्थमिति चेत्- स्वजनः इति उच्चारणावसरे श्वजनः इति उच्चारणं मास्तु। सकलम् इति कथनवेलायां शकलम् इति मा भवतु। एवमेव सकृत् इति स्थाने शकृत् इति मा भवतु। अतः व्याकरणं पठनीयम्। अन्यदपि व्याकरणस्य माहात्म्यमस्ति।

वेदार्थज्ञाने साहाय्यं कुर्वन्ति षडङ्गानि। तानि यथा -

**शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा।**
**कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः।।** इति।

शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, ज्यौतिषम्, कल्पः इति वेदस्य षड् अङ्गानि भवन्ति। षट्सु अङ्गेषु "मुखं व्याकरणं स्मृतम्" इति वचनात् वेदपुरुषस्य मुखं व्याकरणमस्ति इति ज्ञायते। एवं बहु प्रामुख्यमस्ति व्याकरणस्य।

तादृशव्याकरणशास्त्रं सम्पूर्णं सूत्रक्रमेण लिखितवान् महर्षिः पाणिनिः। तेषां वार्त्तिकानि लिखितवान् महर्षिः कात्यायनः। भाष्यं रचितवान् महर्षिः पतञ्जलिः। बहुकालपर्यन्तम् अध्ययने सूत्रक्रमानुसारिणी शैली आसीत्। कालक्रमेण प्रक्रियासौविध्यार्थं प्रक्रियाग्रन्थाः लिखिताः। तेषु ग्रन्थेषु भट्टोजिदीक्षितस्य "वैयाकरणसिद्धान्तकौमुदी" नामकग्रन्थः अत्यन्तं प्रसिद्धिं गतः।

भट्टोजिदीक्षितः दाक्षिणात्यः आन्ध्रदेशीयः इति विद्वांसः आमनन्ति। काशीवासिनः लक्ष्मीधरस्य पुत्रः। शेषकृष्ण-अप्पय्यदीक्षितयोः शिष्यः। अस्य अध्ययनं ग्रन्थप्रणयनादिकमपि काश्यामेव सञ्जातम्। अस्य वंशे सर्वे संस्कृतज्ञाः। तत्रापि विशेषतया वैयाकरणाः। भानुजिः तस्य ज्येष्ठपुत्रः। वीरेश्वरोऽपि अस्य पुत्रः। हरिदीक्षितः अस्य पौत्रः। कौण्डभट्टः अस्य भ्रातुष्पुत्रः। अस्य भट्टोजिदीक्षितस्य कालः १५७० - १६५० विक्रमाब्दिः। वैयाकरणसिद्धान्तकौमिदी, शब्दकौस्तुभः, वैयाकरणमतोन्मज्जनम् इति त्रयः ग्रन्थाः अनेन विरचिताः। प्रौढमनोरमानामकः कौमुद्याः व्याख्याग्रन्थः अनेनैव लिखितः। वेदान्ते धर्मशास्त्रेऽपि अनेन ग्रन्थाः लिखिताः। अस्य सर्वेषां ग्रन्थानामुपरि बहवो व्याख्याग्रन्थाः विरचिताः। कौमुद्याः व्याख्यानेषु तत्त्वबोधिनी

बालमनोरमा इत्यदीनि प्रसिद्धानि। सर्वेषाम् अष्टाध्यायीसूत्राणां समावेशनं तत्रापि सर्वेषां सूत्राणां प्रक्रियाक्रमेण निवेशनम् अस्याः कौमुद्याः वैशिष्ट्यम्। अत एव प्रक्रियामार्गे कौमुदी मूर्धनि वर्तते। अतः सम्प्रति समग्रे भारतवर्षे अस्य ग्रन्थस्य पठनपाठनरवः श्रूयते। अस्य ग्रन्थस्य विषये अभियुक्तिः श्रूयते-

**कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।**
**कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः।।** इति।

कौमुदी यदि कण्ठस्था भवति तर्हि भाष्ये परिश्रमः अनावश्यकः भवति। अर्थात् परिश्रमं विना सरलतया भाष्यम् अवगन्तुं शक्यते। कौमुदी कण्ठस्था न भवति चेदपि भाष्ये परिश्रमः व्यर्थ एव भवति। तदा भाष्ये परिश्रमः क्रियते चेदपि फलं न भवति इति अस्य अभिप्रायः। अनेन वाक्येन व्याकरणशास्त्रे कौमुद्याः स्थानं कीदृशम् इति ज्ञायते। वैयाकरणसिद्धान्तकौमुदीग्रन्थस्य प्राधान्येन विभागः चतुर्दशसु प्रकरणेषु कृतः।

(१) सञ्ज्ञाप्रकरणम्
(२) परिभाषाप्रकरणम्
(३) सन्धिप्रकरणम्
(४) सुबन्तप्रकरणम्
(५) अव्ययप्रकरणम्
(६) स्त्रीप्रत्ययप्रकरणम्
(७) कारकप्रकरणम्
(८) समासप्रकरणम्
(९) तद्धितप्रकरणम्
(१०) तिङन्तप्रकरणम्
(११) कृदन्तप्रकरणम्
(१२) वैदिकप्रकरणम्
(१३) स्वरप्रकरणम्
(१४) लिङ्गानुशासनप्रकरणम्

**प्रयोजनम् -**

वैयाकरणसिद्धान्तकौमुदी इति नाम्ना एव ज्ञायते- वैयाकरणानां ये सिद्धान्ताः सन्ति ते सर्वेऽपि कौमुदीवत् आह्लादकत्वेन अर्थात् अत्यन्तं सरलतया अस्मिन् ग्रन्थे सुप्रकाशिताः। अनायासेन सिद्धान्ताः ज्ञातुं शक्यन्ते- इति। साधुशब्दानां ज्ञानम् अत्र सरलतया सम्पूर्णतया च भवति। अतः भाषायां शुद्धिं प्राप्तुम् अस्या वैयाकरणसिद्धान्तकौमुद्याः अध्ययनम् अवश्यं कर्तव्यं भवति। अस्य अध्ययनेन व्याकरणस्य प्रौढग्रन्थान् अनायासेन अवगन्तुं शक्नुमः।

**मङ्गलाचरणम् -**

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।**
**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते।।**

इति अस्य ग्रन्थस्य मङ्गलाचरणं दीक्षितेन कृतम्। प्रत्येकं ग्रन्थस्य आदौ मध्ये अन्ते च मङ्गलं कर्तव्यं भवति। तेन ग्रन्थस्य निर्विघ्नतापूर्वकं परिसमाप्तिः यशश्च भवति। अध्येतॄणां वृद्धिः भवति। अतः आदौ मङ्गलाचरणं कृतम्।

**पदविभागः -** मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च वैयाकरणसिद्धान्तकौमुदी इयं विरच्यते- इति।

**अन्वयः -** मुनित्रयं नमस्कृत्य, च, तदुक्तीः परिभाव्य, इयं वैयाकरणसिद्धान्तकौमुदी विरच्यते-इति।

अर्थः - मुनित्रयं उ पाणिनिकात्यायनपतञ्जलीन् नमस्कृत्य, तेषाम् उक्तीः तदुक्तीः उ पाणिनिकात्यायनपतञ्जलीनाम् उक्तीः उ वचनानि, परिभाव्य उ सम्यगालोच्य इयं वैयाकरणसिद्धान्तकौमुदी विरच्यते। इयं वैयाकरणसिद्धान्तकौमुदी इति कथनेन तस्य दीक्षितस्य मनसि सम्पूर्णग्रन्थस्य स्वरूपं प्रागेव आसीत्। इदानीं ग्रन्थरूपेण लिख्यते इत्यर्थः।

# ।। प्रथमखण्डः सञ्ज्ञाप्रकरणम् ।।

## संरचना


१.० प्रस्तावना।

१.१ लक्षिताधिगमविशेषाः।

१.२ माहेश्वरसूत्राणि।

१.३.० वर्णाः।

१.४ अन्योन्याश्रयदोषः परिहारश्च।

१.५.० इत्सञ्ज्ञा।

१.६ रप्रत्याहारः।

१.७ प्रत्याहारसञ्ज्ञा प्रत्याहाराश्च।

१.८ ह्रस्वदीर्घप्लुतसञ्ज्ञाः।

१.९ उदात्तसञ्ज्ञा।

१.१० अनुदात्तसञ्ज्ञा।

१.११ स्वरितसञ्ज्ञा।

१.१२ अनुनासिकसञ्ज्ञा।

१.१३.० सावर्ण्यम्।

१.१४ सवर्णग्राहकसञ्ज्ञा।

१.१५ तपरसञ्ज्ञा।

१.१६ वृद्धिसञ्ज्ञा।

१.१७ गुणसञ्ज्ञा।

१.१८ धातुसञ्ज्ञा।

१.१९ निपातसञ्ज्ञा।

१.२० उपसर्गसञ्ज्ञा।

१.२१ गतिसञ्ज्ञा।

१.२२ विभाषासञ्ज्ञा।

१.२३ स्वरूपसञ्ज्ञासूत्रम्।

१.२४ तदन्तसञ्ज्ञा।

१.२५ अवसानसञ्ज्ञा।

१.२६ संहितासञ्ज्ञा।

१.२७ पदसञ्ज्ञा।

१.२८ संयोगसञ्ज्ञा।

१.२९ लघुसञ्ज्ञा।

१.३० गुरुसञ्ज्ञा।

## १.० प्रस्तावना -

पाणिनिकृतसूत्रेषु - सूत्रस्य अर्थवर्णनवेलायां सूत्रेषु अविद्यमानं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र। अर्थात् अन्यस्मात् सूत्रात् अपेक्षितं पदं स्वीकर्तव्यम् इत्यर्थः। पूर्वसूत्रात् स्वीकृतं चेत् अनुवृत्तिः इत्युच्यते। कदाचित् अग्रिमसूत्रादपि स्वीक्रियते। तस्य अपकर्षणमिति नाम।

## १.१ लक्षिताधिगमविशेषाः -

अस्य पाठस्य पठनेन भवताम्-

- माहेश्वरसूत्राणां परिचयः भवति, तेषां सङ्ख्या ज्ञायते, प्रयोजनं च ज्ञायते।
- सञ्ज्ञासूत्राणाम् अवबोधः भवति।
- सञ्ज्ञानाम् अवबोधः भवति।
- उदाहरणस्थलेषु तेषां परिचयः भवति।
- सञ्ज्ञाविषये विधीयमानानां कार्याणाम् अवगमनं भवति।

## १.२ माहेश्वरसूत्राणि -

पाणिनिः तपसा महेश्वरं सन्तोष्य ततः चतुर्दश सूत्राणि प्राप्तवान्। तानि सूत्राणि एव आश्रित्य स्वकीयसूत्राणि रचितवान्। महेश्वरात् आगतानि इति हेतोः माहेश्वराणि सूत्राणि इत्युच्यन्ते। तानि-

(१) अइउण् (२) ऋलृक् (३) एओङ् (४) ऐऔच् (५) हयवरट् (६) लण् (७) ञमङणनम् (८) झभञ् (९) घढधष् (१०) जबगडदश् (११) खफछठथचटतव् (१२) कपय् (१३) शषसर् (१४) हल् इति माहेश्वराणि सूत्राणि। अण् अक् इत्यादिसञ्ज्ञार्थानि एतानि सूत्राणि भवन्ति। अण् अक् इत्यादिसञ्ज्ञाः अग्रे अस्मिन्नेव प्रकरणे प्रतिपाद्यन्ते।

## १.३.० वर्णाः -

वाक्ये पदानि वर्तन्ते। पदे वर्णाः भवन्ति। वर्णस्य अक्षरम् इत्यपि नाम अस्ति।

### १.३.१ वर्णाः द्विविधाः -

स्वरः, व्यञ्जनम् इति वर्णाः द्विविधाः भवन्ति। तत्र स्वातन्त्र्येण उच्चारयितुं योग्यः स्वरः भवति। स्वान्त्र्येण उच्चारयितुम् अयोग्यं व्यञ्जनं भवति। अतः स्वरवर्णानां साहाय्येनैव व्यञ्जनवर्णानाम् उच्चारणं क्रियते। यथा - क का कि की इत्यादिस्थलेषु क् **+** अ = क, क् **+** आ = का, क् **+** इ = कि, क् **+** इ = की इति स्वरवर्णानां साहाय्येनैव व्यञ्जनवर्णानाम् उच्चारणं भवति।

### १.३.२ व्यञ्जनवर्णाः पुनः द्विविधाः -

वर्गीयव्यञ्जनानि, अवर्गीयव्यञ्जनानि इति। वर्गीयव्यञ्जनानि पञ्चवर्गेषु अन्तर्भवन्ति। क ख ग घ ङ = कवर्गः। च छ ज झ ञ = चवर्गः। ट ठ ड ढ ण = टवर्गः। त थ द ध न = तवर्गः। प फ ब भ म = पवर्गः। इति। अवर्गीयव्यञ्जनानि वर्गेषु नान्तर्भवन्ति। य र ल व श ष स ह- इति।

## १.४ अन्योन्याश्रयदोषः परिहारश्च -

चतुर्दशसूत्रेषु विद्यमानानाम् अन्तिमवर्णानाम् 'इत्' इति सञ्ज्ञा भवति। हयवरट् इति पञ्चमं सूत्रमारभ्य हकारादिषु विद्यामानः अकारः उच्चारणार्थः। परं लण् इति षष्ठे सूत्रे लकारोत्तरविद्यमानस्य अकारस्यापि 'इत्' इति सञ्ज्ञा भवति। तर्हि इत् इति सञ्ज्ञा कथं सिध्यति, केन सूत्रेण भवति इति ज्ञास्यामः।

माहेश्वरसूत्रेषु अन्ते विद्यमानानां ण, क् ङ् इत्यादिवर्णानाम् इत्सञ्ज्ञा भवति इति उक्तम्। सा इत्सञ्ज्ञा **हलन्त्यम् (१-३-३)** इति सूत्रेण वक्तव्या। अस्मिन् सूत्रे हल्, अन्त्यम् इति पदद्वयम् अस्ति। अत्र अन्त्यम् इति पदस्य अन्ते भवम् इत्यर्थः ज्ञायते। परं हल् इति पदस्य अर्थः न ज्ञायते। हल् इति पदस्य ज्ञानार्थम् **आदिरन्त्येन सहेता (१-१-७१)** इति सूत्रस्य अर्थावगमनमपेक्षते। अस्मिन् सूत्रे आदिः, अन्त्येन, सह, इता- इति पदचतुष्टयम् अस्ति। अत्र आदिः, अन्त्येन, सह- इति पदत्रयस्य ज्ञानमस्ति। परम् 'इता' इति पदस्य अर्थः न ज्ञायते। इता इति पदस्य ज्ञानार्थं **हलन्त्यम् (१-३-३)** इति सूत्रस्य अर्थावगमनमपेक्षते। एवं **हलन्त्यम् (१.३.३)** इति सूत्रस्य हल् - इति पदस्य ज्ञानार्थम् **आदिरन्त्येन सहेता (१-१-७१)** इति सूत्रस्य आवश्यकता, तथा **आदिरन्त्येन सहेता (१-१-७१)** इति सूत्रस्य इता- इति पदस्य ज्ञानार्थं **हलन्त्यम् (१-३-३)** इति सूत्रस्य आवश्यकता भवति। इत्येवं **हलन्त्यम् (१-३-३), आदिरन्त्येन सहेता (१-१-७१)** इत्यनयोः सूत्रयोः परस्परसापेक्षत्वात् उभयोः सूत्रयोः अर्थः न भवति। अतः अन्योन्याश्रयः इति कश्चन दोषः भवति- इति आक्षेपः।

**तस्य परिहारः एवमस्ति -**

(१) **हलन्त्यम् (१-३-३)** सूत्रार्थः - 'हल्' (मा.सू.-१४) इति माहेश्वरसूत्रेषु अन्तिमं सूत्रं यदस्ति तस्य अन्ते विद्यमानस्य ल्-इत्यस्य इत्सञ्ज्ञा भवति- इति।

इति प्रथमं हल्-इति माहेश्वरसूत्रस्थलकारस्य इत्सञ्ज्ञा सम्पाद्यते। ततः परम्-

(२) **आदिरन्त्येन सहेता (१-१-७१)** सूत्रार्थः - अन्त्येन इत्सञ्ज्ञकवर्णेन सह उच्चार्यणाणः आदिवर्णः मध्ये विद्यमानानां वर्णानां तथा स्वस्यापि सञ्ज्ञा भवति- इति।

इदानीं हल्- इति माहेश्वरसूत्रेषु अन्तिमसूत्रस्थल्वर्णेन सह उच्चार्यमाणः आदिवर्णः = हयवरट्सूत्रस्थ-ह इति वर्णः मध्यगानां य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स ह - इति वर्णानां तथा स्वस्य = हकारस्यापि सञ्ज्ञा भवति। इति हल्सञ्ज्ञा सिद्ध्यति। ततः पुनः- **हलन्त्यम् (१-३-३)** इति सूत्रं व्याख्याति।

इदानीं हल्पदस्य ज्ञानमस्ति। सूत्रार्थः - उपदेशे अन्ते विद्यमानस्य हल्वर्णस्य 'इत्'सञ्ज्ञा भवति- इति। इदानीं माहेश्वरसूत्राणामन्ते विद्यमानानां ण् क् ङ् इत्यादिवर्णानाम् इत्सञ्ज्ञा पूर्वोक्तरीत्या सिद्ध्यति। अन्योन्याश्रयदोषः इति आक्षेपः निरस्तो भवति।

उपदेशः इत्युक्ते आद्योच्चारणम् = पाणिनिकात्यायनपतञ्जलिभिः प्राग् उच्चारितम् इति अर्थः।

**(३) उपदेशेऽजनुनासिक इत् (१-३-२)** सूत्रार्थः - उपदेशे विद्यमानः अनुनासिकः अच् = स्वरवर्णः इत्सञ्ज्ञां प्राप्नोति- इति। नासिकायाः साहाय्येन येषां वर्णानाम् उच्चरणं क्रियते ते आनुनासिक्याः। प्रतिज्ञायते = अभ्युपगम्यते इति प्रतिज्ञा। प्रतिज्ञा आनुनासिक्यं येषां ते प्रतिज्ञानुनासिक्याः = पाणिनीयाः। गुरुपरम्परया अनुनासिकानाम् अच्-वर्णानां ज्ञानं प्राप्नुवन्ति वैयाकरणाः इत्यर्थः।

**स्वावलोकनप्रश्नाः -**

(१) माहेश्वरसूत्राणि कति ?

(२) हलन्त्यम् (१-३-३), आदिरन्त्येन सहेता (१-१-७१) इत्यनयोः सूत्रयोः अन्योन्याश्रयदोषः अस्ति उत नास्ति।

(३) हलन्त्यम् (१-३-३) इति प्रथमसूत्रस्य अर्थः कः ?

(४) केषाम् आद्योच्चारणम् उपदेशत्वेन गृह्यते ?

## १.५.० इत्सञ्ज्ञा -

### १.५.१ अज्वर्णानाम् इत्सञ्ज्ञा

**उपदेशेऽजनुनासिक इत् (१-३-२)** सूत्रार्थः - उपदेशे विद्यमानः अनुनासिकः अच् उ स्वरवर्णः इत्सञ्ज्ञां प्राप्नोति- इति। अनेन सूत्रेण अज्वर्णानाम् इत्सञ्ज्ञा भवति।

### १.५.२ हल्वर्णानाम् इत्सञ्ज्ञा -

**हलन्त्यम् (१-३-३)** सूत्रार्थः - उपदेशे अन्ते विद्यमानस्य हल्वर्णस्य 'इत्'सञ्ज्ञा भवति- इति। अनेन सूत्रेण हल्वर्णानाम् इत्सञ्ज्ञा भवति।

## १.६ रप्रत्याहारः -

लण्- इति माहेश्वरसूत्रस्य लकारोत्तर-अकारः अनुनासिकः। अतः तस्य **उपदेशेऽजनुनासिक इत् (१-३-२)** इति सूत्रेण इत्सञ्ज्ञा भवति। तेन अवर्णेन सह हयवरट्सूत्रस्थरेफस्य उच्चारणेन 'र' इति प्रत्याहारः सिद्ध्यति। सः र्अअउर इति। सः रेफः र,ल इत्यनयोः वर्णयोः सञ्ज्ञा भवति। अन्त्येन इता सह उ अवर्णेन सह उच्चार्यमाणः रेफः मध्ये विद्यमानस्य ल्वर्णस्य तथा स्वस्य उ रेफस्य च सञ्ज्ञा भवति। अर्थात् र्ल् इत्यनयोः सञ्ज्ञा भवति।

प्रत्याहारेषु इतां उ इत्सञ्ज्ञकवर्णानां ग्रहणं न भवति। उदाहरणम्- अच् इति प्रत्याहारः। (१) अइउण् (२) ऋलृक् (३) एओङ् (४) ऐऔच्- इत्यत्र अकारमारभ्य च्-पर्यन्तम्। अत्र मध्ये ण्क्ङ् इति इत्सञ्ज्ञकवर्णाः त्रयः सन्ति। तेषां प्रत्याहारेषु ग्रहणं न भवति।

**स्वावलोकनप्रश्नाः -**

(१) हल्वर्णानाम् इत्सञ्ज्ञाविधायकं सूत्रं किम् ?

(२) अच्-वर्णानाम् इत्सञ्ज्ञाविधायकं सूत्रं किम् ?

(३) रप्रत्याहारे कौ वर्णौ भवतः ?

(४) लण्सूत्रस्थ-अकारस्य केन सूत्रेण इत्सञ्ज्ञा भवति ?

## १.७ प्रत्याहारसञ्ज्ञा प्रत्याहाराश्च -

प्रत्याहारः इत्युक्ते- प्रत्याह्रियन्ते सङ्क्षिप्यन्ते वर्णाः अत्र इति प्रत्याहारः। **आदिरन्त्येन सहेता (१-१-७१)** इति सूत्रेण कृताः सञ्ज्ञाः प्रत्याहारशब्देन व्यवह्रियन्ते- अर्थात् **आदिरन्त्येन सहेता (१-१-७१)** इति सूत्रेण प्रत्याहारसञ्ज्ञा भवति। अइउऋलृएओऐऔ इत्येते वर्णाः अच् इत्यत्र प्रत्याह्रियन्ते = सङ्क्षिप्यन्ते। तेन अच् इति कथनेन अइउऋलृएओऐऔ इत्येतेषां वर्णानां ग्रहणं भवति। प्रयोजने सत्येव प्रात्याहारः क्रियते। माहेश्वरसूत्राणि आश्रित्य चतुश्चत्वारिंशत् प्रत्याहाराः भवन्ति। अन्ये प्रयोजनाभावात् न भवन्ति। अग्रे प्रत्याहाराणां कथनेन के के वर्णाः अन्तर्भवन्ति इति झटिति ज्ञातुं प्रत्याहाराः, तेषु विद्यमानाः वर्णाः अत्र दीयन्ते-

**प्रत्याहाराः तेषु विद्यमानाः वर्णाः -**

**पूर्वेण णकारेण एकः प्रत्याहारः -**

(१) अण् = अ इ उ

**ककारेण त्रयः प्रत्याहाराः -**

(२) अक् = अ इ उ ऋ लृ

(३) इक् = इ उ ऋ लृ

(४) उक् = उ ऋ लृ

**ङकारेण एक प्रत्याहारः -**

(५) एङ् = ए ओ

**चकारेण चत्वारः प्रत्याहाराः -**

(६) अच् = अ इ उ ऋ लृ ए ओ ऐ औ = अत्र सर्वे स्वरवर्णाः अन्तर्भवन्ति

(७) इच् = इ उ ऋ लृ ए ओ ऐ औ

(८) एच् = ए ओ ऐ औ

(९) ऐच् = ऐ औ

**टकारेण एकः प्रत्याहारः -**

(१०) अट् = अ इ उ ऋ ऌ ए ओ ऐ औ ह य व र

**परेण णकारेण त्रयः प्रत्याहाराः -**

(११) अण् = अ इ उ ऋ ऌ ए ओ ऐ औ ह य व र ल

(१२) इण् = इ उ ऋ ऌ ए ओ ऐ औ ह य व र ल

(१३) यण् = य व र ल

**मकारेण चत्वारः प्रत्याहाराः -**

(१४) अम् = अ इ उ ऋ ऌ ए ओ ऐ औ ह य व र ल ञ म ङ ण न

(१५) यम् = य व र ल ञ म ङ ण न

(१६) ञम् = ञ म ङ ण न = अत्र वर्गपञ्चमवर्णाः अन्तर्भवन्ति

(१७) ङम् = ङ ण न

**ञकारेण एकः प्रत्याहारः -**

(१८) यञ् = य व र ल ञ म ङ ण न झ भ

**षकारेण द्वौ प्रत्याहारौ**

(१९) झष् = झ भ घ ढ ध = अत्र वर्गचतुर्थवर्णाः अन्तर्भवन्ति।

(२०) भष् = भ घ ढ ध

**शकारेण षट् प्रत्याहाराः -**

(२१) अश् = अ इ उ ऋ ऌ ए ओ ऐ औ ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द

(२२) हश् = ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द

(२३) वश् = व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द

(२४) झश् = झ भ घ ढ ध ज ब ग ड द = अत्र वर्गतृतीयचतुर्थवर्णाः अन्तर्भवन्ति।

(२५) जश् = ज ब ग ड द = अत्र वर्गतृतीयवर्णाः अन्तर्भवन्ति।

(२६) बश् = ब ग ड द

**वकारेण एकः प्रत्याहारः -**

(२७) छव् = छ ठ थ च ट त

**यकारेण पञ्च प्रत्याहाराः -**

(२८) यय् = य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प

(२९) मय् = म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प

(३०) झय् = झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प = अत्र

वर्गप्रथमद्वितीयतृतीयचतुर्थवर्णाः अन्तर्भवन्ति।

(३१) खय् = ख फ छ ठ थ च ट त क प = अत्र वर्गप्रथमद्वितीयवर्णाः अन्तर्भवन्ति।

(३२) चय् = च ट त क प = अत्र वर्गप्रथमवर्णाः अन्तर्भवन्ति।

**रेफेण पञ्च प्रत्याहाराः -**

(३३) यर् = य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स

(३४) झर् = झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स

(३५) खर् = ख फ छ ठ थ च ट त क प श ष स

(३६) चर् = च ट त क प श ष स

(३७) शर् = श ष स

**लकारेण षट् प्रत्याहाराः -**

(३८) अल् = अ इ उ ऋ लृ ए ओ ऐ औ ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स ह = अत्र सर्वे वर्णाः अन्तर्भवन्ति।

(३९) हल् = ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स ह = अत्र सर्वे व्यञ्जनवर्णाः अन्तर्भवन्ति।

(४०) वल् = व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स ह

(४१) रल् = र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स ह

(४२) झल् = झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स ह

(४३) शल् = श ष स ह

**अकारेण एकः प्रत्याहारः -**

(४४) र = र् ल्

अनेन कोष्टकेन अग्रे प्रत्याहारकथनेन के वर्णाः सन्ति इति झटिति ज्ञातुं शक्यते। तथा कुत्रचित् सर्वे स्वरवर्णाः, सर्वे व्यञ्जनवर्णाः, वर्गस्य प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चममर्णाः अपि झटिति ज्ञातुं शक्यन्ते।

**स्वावलोकनप्रश्नौ -**

(१) प्रत्याहारसञ्ज्ञाविधायकं सूत्रं किम् ?

(२) कति प्रत्याहाराः सन्ति ?

## १.८ ह्रस्वदीर्घप्लुतसञ्ज्ञाः -

(४) **ऊकालोऽज्झ्रस्वदीर्घप्लुतः (१-२-२७)** सूत्रार्थः - उकालसदृश-उच्चारणकालः यस्य वर्णस्य सः ह्रस्वसञ्ज्ञः भवति, ऊकालसदृश-उच्चारणकालः यस्य वर्णस्य सः दीर्घसञ्ज्ञः भवति, उ३कालसदृश-उच्चारणकालः यस्य वर्णस्य सः प्लुतसञ्ज्ञः भवति- इति। ह्रस्वस्य एकमात्राकालः भवति। दीर्घस्य द्विमात्राकालः भवति। प्लुतस्य त्रिमात्राकालः भवति। सः ह्रस्वः दीर्घः प्लुतः अपि पुनः भेदं प्राप्नोति।

## १.९ उदात्तसञ्ज्ञा -

(५) **उच्चैरुदात्तः (१-२-२९)** सूत्रार्थः - ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नः अच् उदात्तसञ्ज्ञः स्यात्- इति। उदाहरणम्- आ ये।

## १.१० अनुदात्तसञ्ज्ञा -

(६) **नीचैरनुदात्तः (१-२-३०)** सूत्रार्थः - ताल्वादिषु सभागेषु स्थानेषु अधोभागे निष्पन्नः अच् अनुदात्तसञ्ज्ञः स्यात्- इति। उदाहरणम्- अर्वाङ्।

## १.११ स्वरितसञ्ज्ञा -

(७) **समाहारः स्वरितः (१-२-३१)** सूत्रार्थः - उदात्तः अनुदात्तश्च यस्मिन् वर्णे समानतया भवतः स अच् स्वरितसञ्ज्ञः स्यात्- इति।

(८) **तस्यादित उदात्तमर्धह्रस्वम् (१-२-३२)** सूत्रार्थः - स्वरितस्य आदितः अर्धमुदात्तं बोध्यम्। उत्तरार्धं तु परिशेषात् अनुदात्तं भवति। उदाहरणानि - 'क्व(स्व)१(अ) वोऽश्वाः'। 'रथा(स्व)नां(अ) न ये२(स्व)(अ)राः'। 'श(अ)तच(स्व)क्रं(अ) यो(अ)(स्व)३ ह्यः'। 'अ(अ)ग्निमी(स्व)ळे'। पुनः तेषाम् = ह्रस्वदीर्घप्लुतानाम् उदात्त-अनुदात्त-स्वरितानां भेदं पुनः द्विधा प्रदर्शयति।

## १.१२ अनुनासिकसञ्ज्ञा -

(९) **मुखनासिकावचनोऽनुनासिकः (१-१-८)** सूत्रार्थः - मुखसहितया नासिकया उच्चार्यमाणो वर्णः अनुनासिकसञ्ज्ञः स्यात्। अनुनासिकस्य सानुनासिकः इत्यपि उच्यते। तदित्थम् - अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादशभेदाः। लृवर्णस्य द्वादश, तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्।

अत्र सुबोधाय अकारादिवर्णानां कोष्टकः दीयते - कोष्टके सा.ना. = सानुनासिकः, नि.ना. = निरनुनासिकः इति अवगन्तव्यम्।


अइउऋ
ह्रस्वः
दीर्घः
प्लुतः
उदात्तः
अनुदात्तः
स्वरितः
सा.ना.
नि.ना.
ऌ
एओऐऔ

**स्वावलोकनप्रश्नाः -**

(१) ह्रस्वदीर्घप्लुतसञ्ज्ञाविधायकं सूत्रं किम् ?

(२) उदात्तसञ्ज्ञाविधायकं सूत्रं किम् ?

(३) अनुदात्तसञ्ज्ञाविधायकं सूत्रं किम् ?

(४) स्वरितसञ्ज्ञाविधायकं सूत्रं किम् ?

(५) अनुनासिकसञ्ज्ञाविधायकं सूत्रं किम् ?

(६) अइउऋवर्णानां कति भेदाः भवन्ति ?

(७) लृवर्णस्य कति भेदाः भवन्ति, किमर्थम् ?

(८) एच्-वर्णानां कति भेदाः भवन्ति, किमर्थम् ?

## १.१३.० सावर्ण्यम् -

द्वयोः वर्णयोः कथं सावर्ण्यं भवति, सावर्ण्यार्थं किमपेक्षते, सावर्ण्यं कुत्र न भवति इत्यादिकमिदानीं विचार्यते।

### १.१३.१ सवर्णसञ्ज्ञासूत्रम् -

(१०) **तुल्यास्यप्रयत्नं सवर्णम् (१-१-९)** सूत्रार्थः - ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च इति द्वयं ययोः वर्णयोः समानं तयोः मिथः सवर्णसञ्ज्ञं भवति- इति। इदानीं वर्णानाम् उत्पत्तिस्थानानि उच्यन्ते-

**बोधप्रश्नः-**

(१) अकारस्य कवर्गस्य हकारस्य च परस्परम् उत्पत्तिस्थानं समानं भवितुमर्हति वा ?

**समाधानम् -**

अकुहविसर्जनीयानां कण्ठः उत्पत्तिस्थानम्। अतः अकारस्य कवर्गस्य हकारस्य विसर्गस्यापि परस्परम् उत्पत्तिस्थानं समानं भवति।

**बोधप्रश्नः -**

(१) इकारस्य चवर्गस्य यकारस्य शकारस्य च परस्परमुत्पत्तिस्थानं समानं भवितुमर्हति वा ?

**समाधानम् -**

इचुयशानां तालु उत्पत्तिस्थानम्। अतः इकारस्य चवर्गस्य यकारस्य शकारस्यापि परस्परम् उत्पत्तिस्थानं समानं भवति।

**बोधप्रश्नः -**

(१) ऋकारस्य टवर्गस्य रेफस्य षकारस्य च परस्परमुत्पत्तिस्थानं समानं भवितुमर्हति वा ?

**समाधानम् -**

ऋटुरषाणां मूर्धा उत्पत्तिस्थानम्। अतः ऋकारस्य टवर्गस्य रेफस्य षकारस्यापि परस्परम् उत्पत्तिस्थानं समानं भवति।

**बोधप्रश्नः -**

(१) लृकारस्य तवर्गस्य लकारस्य सकारस्य च परस्परमुत्पत्तिस्थानं समानं भवितुमर्हति वा ?

**समाधानम् -**

लृतुलसानां दन्तः उत्पत्तिस्थानम्। अतः लृकारस्य तवर्गस्य लकारस्य सकारस्य च परस्परम् उत्पत्तिस्थानं समानं भवति।

**बोधप्रश्नः -**

(१) उकारस्य पवर्गस्य च परस्परम् उत्पत्तिस्थानं किं भवितुमर्हति ?

**समाधानम् -**

उपूपध्मानीयानामोष्ठौ उत्पत्तिस्थानम्। अतः उकारस्य पवर्गस्य उपध्मानीयस्य च परस्परम् उत्पत्तिस्थानं समानं भवति।

**बोधप्रश्नः -**

(१) ञमङणन- इत्येतेषां वर्णानां परस्परम् उत्पत्तिस्थानं समानं भवितुमर्हति वा ?

**समाधानम् -**

ञमङणनानां नासिका तथा तेषां स्ववर्गाणां कण्ठादिकमपि उत्पत्तिस्थानम्। अतः ञमङणन- इत्येतेषां वर्णानां परस्परम् उत्पत्तिस्थानं समानं भवति।

एवमेव एकार-ऐकारयोः कण्ठतालु उत्पत्तिस्थानम् । ओकार-औकारयोः कण्ठोष्ठम् उत्पत्तिस्थानम्। वकारस्य उत्पत्तिस्थानं दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम् उत्पत्तिस्थानम्। अनुस्वारस्य नासिका उत्पत्तिस्थानम्। इति उत्पत्तिस्थानानि।

### १.१३.२ यत्नः -

यत्नः द्विधा भवति - आभ्यन्तरः बाह्यश्च।

### १.१३.३ आभ्यन्तरप्रयत्नः -

आभ्यन्तरप्रयत्नः चतुर्धा भवति - स्पृष्ट-ईषत्स्पृष्ट-विवृत-संवृत-भेदात्। तत्र स्पृष्टप्रयत्नः स्पर्शवर्णानाम्। ईषत्स्पृष्टप्रयत्नः अन्तःस्थवर्णानाम्। विवृतप्रयत्नः ऊष्मवर्णानां स्वराणां च। ह्रस्वस्य अवर्णस्य प्रयोगे संवृतं प्रयत्नः। प्रक्रियादशायां तु विवृतप्रयत्नः एव। एतच्च सूत्रकारेण ज्ञापितम्। तथा हि -

**(११) अ अ** (८-४-६८) इति अष्टाध्याय्याः अन्तिमं सूत्रम्। अकारस्य विवृतत्वमनूद्य संवृतोऽनेन विधीयते सूत्रकारेण। अतः ह्रस्व-अवर्णस्य प्रक्रियादशायां विवृतमेव इति ज्ञायते। अथापि अस्य सूत्रस्य सम्पूर्णाष्टाध्यायीं प्रति असिद्धत्वात् शास्त्रदृष्ट्या विवृतत्वमस्त्येव। अस्य सूत्रस्य अष्टाध्यायीं प्रति असिद्धत्वविषये प्रमाणं प्रदर्शयति प्रकरणवशात्-

**(१२) पूर्वत्रासिद्धम्** (८-२-१) अधिकारोऽयम्। अष्टमाध्यायस्य प्रथमः पादः अ सप्त-अध्यायाः उ सपादसप्ताध्यायी। तथा च अग्रे त्रयः एव पादाः अवशिष्टाः। तेषां त्रिपादी इति व्यवहारः। अनेन सूत्रेण सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा भवति। अस्य सूत्रस्य अधिकारत्वाङ्गीकारात् त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रं उ परं सूत्रम् असिद्धं भवति। अतः अवर्णस्य प्रक्रियादशायां विवृतप्रयत्नः एव भवति। इदानीं पुनः प्रयत्नविषये कथयति।

### १.१३.४ बाह्यप्रयत्नः -

बाह्यप्रयत्नस्त्वेकादशधा भवति - विवारः संवारः श्वासः नादः घोषः अघोषः अल्पप्राणः महाप्राणः उदात्तः अनुदात्तः स्वरितः इति। एतेषाम् एकादशप्रयत्नानां विषये विवरणात्मकौ इमौ श्लोकौ-

**खयां यमाः खयः ꣵक ꣶपौ विसर्गः शर एव च।**
**एते श्वसानुप्रदाना अघोषाश्च विवृण्वते।।**
**कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः।**
**अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः।।**

वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः। पलिक्क्नीः। चख्ख्नतुः। अग्ग्निः। घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः। तत्र वर्गाणां प्रथमद्वितीयाः उ खयस्तथा तेषामेव यमाः, जिह्वामूलीयोपध्मानीयौ, विसर्गः, शषसाश्चेत्येतेषां विवारः श्वासोऽघोषश्च। अन्येषां तु संवारो नादो घोषश्च। वर्गाणां प्रथमतृतीयपञ्चमाः, प्रथमतृतीययमौ, यरलवाश्चाल्पप्राणाः। अन्ये महाप्राणा इत्यर्थः। बाह्यप्रयत्नाश्च यद्यपि सवर्णसञ्ज्ञायामनुपयुक्तास्तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्त इति बोध्यम्।

कादयो मावसानाः उ कचटतपवर्गाः स्पर्शाः। यरलवा अन्तःस्थाः। शषसहा ऊष्माणः। अचः स्वराः। ꣵकꣶपाविति इति कपाभ्यां प्रागर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ। अं अः इत्यचः परावनुस्वारविसर्गौ। इति स्थानप्रयत्नविवेकः।

इदानीं वर्णानाम् उत्पत्तिस्थानानि तद्वारा तेषां नामानि आभ्यन्तरप्रयत्नः बाह्यप्रयत्नश्च इत्थं कोष्टके प्रदर्शयितुं शक्यते -

| **वर्णाः** | **उत्पत्तिस्थानानि** | **वर्णानां स्थानजन्यनामानि** |
|---|---|---|
| अ क ख ग घ ङ ह विसर्गः (:) | कण्ठः | कण्ठ्यः |
| इ च छ ज झ ञ य श | तालु | तालव्यः |
| ऋ ट ठ ड ढ ण र ष | मूर्धा | मूर्धन्यः |
| लृ त थ द ध न ल स | दन्ताः | दन्त्यः |
| उ प फ ब भ म उपध्मानीयः (≍प≍ फ) | ओष्ठौ | ओष्ठ्यः |
| ञ म ङ ण न | नासिका+कण्ठादिः | अनुनासिकः |
| ए ऐ | कण्ठतालु | कण्ठतालव्यः |
| ओ औ | कण्ठोष्ठम् | कण्ठोष्ठ्यः |
| व | दन्तोष्ठम् | दन्तोष्ठ्यः |
| जिह्वामूलीयः (≍ क ≍ ख) | जिह्वामूलम् | जिह्वामूलीयम् |
| अनुस्वारः | नासिका | ---------- |

| **आभ्यन्तरप्रयत्नाः** | **वर्णाः** | **वर्णानां नामानि** |
|---|---|---|
| स्पृष्टः | कचटतपवर्गाः | स्पर्शाः |
| ईषत्स्पृष्टः | य र ल व | अन्तःस्थाः |
| विवृतः | स्वराः, श ष स ह | स्वराः = अचः, ऊष्माणः |
| संवृतः (प्रयोगे एव) | अ | ----------- |

बाह्यप्रयत्नेषु उदात्तानुदात्तस्वरिताः स्वराणामेव भवन्ति। ते प्राग् निरूपिताः। अन्ये इदानीं प्रदर्श्यन्ते।

| **बाह्यप्रयत्नाः** | **वर्णाः** |
|---|---|
| विवारः, श्वासः, अघोषः | वर्गस्य प्रथमद्वितीयवर्णाः, शषसवर्णाः = खर्-वर्णाः |
| संवारः, नादः, घोषः | वर्गस्य तृतीयचतुर्थपञ्चमवर्णाः, हयवरलवर्णाः = हश्-वर्णाः |
| अल्पप्राणः | वर्गस्य प्रथमतृतीयपञ्चमवर्णाः, यवरलवर्णाः (अन्तस्स्थाः) |
| महाप्राणः | वर्गस्य द्वितीयचतुर्थवर्णाः, शषसवर्णाः (उष्माणः) |

एवं क्रमेण प्रत्येकं व्यञ्जनवर्णस्य चत्वारः बाह्यप्रयत्नाः भवन्ति। तदित्थम्-

| **वर्णः** | **बाह्यप्रयत्नाः** |
|---|---|
| वर्गस्य प्रथमवर्णः (कचटतप) | (१) विवारः (२) श्वासः (३) अघोषः (४) अल्पप्राणः |
| वर्गस्य द्वितीयवर्णः (खछठथफ) | (१) विवारः (२) श्वासः (३) अघोषः (४) महाप्राणः |
| वर्गस्य तृतीयवर्णः (जबगडद) | (१) संवारः (२) नादः (३) घोषः (४) अल्पप्राणः |
| वर्गस्य चतुर्थवर्णः (झभघढध) | (१) संवारः (२) नादः (३) घोषः (४) महाप्राणः |

| | |
|---|---|
| वर्गस्य पञ्चमवर्णः (ञमङणन) | (१) संवारः (२) नादः (३) घोषः (४) अल्पप्राणः |
| यवरल | (१) संवारः (२) नादः (३) घोषः (४) अल्पप्राणः |
| शषस | (१) विवारः (२) श्वासः (३) अघोषः (४) महाप्राणः |
| ह | (१) संवारः (२) नादः (३) घोषः (४) महाप्राणः |

**१.१३.५. सवर्णसञ्ज्ञावार्त्तिकम् -**

ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् (वा) वार्त्तिकार्थः - ऋलृवर्णयोः सावर्ण्यं वक्तव्यम् - इति। ऋलृवर्णयोः स्थानप्रयत्नसाम्यात् सावर्ण्यं न प्राप्तमासीत्। अतः अनेन वार्त्तिकेन सावर्ण्यमुक्तम्। एवं प्रकारेण सवर्णसञ्ज्ञाविवेकः, तथा तस्याः आवश्यकत्वेन स्थानप्रयत्नविवेकः सम्पन्नः।

**स्वावलोकनप्रश्नाः -**

(१) सवर्णसञ्ज्ञाविधायकं सूत्रं किम् ?

(२) आभ्यन्तरप्रयत्नाः कति ?

(३) बाह्यप्रयत्नाः कति ?

(४) प्रक्रियादशायाम् अकारस्य कः आभ्यन्तरप्रयत्नः ?

(५) षड्विधेषु सूत्रेषु पूर्वत्रासिद्धम्। (८-२-१) इति सूत्रं कुत्र अन्तर्भवति ?

**१.१३.६ सावर्ण्यनिषेधः -**

तुल्यास्यप्रयत्नं सवर्णम् (१-१-९) इति सूत्रोक्तप्रकारेण अकारहकारयोः, इकारशकारयोः, ऋकारषकारयोः लृकारसकारयोश्च मिथः सावर्ण्यं प्राप्तमस्ति। अतः तस्य निषेधार्थं सूत्रमारब्धम् -

**(१३) नाऽऽज्झलौ (१-१-१०)** सूत्रार्थः - आकारसहितः अच् उ आच्, आच् च हल् च इत्येतौ मिथः सवर्णौ न भवतः- इति। अनेन सूत्रेण सावर्ण्यनिषेधात् हकार-शकार-षकार-सकाराणाम् अच्त्वाभावात् दधिअहरति, दधिअशीतलम्, दधिअषष्ठम्, दधिअसान्द्रम् इत्यादिषु परेषु **इको यणचि (६-१-७७)** इत्यादिभिः सूत्रैः अच्त्वनिमित्तकं यणादिकं न भवति। एवं निषेधाभावे अकारादिभिः दीर्घादीनामिव हकारादीनामपि ग्रहणकशास्त्रबलात् अच्त्वं स्यात्।

प्रकरणवशात् ग्रहणकशास्त्रं प्रस्तुतम् -

## १.१४ सवर्णग्राहकसञ्ज्ञा -

**(१४) अणुदित्सवर्णस्य चाप्रत्ययः (१-१-६९)** सूत्रार्थः - प्रतीयते विधीयत इति प्रत्ययः। अविधीयमानः अण् उदित् च सवर्णस्य सञ्ज्ञा स्यात्- इति। अर्थात् विधीयमानः अण्

सवर्णस्य सञ्ज्ञा न भवति = अन्यान् प्रभेदान् न गृह्णाति इत्यर्थः। अत्राण् इत्युक्ते अईउऋलृएओऐऔ वर्णाः ग्राह्याः। सूत्रे उदित् इत्युक्ते - कु चु टु तु पु इत्येते। एवं ग्रहणकशास्त्रबलात् - अ इत्युक्ते ह्रस्वादीनाम् अष्टादशानां सञ्ज्ञा = ग्रहणं भवति। तथा इकारस्य उकारस्य अपि अष्टादशानां सञ्ज्ञा भवति। ऋकारस्य त्रिंशतः सञ्ज्ञा भवति। एवम् लृकारस्यापि त्रिंशतः सञ्ज्ञा भवति। एओऐऔ इत्यक्ते द्वादशानां सञ्ज्ञा भवति। एकार-ऐकारयोः तथा ओकार-औकारयोः मिथः सावर्ण्यं नास्ति। एओङ् इत्येव सिद्धे ऐऔच् इति सूत्रस्य सत्त्वात्। अनुनासिकाननुनासिकभेदेन यवला द्विधा। तेनाननुनासिकास्ते द्वयोर्द्वयोः सञ्ज्ञा।

**स्वावलोकनप्रश्नाः -**

(१) सावर्ण्यनिषेधः केन सूत्रेण ?

(२) सावर्ण्यनिषेधस्य किं प्रयोजनम् ?

(३) सवर्णग्राहकं सूत्रं किम् ?

(४) यवलाः कति विधाः, के ते ?

## १.१५ तपरसञ्ज्ञा -

**(१५) तपरस्तत्कालस्य (१-१-७०)** तः परो यस्मात् सः तपरः। उदाहरणम्- **अदेङ्गुणः (१-१-२)** इत्यत्र अत् - तः परः यस्मात् उ अकारात्। अकारानन्तरं तकारः अस्ति। तात् परः उ तकारात् परः उ तपरः। उदाहरणम्- **अदेङ्गुणः (१-१-२)** इति सूत्रे एव अत् एङ् इत्यत्र एङ्। तकारात् परः विद्यमानः एङ्प्रत्याहारः। सूत्रार्थः - तपरः यः भवति सः उच्चारणकालस्य समकालस्यैव सञ्ज्ञा भवति- इति। तपरकरणवेलायां ह्रस्वः भवति चेत् ह्रस्वस्य सञ्ज्ञा भवति, दीर्घः अस्ति चेत् दीर्घस्य सञ्ज्ञा भवति, प्लुतः अस्ति चेत् प्लुतस्य सञ्ज्ञा भवति।

तेन अत् इत् उत् इति कथनेन षण्णामेव सञ्ज्ञा, ऋदिति कथनेन ऋलृवर्णयोः सावर्ण्यात् द्वादशानां सञ्ज्ञा भवति।

## १.१६ वृद्धिसञ्ज्ञा -

(१६) **वृद्धिरादैच् (१-१-१)** सूत्रार्थः - आत्उदीर्घ-आकारः, ऐच् उ ऐकारः, औकारः इत्येते वृद्धिसञ्ज्ञाः भवन्ति- इति।

## १.१७ गुणसञ्ज्ञा -

(१७) **अदेङ्गुणः (१-१-२)** सूत्रार्थः - अत् उह्रस्व-अकारः, एङ् उ एकारः, ओकारः इत्येते गुणसञ्ज्ञाः भवन्ति- इति।

**स्वावलोकनप्रश्नाः -**

(१) तपरशब्दस्य कतिधा विग्रहः भवति ?

(२) वृद्धिसञ्ज्ञा केषां भवति ?

(३) गुणसञ्ज्ञा केषां भवति ?

## १.१८ धातुसञ्ज्ञा -

**(१८) भूवादयो धातवः (१-३-१)** भूश्च वाश्च भूवौ। आदिश्च आदिश्च आदी। भूवौ आदी येषां ते भूवादयः। सूत्रार्थः - भूप्रभृतयो वासदृशाः च ये ते उ क्रियावाचिनः भ्वादयः धातुसञ्ज्ञाः स्युः- इति।

## १.१९ निपातसञ्ज्ञा -

**(१९) प्राग्रीश्वरान्निपाताः (१-४-५६)** इति अधिकारसूत्रम्। 'निपाताः' इत्यधिक्रियते।

**(२०) चादयोऽसत्त्वे (१-४-५७)** सूत्रार्थः - सत्त्वम् उ द्रव्यम् उ लिङ्गसङ्ख्याकारकान्वितम्। चः आदिः येषां ते चादयः। तथा च ये चादयः लिङ्गसङ्ख्याकारकान्विताः न भवन्ति उ अद्रव्याः भवन्ति ते निपातसञ्ज्ञाः स्युः- इति।

**(२१) प्रादयः (१-४-५८)** सूत्रार्थः - प्र आदिः येषां ते प्रादयः। अद्रव्यार्थाः प्रादयः निपातसञ्ज्ञाः स्युः।

## १.२० उपसर्गसञ्ज्ञा -

**(२२) उपसर्गाः क्रियायोगे (१-४-५९)** सूत्रार्थः - प्रादयः क्रियायोगे उपसर्गसञ्ज्ञाः स्युः- इति।

## १.२१ गतिसञ्ज्ञा -

**(२३) गतिश्च (१-४-६०)** सूत्रार्थः - प्रादयः क्रियायोगे गतिसञ्ज्ञाः स्युः- इति।

प्रादयः- प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप - एते प्रादयः।

## १.२२ विभाषासञ्ज्ञा -

**(२४) न वेति विभाषा (१-१-४४)** सूत्रार्थः - निषेधविकल्पयोः विभाषा इति सञ्ज्ञा भवति- इति।

## १.२३ स्वरूपसञ्ज्ञासूत्रम् -

**(२५) स्वं रूपं शब्दस्याशब्दसञ्ज्ञा (१-१-६८)** सूत्रार्थः - शब्दशास्त्रे याः वृद्धिगुणादयः सञ्ज्ञाः भवन्ति ताः विहाय शब्दस्य स्वं रूपं = आनुपूर्वी सञ्ज्ञि भवति। उदाहरणम् - अग्निः इत्युक्ते सञ्ज्ञा। अ, ग्, न्, इः उ अकारोत्तर-गकारोत्तर-नकारोत्तर-इकारोत्तरविसर्गः आनुपूर्वी भवति। आनुपूर्वी सञ्ज्ञि भवति।

**स्वावलोकनप्रश्नाः -**

(१) निपातसञ्ज्ञाविधायकं सूत्रद्वयं किम् ?

(२) प्रादीनां का सञ्ज्ञाः भवन्ति ?

(३) विभाषासञ्ज्ञा कस्य भवति ?

(४) शब्दशास्त्रे स्वं रूपं किं भवति ?

## १.२४ तदन्तसञ्ज्ञा -

**(२६) येन विधिस्तदन्तस्य (१-१-७२)** सूत्रार्थः - विशेषणं तदन्तस्य उ विशेषणान्तस्य सञ्ज्ञा स्यात् स्वस्य च रूपस्य- इति।

## १.२५ अवसानसञ्ज्ञा -

**(२७) विरामोऽवसानम् (१-४-११०)** सूत्रार्थः - वर्णानामभावोऽवसानसञ्ज्ञः स्यात्- इति।

## १.२६ संहितासञ्ज्ञा -

**(२८) परः सन्निकर्षः संहिता (१-४-१०९)** सूत्रार्थः - वर्णानामतिशयितः सन्निधिः संहितासञ्ज्ञः स्यात्- इति।

## १.२७ पदसञ्ज्ञा -

**बोधप्रश्नः -**

(१) पदसञ्ज्ञा कस्य भवितुमर्हति ?

**(२९) सुप्तिङन्तं पदम् (१-४-१४)** सूत्रार्थः - सुबन्तं तिङन्तं च पदसञ्ज्ञं स्यात्- इति।

## १.२८ संयोगसञ्ज्ञा -

**(३०) हलोऽनन्तराः संयोगः (१-१-७)** सूत्रार्थः - अज्भिः व्यवधानरहिताः हलः संयोगसंज्ञाः स्युः- इति।

## १.२९ लघुसञ्ज्ञा -

**(३१) ह्रस्वं लघु (१-४-१०)** सूत्रार्थः - ह्रस्वः यः वर्णः भवति तस्य लघुसञ्ज्ञा भवति- इति।

## १.३० गुरुसञ्ज्ञा -

**(३२) संयोगे गुरु (१-४-११)** सूत्रार्थः - संयोगे परे ह्रस्वं गुरुसञ्ज्ञं स्यात्- इति।

**(३३) दीर्घं च (१-४-१२)** सूत्रार्थः - दीर्घं च गुरुसञ्ज्ञं स्यात्- इति।

**स्वावलोकनप्रश्नाः-**

(१) संहिता इत्युक्ते किम् ?

(२) अवसानमित्युक्ते किम् ?

(३) पदसञ्ज्ञा कयोः भवति ?

(४) संयोगसञ्ज्ञा कस्य भवति ?

(५) लघुसञ्ज्ञा कस्य भवति ?

(६) गुरुसञ्ज्ञा कयोः भवति ?

अस्मिन् सञ्ज्ञाप्रकरणे उक्तानि सञ्ज्ञासूत्रणि -

आहत्य अस्मिन् प्रकरणे त्रयस्त्रिंशत् सूत्राणि उक्तानि। तत्र अष्टाविंशति (२८) सूत्राणि एव सञ्ज्ञासूत्राणि। तानि -

(१) हलन्त्यम् (१.३.३)
(२) आदिरन्त्येन सहेता (१-१-७१)
(३) उपदेशेऽजनुनासिक इत् (१-३-२)
(४) ऊकालोऽज्झ्रस्वदीर्घप्लुतः (१-२-२७)
(५) उच्चैरुदात्तः (१-२-२९)
(६) नीचैरनुदात्तः (१-२-३०)
(७) समाहारः स्वरितः
(८) मुखनासिकावचनोऽनुनासिकः (१-१-८)
(९) तुल्यास्यप्रयत्नं सवर्णम् (१-१-९)
(१०) अणुदित्सवर्णस्य चाप्रत्ययः (१-१-६९)
(११) तपरस्तत्कालस्य (१-१-७०)
(१२) वृद्धिरादैच् (१-१-१)
(१३) अदेङ्गुणः (१-१-२)
(१४) भूवादयो धातवः (१-३-१)
(१५) चादयोऽसत्त्वे (१-४-५७)

(१६) प्रादयः (१-४-५८)
(१७) उपसर्गाः क्रियायोगे
(१८) गतिश्च (१-४-६०)
(१९) न वेति विभाषा (१-१-४४)
(२०) स्वं रूपं शब्दस्याशब्दसञ्ज्ञा (१-१-६८)
(२१) येन विधिस्तदन्तस्य (१-१-७२)
(२२) विरामोऽवसानम् (१-४-११०)
(२३) परः संनिकर्षः संहिता (१-४-१०९)
(२४) सुप्तिङन्तं पदम् (१-४-१४)
(२५) हलोऽनन्तराः संयोगः (१-१-७)
(२६) ह्रस्वं लघु (१-४-१०)
(२७) संयोगे गुरु (१-४-११)
(२८) दीर्घं च (१-४-१२)

एतैः अष्टाविंशतिसङ्ख्याकैः सूत्रैः अष्टाविंशतिः सञ्ज्ञाः उक्ताः।

**।। इति सञ्ज्ञाप्रकरणम् ।।**

# ।। द्वितीयखण्डः परिभाषाप्रकरणम् ।।

## संरचना

२.० प्रस्तावना।

२.१ लक्षिताधिगमविशेषाः।

२.२ पदोपस्थापकपरिभाषा।

२.३ टिदागमपरिभाषा - किदागमपरिभाषा - च।

२.४ मिदागमपरिभाषा।

२.५ स्थानसम्बन्धसूचकपरिभाषा।

२.६ सदृशतमादेशबोधकपरिभाषा।

२.७. विभक्तिनिर्देशसम्बन्धिपरिभाषा।

२.८ आदेशव्यवस्थापकपरिभाषा।

२.९ सर्वादेशपरिभाषा।

२.१० अधिकारत्वबोधकपरिभाषा।

२.११ अन्याः परिभाषाः।

## २.० प्रस्तावना -

पूर्वस्मिन् पाठे वयं सञ्ज्ञाविषये ज्ञातवन्तः। सम्प्रति अस्मिन् पाठे परिभाषाविषये ज्ञास्यामः। अनियमे नियमकारिणी परिभाषा, परितो व्यापृता भाषा परिभाषा इत्यादि बाहूनि वचनानि परिभाषाविषये श्रूयन्ते। अनेन ज्ञायते - एताः स्वस्थले किमपि कार्यं न कुर्वन्ति परम् अन्येषां सूत्राणां साहाय्यं कुर्वन्ति- इति। सञ्ज्ञा-परिभाषा-अतिदेश-अधिकारसूत्राणि विधिसूत्राणां साहाय्यं कुर्वन्ति। एतानि सूत्राणि अव्यवस्थायां व्यवस्थामापादयन्ति।

पाणिनिना एतानि सूत्राणि एकत्र नोक्तानि। अत्र प्रकरणे कानिचन परिभाषासूत्राणि सर्वत्र आवश्यकानि एकत्रीकृतानि। तथैव अन्यानि अपि परिभाषासूत्राणि अस्मिन् प्रकरणे उक्तानि। सम्प्रति परिभाषासूत्राणां विचारः क्रियते।

## २.१ लक्षिताधिगमविशेषाः -

एनं पाठं पठित्वा भवन्तः

- प्रत्येकं परिभाषायाः प्रवृत्तिस्थानं ज्ञास्यन्ति।
- परिभाषाः कथं विधिसूत्राणां साहाय्यं कुर्वन्ति इति ज्ञातुं शक्नुवन्ति।
- परिभाषा कथम् अनियमे नियमं कुर्वन्ति इति ज्ञास्यन्ति।
- एकं परिभाषासूत्रम् अपरं परिभाषासूत्रं कथं बाधते इति ज्ञास्यन्ति।

## २.२ पदोपस्थापकपरिभाषा -

**(३४) इको गुणवृद्धी (१-१-३)** सूत्रार्थः - गुणशबदेन यत्र गुणः विधीयते, वृद्धिशबदेन यत्र वृद्धिः विधीयते तत्र उभयत्र 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते- इति।

उदाहरणम्- **मिदेर्गुणः (७.३.८२)** अस्मिन् सूत्रे गुणपदमुच्चार्य गुणः विहितः। अतः अत्र 'इकः' इति षष्ठ्यन्तं पदम् उपतिष्ठते। **मृजेर्वद्धिः (७.२.११४)** अस्मिन् सूत्रे वृद्धिपदमुच्चार्य वृद्धिः विहिता। अतः अत्र 'इकः' इति षष्ठ्यन्तं पदम् उपतिष्ठते। एवमन्यत्रापि।

**(३५) अचश्च (१-२-२८)** सूत्रार्थः - ह्रस्वदीर्घप्लुतशबदैर्यत्राज्विधीयते तत्र 'अचः' इति षठ्यन्तं पदमुपतिष्ठते- इति।

उदाहरणम्- **ह्रस्वो नपुंसके प्रातिपदिकस्य (१.२.४७)** इति सूत्रे ह्रस्वः इति पदमुच्चार्य अच् विहितः। अतः अत्र 'अचः' इति षष्ठ्यन्तं पदमुपतिष्ठते।

**स्वावलोकनप्रश्नाः -**

(१) गुणः वृद्धिः इति पदमुच्चार्य गुणः वृद्धिः विधीयते चेत् तत्र किं पदमुपतिष्ठते ?

(२) ह्रस्वः दीर्घः प्लुतः इति पदमुच्चार्य अज्विधीयते चेत् तत्र किं पदमुपतिष्ठते ?

(३) इको गुणुवृद्धी (१.१.३) इति सूत्रस्य उदाहरणं किम् ?

(४) अचश्च (१.२.२८) सूत्रस्य उदाहरणं किम् ?

## २.३ टिदागमपरिभाषा - किदागमपरिभाषा - च

**(३६) आद्यन्तौ टकितौ (१-१-४६)** आदिश्च अन्तश्च = आद्यन्तौ। टश्च कश्च = टकौ। टकौ इतौ ययोः तौ टकितौ। सूत्रार्थः - टित् आगमः यस्य विहितः सः तस्य आदौ भवति तथा तस्यैव अवयवोऽपि भवति। कित् आगमः यस्य विहितः सः तस्य अन्ते भवति तथा तस्यैव अवयवोऽपि भवति।

उदाहरणम्- टितः- **आर्धधातुकस्य इड्वलादेः (७.२.३५)** इत्यनेन विहितः इट् आगमः। भविता इति रूपम्। कितः- **छे च (६.१.७३)** इति विहितः तुक् आगमः। शिवच्छाया इति रूपम्।

## २.४ मिदागमपरिभाषा -

**(३७) मिदचोऽन्त्यात्परः (१-१-४७)** मकारः इत् यस्य सः मित्। सूत्रार्थः - मित् आगमः यः भवति सः अचां मध्ये यः अन्त्यः तस्मात् अन्त्यात् परं भवति। अन्त्यात् परं भवन् तस्यैव अवयवो भवति। अर्थात् - मित् अचां मध्ये यः अन्त्यः तस्मात् परः तस्यैव अन्तावयवो भवति- इति।

उदाहरणम् **नपुंसकस्य झलचः (७.१.७२)** वनानि इति रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) आद्यन्तौ टकितौ (१.१.४६) सूत्रस्य टितः उदाहरणं किम् ?

(२) आद्यन्तौ टकितौ (१.१.४६) सूत्रस्य कितः उदाहरणं किम् ?

(३) मिदचोऽन्त्यात् परः (१.१.४७) सूत्रस्य मितः उदाहरणं किम् ?

## २.५ स्थानसम्बान्धसूचकपरिभाषा -

**(३८) षष्ठी स्थानेयोगा (१-१-४९)** स्थानेन योगो अस्याः = स्थानयोगा इति भवितव्यम्। परं सूत्रकारेण स्थानेयोगा इत्येव भवतु इति निपातनं कृतम्। प्रायः सम्बान्धसामान्ये षष्ठी भवति। षष्ठीविभक्त्यन्तं पदमुच्चार्यते चेत् सा षष्ठी स्थानेयोगा भवति। सूत्रार्थः - यत्र षष्ठ्याः सम्बान्धः न निर्धारितः तत्र षष्ठी स्थानेयोगा भवति इति ज्ञातव्यम्। अत्र स्थानं नाम प्रसङ्गः- इति।

उदाहरणम्- **इको यणचि (६.१.७७)** अत्र "इकः" इति षष्ठ्यन्तं पदमुच्चारितमस्ति। परं सम्बान्धः न निर्धारितः। अतः इकः स्थाने यण् भवति इत्यर्थः। इक् उच्चारणप्रसङ्गे यण् उच्चारणीयः इत्यर्थः। उदाहरणम् - सुधी + उपास्यः = सुध्य् उपास्यः।

## २.६ सदृशतमादेशबोधकपरिभाषा -

**(३९) स्थानेऽन्तरतमः (१-१-५०)** अत्र सूत्रे स्थानशब्दस्य सत्त्वात् आदेशः इति अध्याह्रियते। अन्तरतमः = सदृशतमः। सूत्रार्थः - प्रसङ्गे सति सदृशतम आदेशो भवति- इति। सादृश्यं हि स्थानतः, अर्थतः, गुणतः, प्रमाणतः भवति। एषु चतुर्षु सदृशतमः आदेशो भवति इत्यर्थः। उदाहरणानि-

**(१) स्थानतः -** दधि+अत्र = दध्यत्र। **इको यणचि (६.१.७७)** इति सूत्रेण यवरल इति सर्वेषु वर्णेषु प्राप्तेषु इकारस्य स्थानसाम्यात् यकारः भवति।

**(२) अर्थतः - तृज्वत्क्रोष्टुः (७.१.९५)** इति सूत्रेण क्रोष्टुशब्दस्य असम्बुद्धौ सर्वनामस्थाने परे तृजन्तेन तुल्यं भवति इत्युक्तम्। अर्थतः साम्यात् क्रोष्टृशब्दः एव भवति न तु अन्यः कर्तृ- इत्यादितृजन्तशब्दः।

**(३) गुणतः -** वाग् + हरिः = वाग्घरिः। अत्र **झयो होऽन्यतरस्याम् (८.४.६२)** इति सूत्रेण घोषवतः महाप्राणवतः हकारस्य तादृशः एव घकारो भवति।

**(४) प्रमाणतः - अदसोऽसेर्दादु दो मः (८.२.८०)** इति विधीयमानः उकारः ह्रस्वस्यैव भवति, ऊकारः दीर्घस्यैव भवति प्रमाणतः।

यत्र एकस्मिन् स्थले अनेकविधमान्तर्यं सन्निहितं तत्र स्थानत आन्तर्यं बालीयः। उदाहरणम्- चेता, स्तोता इत्यत्र चि, स्तु इत्यनयोः तृचि परे गुणः विधीयते **सार्वधातुकार्धधातुकयोः**

**(७.३.८४)** इति सूत्रेण। गुणवर्णस्तु प्रमाणतः चि, स्तु इत्यनयोः अकारः स्यात्। परम् - इकारस्य तालु स्थानम्, एकारस्य कण्ठतालु स्थानम्। स्थानतः साम्यात् एकारः एव भवति चेता इति रूपम्। उकारस्य ओष्ठौ स्थानम्, ओकारस्य कण्ठोष्ठं स्थानम्। स्थानतः साम्यात् ओकारः एव भवति स्तोता इति रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) स्थानशब्दस्य कः अर्थः ?

(२) षष्ठी स्थानेयोगा (१-१-४९) इत्यस्य उदाहरणं किम् ?

(३) सादृश्यं कतिविधम्, तन्नामानि कानि ?

(४) प्रत्येकं सादृश्यस्य उदाहरणं लिखत ?

(५) स्थानतः आन्तर्यं बालीयः इत्यस्य उदाहरणं किम् ?

## २.७. विभक्तिनिर्देशसम्बान्धिपरिभाषा -

### २.७.१ सप्तमीनिर्देशसम्बान्धिपरिभाषा -

**इको यणचि (६.१.७७)** इत्यस्य अचि परे इकः स्थाने यण् भवति- इति सूत्रार्थः। (१) तत्र इक् प्रथमं भवेत् उत अच् प्रथमं भवेत् इत्यत्र नास्ति निर्णयः। अत परं विद्यमानस्य इकः प्राग् अचि सति यण् स्यात्। सुधी+ उपास्य इत्यत्र उकारः इक्। ईकारः अच् इति कारणेन उकारस्य यण् भवेत्। (२) एवमेव इक्, अच् इत्यनयोः मध्ये व्यवहितं स्यात् उत अव्यवहितं भवेत् इति नास्ति निर्णयः। अतः व्यवहितस्यापि यण् भवेत्। सुधी इति पदे ईकारः इक् भवति। सकारोत्तर-उकारः अच् भवति। मध्ये धकारस्य व्यवधाने अपि यण् भवेत्। अतः उभयथा नियमयितुं सूत्रमारब्धम् -

**(४०) तस्मिन्निति निर्दिष्टे पूर्वस्य (१-१-६६)** "तस्मिन्" इति सप्तम्यन्तस्य अनुकरणमिदम्। निर्दिष्टः = अव्यवहितः। सूत्रार्थः - सप्तमीविभक्तिं निर्दिश्य विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य भवति- इति। पूर्वोक्तरीत्या सूत्रार्थे पूर्वस्य इत्युक्तत्वात् सुधी+उपास्यः इत्यत्र परे विद्यमानस्य उकारस्य यण् न भवति। पूर्वं विद्यमानस्य धकारोत्तर-ईकारस्यैव भवति। एवमेव सूत्रार्थे अव्यवहितस्य इत्युक्तत्वात् सुधी इत्यत्र दोषः नास्ति। धकारेण व्यवहितत्वात्।

### २.७.२ पञ्चमीनिर्देशसम्बान्धिपरिभाषा -

**(४१) तस्मादित्युत्तरस्य (१-१-६७)** "तस्मात्" इति पञ्चमीविभक्तेः अनुकरणम्। सूत्रार्थः -

पञ्चमीविभक्तिं निर्दिश्य विधीयमानं = क्रियमाणं कार्यम् अन्येन वर्णेन अव्यवहितस्य परस्य भवति- इति।

| **स्वावलोकनप्रश्नाः -** |
|---|
| (१) तस्मिन्निति निर्दिष्टे पूर्वस्य (१-१-६६) इति सूत्रे "तस्मिन्" इति पदेन किं गृह्यते ? |
| (२) तस्मिन्निति निर्दिष्टे पूर्वस्य (१-१-६६) इति सूत्रे "निर्दिष्टे" पदस्य कः अर्थः ? |
| (३) तस्मादित्युत्तरस्य (१-१-६७) इति सूत्रे "तस्मात्" इति पदेन किं गृह्यते ? |

## २.८ आदेशव्यवस्थापकपरिभाषा -

### २.८.१ अन्त्यादेशपरिभाषा -

| **स्मारणप्रश्नः -** |
|---|
| (१) अक्षरसमाम्नाये विद्यमानानां सर्वेषां वर्णानां कृते एकः प्रत्याहारः कः भवति ? |

**(४२) अलोऽन्त्यस्य (१-१-५२)** अल् इति सर्वेषां वर्णानां वाचकः प्रत्याहारः। अलः इति षष्ठ्यन्तम्। सूत्रार्थः - षष्ठीविभक्तिनिर्दिष्टस्य अन्त्यस्य अलः स्थाने आदेशः स्यात्- इति। अर्थात् - षष्ठ्याः यत्र स्थानं निर्दिष्टं तत्र यः आदेशः उच्यते सः अन्त्यस्य अलः स्थाने भवति- इत्यर्थः।

उदाहरणम्- **त्यदादीनामः (७.२.१०२)** इत्यनेन विधीयमानः "अ" इत्यादेशः अन्त्यस्य अलः स्थाने भवति। सः, यः इति उदाहरणम्।

**(४३) ङिच्च (१-१-५३)** ङकारः इत् यस्य सः ङित्। सूत्रार्थः - ङित् आदेशः अपि अन्त्यस्य अलः स्थाने भवति- इति।

उदाहरणम्- **अवङ् स्फोटायनस्य (६.१.१२३)** इति सूत्रेण विधीयमानः अवङ् आदेशः अन्ते भवति। गो+अग्रम् इत्यत्र गकारात् परस्य ओकारस्य अवङ् आदेशः। ङकारः इत् भवति। गव+अग्रम् = गवाग्रम् इति।

अत्र काचित् शङ्का- **अलोऽन्त्यस्य (१-१-५२)** इति पूर्वसूत्रेणैव अन्त्यादेशः सिद्धः। पुनः किमर्थमिदं सूत्रम् इति।

समाधानम्- अग्रे **अनेकाल्शित्सर्वस्य (१.१.५५)** इति सूत्रमुच्यते। तेन अनेकाल् यः भवति सः सर्वादेशः भवति। "अवङ्" इत्यादयः ङित्-आदेशाः अनेकालः भवन्ति। अतः तेषाम् अन्ते एव विधानार्थं **ङिच्च (१.१.५३)** इति सूत्रमपेक्ष्यते। अतः **ङिच्च (१.१.५३)** इति सूत्रम् **अनेकाल्शित्सर्वस्य (१.१.५५)** इति सूत्रस्य अपवादसूत्रं भवति।

**स्वावलोकनप्रश्नाः -**

(१) अलोऽन्त्यस्य (१-१-५२) सूत्रेण आदेशः कुत्र विधीयते ?

(२) अलोऽन्त्यस्य (१-१-५२) सूत्रस्य उदाहरणं किम् ?

(३) ङिच्च (१-१-५३) सूत्रेण आदेशः कुत्र विधीयते ?

(४) ङिच्च (१-१-५३) सूत्रस्य उदाहरणं किम् ?

(५) ङिच्च (१-१-५३) इति सूत्रम् अपेक्ष्यते न वा ?

### २.८.२ आद्यादेशपरिभाषा -

**(४४) आदेः परस्य (१-१-५४)** सूत्रार्थः - परस्य यत् कार्यं विहितं तत् परस्य आदेः अलः स्थाने भवति- इति।

**अलोऽन्त्यस्य (१-१-५२)** इति सूत्रेण अलः यद्विहितं कार्यं तत् अन्त्यस्य भवति इत्युक्तम्। परं तु अलः कार्यं परस्य विहितं चेत् तर्हि तत्र **अलोऽन्त्यस्य (१-१-५२)** इति सूत्रं बााधित्वा **आदेः परस्य (१-१-५४)** इति सूत्रं प्रवर्तते।

उदाहरणम् - **द्व्यन्तरुपसर्गेभ्यो अप ईत् (६.३.९७)** इति सूत्रेण विहितः ईत्, द्वि+अप इति स्थिते परस्य आदौ एव भवति। तदा द्वि+ईप = द्वीपम् इति भवति।

**स्वावलोकनप्रश्नौ -**

(१) आदेः परस्य (१-१-५४) इति सूत्रं कस्य बााधकं भवति ?

(२) आदेः परस्य (१-१-५४) सूत्रस्य उदाहरणं किम् ?

## २.९ सर्वादेशपरिभाषा -

**(४५) अनेकाल्शित्सर्वस्य (१-१-५५)** न एकः अनेकः। अनेकः अल् यस्य सः अनेकाल्। शकारः इत् यस्य सः शित्। अनेकाल् च शित् च अनेकाल्शित्। सूत्रार्थः - यः आदेशः अनेकाल् भवति, यः आदेशः शित् भवति सः स्थानिनः सर्वस्य अपि भवति- इति।

उदाहरणम्- **अस्तेर्भूः (२.४.५२)** इति सूत्रेण अस् धातोः 'भू' इत्यादेशः सर्वादेशत्वेन विहितः।

अन्त्यस्य अलः स्थाने विहितं यदि शित् अथ वा अनेकाल् चेत् तर्हि **अलोऽन्त्यस्य (१.१.५२)** इति सूत्रम् अनेन बााध्यते।

अष्टाभ्य **औश्** **(७.१.२१)** इति सूत्रेण अष्टा+अस् इत्यवस्थायाम् औश् इति आदेशः भवति। सः औश् आदेशः **आदेः परस्य (१.१.५४)** इति सूत्रेण अस् इत्यस्य आदेः अकारस्य प्राप्तः। परत्वात् **अनेकाल्शित्सर्वस्य (१-१-५५)** इत्यनेन सर्वादेशः प्राप्तः। अतः **अनेकाल्शित्सर्वस्य (१-१-५५)** इति सूत्रम् **अलोऽन्त्यस्य (१.१.५२)** तथा **आदेः परस्य (१.१.५४)** इति सूत्रद्वयमपि बााधते।

**स्वावलोकनप्रश्नाः -**

(१) अनेकाल्शित् (१-१-५५) इत्यस्य विग्रहः कथम् ?

(२) अनेकाल्शित्सर्वस्य (१-१-५५) इति सूत्रस्य उदाहरणं किम् ?

(३) अनेकाल्शित्सर्वस्य (१-१-५५) इति सूत्रं कयोः सूत्रयोः अपवादसूत्रं भवति ?

## २.१० अधिकारत्वबोधकपरिभाषा -

**(४६) स्वरितेनाधिकारः (१-३-११)** इतः प्राक् सन्धिप्रकरणे अस्माभिः उदात्तः अनुदात्तः स्वरितः इति स्वरविषये ज्ञातमस्ति। पाणिनिः यदा सूत्राणि रचितवान् तदा संहिताक्रमेण रचितवान्। तदा तस्य सूत्रेषु - उदात्त-अनुदात्त-स्वरितस्वराः आसन्। सम्प्रति सः संहिताक्रमः लुप्तः। स्वरोऽपि नष्टः। अतः परम्परया गुरुमुखात् स्वराः ज्ञातव्याः भवन्ति। सूत्रार्थः -स्वरितस्वरयुक्तं शब्दस्वरूपम् अधिकृतं भवति- इति। व्यापृतं भवति इत्यर्थः। कियद्दूरम् अधिकृतं भवति इति तु व्याख्यानादेव ज्ञातव्यं भवति।

## २.११ अन्याः परिभाषाः -

प्रकरणवशात् काश्चन अन्याः परिभाषाः उच्यन्ते -

**(प) परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बालीय**ः। (१) सूत्रद्वये यत् अग्रिमं सूत्रं तत् परं भवति। (२) अन्यत् सूत्रं प्रवृत्तं चेदपि अप्रवृत्तं चेदपि यत् सूत्रं, यत् कार्यं प्रवर्तते तत् नित्यं भवति। (३) अल्पापेक्षम् अन्तरङ्गं भवति। (४) निरवकाशत्वमेव अपवादस्य बीजं भवति। पर-नित्य-अन्तरङ्ग-अपवाद-इत्येतेषु उत्तरम् उत्तरं बालवत् भवति।

**(प) असिद्धं बाहिरङ्गमन्तरङ्गे।** अल्पापेक्षमन्तरङ्गम्, बाह्वपेक्षं बाहिरङ्गं भवति। अल्पनिमित्तकं कार्यं यदा क्रियते तदा बाहुनिमित्तकं कार्यम् असिद्धं भवति।

**(प) अकृतव्यूहाः पाणिनीयाः।** न कृतः = अकृतः, विशिष्टः ऊहः = व्यूहः। विनाशोन्मुखनिमित्तकं कार्यं न चिन्तयन्ति = न कुर्वन्ति। कृतस्य कार्यस्य निमित्तम् अग्रे नश्यति चेत् तादृशं कार्यं न कुर्वन्ति वैयाकरणाः इत्यर्थः।

**स्वावलोकनप्रश्नाः -**

(१) स्वरितस्वरेण किं ज्ञायते ?

(२) परादिषु किं बालवत् भवति ?

(३) अन्तरङ्गे कार्ये कर्तव्ये किम् असिद्धं भवति ?

(४) अकृतव्यूहाः के ?

**।। इति परिभाषाप्रकरणम् ।।**

# ।। अथ तृतीयखण्डः अच्सन्धिप्रकरणम् ।।

## संरचना

३.० प्रस्तावना।
३.१ लक्षिताधिगमविशेषाः।
३.२.० पूर्ववर्णस्य स्थाने आदेशसन्धिः।
३.३.० एकादेशसन्धिः।
३.४.० पररूपसन्धिः।
३.५.० सवर्णदीर्घसन्धिः।
३.६ पूर्वरूपसन्धिः।
३.७.० सन्धिसारः।

## ३.० प्रस्तावना -

प्रथमपाठे सञ्ज्ञाविषये तथा द्वितीयपाठे परिभाषाविषये अस्माभिः ज्ञातमस्ति। एषः सन्धिविषयकः तृतीयः पाठः। सन्धिः इत्युक्ते वर्णानाम् अतिशयितः सन्निधिः भवति। पदे विद्यमानानां सर्वेषां वर्णानाम् उच्चारणम् एकदा एव न भवति। क्रमेण भवति। प्रथमवर्णस्य अनन्तरं द्वितीयवर्णस्य उच्चारणं भवति। एवंक्रमेण तृतीयचतुर्थादीनां वर्णानाम् उच्चारणं भवति। एवम् उच्चारणकाले द्वयोः वर्णयोः मध्ये अर्धमात्राकालात्मकं व्यवधानं भवितुमर्हति। ततोऽपि अधिकः कालः न भवेत्। एवम् अर्धमात्राकालव्यवधाने एव वर्णयोः उच्चारणं सन्धिः भवति।

सन्धिः पदस्य मध्ये अथ वा पदयोर्मध्ये भवति। उभयत्रापि वर्णद्वयमध्ये एव कार्यं भवति। सन्धिः इत्युक्ते सन्धिकार्यम् इत्यर्थः। तत् कार्यं चतुर्धा भवति। तथा हि -

I आदेशः- पूर्वस्थितं वर्णं निरस्य नूतनवर्णः आगच्छति। अतः **स्थाने शत्रुवदादेशः** इत्युच्यते। अयमादेशः त्रिधा भवति (१) पूर्वपरयोः वर्णयोः मध्ये पूर्वस्य वर्णस्य स्थाने आदेशः। उदाहरणम्- इति+अपि = इत्यपि। अत्र पूर्वस्य इकारस्य स्थाने यकारादेशः भवति। (२) पूर्वपरयोः वर्णयोः मध्ये परस्य वर्णस्य स्थाने आदेशः। उदाहरणम् - यज्+न = यज्ञः। अत्र परस्य नकारस्य स्थाने ञकारादेशः। जकारञकारयोः संयोगे ज्ञ-इति भवति। (३) पूर्वपरयोः वर्णयोः स्थाने। अस्य एकादेशः इति नाम। उदाहरणम्- गण+ईशः = गणेशः। अत्र पूर्वपरयोः अकार-इकारयोः (अ+ई) स्थाने एकारः एकादेशः जातः।

II आगमः - विद्यमानस्य वर्णस्य पार्श्वे अन्यस्य वर्णस्य उत्पत्तिः भवति। सः आगमः इत्युच्यते। **मित्रवद् आगमः** इत्युच्यते। उदाहरणम्- पठन् + अस्ति = पठन्नस्ति। अत्र उत्तरपदस्य अकारात् पूर्वं नूतनः अपरः नकारः उत्पन्नः। आगमोऽपि त्रिविधः। (१) टिदागमः - टित् आगमः यस्य विहितः सः तस्य आदौ भवति तथा तस्यैव अवयवोऽपि भवति।

(२) किदागमः - कित् आगमः यस्य विहितः सः तस्य अन्ते भवति तथा तस्यैव अवयवोऽपि भवति। (३) मिदागमः - मित् आगमः यः भवति सः अचां मध्ये यः अन्त्यः तस्मात् अन्त्यात् परं भवति। अन्त्यात् परं भवन् तस्यैव अवयवो भवति।

III लोपः - **अदर्शनं लोपः (१-१-६०)** इति सूत्रानुसारेण वर्णस्य अदर्शनं लोपः इत्युच्यते। उदाहरणम्- उभाव् + अपि = उभा अपि। अत्र वकारस्य लोपः जातः।

IV प्रकृतिभावः - पूर्वं यथा आसीत् तद्वदेव अवस्थानं प्रकृतिभावः। स्वभावेन अवस्थितिः इत्यर्थः। निमित्ते सत्यपि सन्धिकार्यं न भवति। उदाहरणम् - हरी + एतौ = हरी एतौ। अत्र यणः निमित्तम् अस्ति। परं यण् कार्यं न दृश्यते।

सन्धयः पञ्च। (१) स्वरसन्धिः (२) प्रकृतिभावः (३) व्यञ्जनसन्धिः (४) विसर्गसन्धिः (५) स्वादिसन्धिः इति। स्वरसन्धौ द्वयोः स्वरवर्णयोः मध्ये सन्धिकार्यं भवति। अच्सन्धौ = स्वरसन्धौ यण्सन्धिः, यान्तवान्तादेशसन्धिः, गुणसन्धिः, वृद्धिसन्धिः, पररूपसन्धिः, सवर्णदीर्घसन्धिः, पूर्वरूपसन्धिः - इति सप्त सन्धयः भवन्ति। तत्र यण्सन्धिः, यान्तवान्तादेशसन्धिः इति उभयत्र पूर्वपरयोः वर्णयोः मध्ये पूर्वस्य वर्णस्य स्थाने आदेशः भवति। गुणसन्धिः, वृद्धिसन्धिः, पररूपसन्धिः, सवर्णदीर्घसन्धिः, पूर्वरूपसन्धिः इति पञ्च सन्धिषु पूर्वपरयोः उभयोः स्थाने एकादेशः भवति। सम्प्रति स्वरसन्धिविषये ज्ञास्यामः।

## ३.१ लक्षिताधिगमविशेषाः -

एनं पाठं पठित्वा भवन्तः -

- अच्सन्धिविषये सम्यक् ज्ञास्यन्ति।
- कुत्र अच्सन्धिः केन सूत्रेण भवति इति ज्ञातुं प्रभवन्ति।
- कुत्र सन्धिः नित्यं भवति कुत्र विकल्पेन भवति इति ज्ञास्यन्ति।
- कुत्रचित् सन्धिविषयकसन्देहे निर्णयं प्राप्नुवन्ति।

## ३.२.० पूर्ववर्णस्य स्थाने आदेशसन्धिः -

### ३.२.१ यण् सन्धिः (यणादेशसन्धिः) -

अस्मिन् सन्धौ यण्वर्णाः आदेशाः भवन्ति।

**(४७) इको यणचि (६-१-७७)** "इकः" इति षष्ठी, "यण्" इति प्रथमा, "अचि" इति सप्तमी। सूत्रार्थः - इकः स्थाने यण् स्यादचि संहितायां विषये- इति। संहितायां विषये इत्युक्ते सन्धिं कर्तुम् इच्छा अस्ति चेत्- इत्यर्थः। उदाहरणम्- सुधी+उपास्यः इति स्थिते धकारोत्तर-ईकारः इक् भवति। उपास्यः इत्यत्र उकारः अचि अन्तर्भवति। अतः इकः स्थाने यण् भवति। यण्वर्णेषु "यवरल" इति चत्वारः वर्णाः सन्ति। तत्र उत्पत्तिस्थानसाम्यात् इकारस्य यकारः भवति। सुध्युपास्यः इति भवति।

**(४८) अनचि च (८-४-४७)** न अच् अनच् तस्मिन् अनचि। सूत्रार्थः - अचः परस्य यरः विकल्पेन द्वित्वं भवति। परम् अचः परस्य यरः अचि परे द्वित्वं न भवति। सुध्य्+उपास्यः इत्यत्र सकारोत्तर-उकारः अच् भवति। अचः परः यर् इत्युक्ते ध् अस्ति। अग्रे य् अस्ति। सः यकारः अच् न भवति। अतः ध् इत्यस्य विकल्पेन द्वित्वं भवति। इदानीं सुध्ध्य्+उपास्यः इत्यवस्थायां

**(४९) स्थानिवदादेशोऽनल्विधौ (१-१-५६)** यस्य कार्यं विधीयते सः स्थानी। यः विधीयते सः आदेशः। अलाश्रयो विधिः अल्विधिः। न अल्विधिः अनल्विधिः। सूत्रार्थः - आदेशः स्थानिवत् स्यात्। परं स्थानिनः अलाश्रयविधौ आदेशः स्थानिवत् न भवति- इति। अनेन सूत्रेण सुध्ध्य्+उपास्यः इत्यत्र ध् इत्यस्य द्वित्वनिषेधः भवति इति शङ्का। तथा हि -

आदेशः = ईकारस्य स्थाने आगतः यकारः। सः यकारः स्थानिवत् = ईकारवत् स्यात्। तदा यकारस्य अच्त्वम् आगतम्। इदानीम् **अनचि च (८-४-४७)** इति सूत्रेण धकारस्य द्वित्वं न भवति। तथा हि - अचः परस्य = उकारात् परस्य यरः = धकारस्य अचि परे = यकारे परे (स्थानिवद्भावात् ईकारः जातः) द्वित्वं न भवति- इति द्वित्वनिषेधस्य शङ्का। परम् अत्र शङ्का नैव युज्यते। तथा हि -

स्थानिवत्सूत्रे = **स्थानिवदादेशोऽनल्विधौ (१-१-५६)** इति सूत्रे "अनल्विधौ" इति निषेधः कृतः। स्थानिनः अलाश्रयविधौ आदेशः स्थानिवत् न स्यात्- इति। अत्र धकारस्य द्वित्वे कर्तव्ये कृतः यकारस्य स्थानिवद्भावः अल्विधिः भवति। अतः अत्र स्थानिवद्भावः न भवति। स्थानिवद्भावः न भवति इति हेतोः स्थानिवद्भावमाश्रित्य कृतः **अनचि च (८-४-४७)** इत्यस्य द्वित्वस्य निषेधोऽपि न भवति। अतः प्रागुक्तरीत्या धकारस्य द्वित्वं भवत्येव। एवं स्थिते **स्थानिवदादेशोऽनल्विधौ (१-१-५६)** इति सूत्रेण अल्विधौ स्थानिवद्भावः न प्रवर्तते। अतः इदानीम् अल्विधौ अपि स्थानिवद्भावार्थं सूत्रमारब्धम्।

**(५०) अचः परस्मिन्पूर्वविधौ (१-१-५७)** सूत्रार्थः - परनिमित्तः अजादेशः = अचः स्थाने आगतः आदेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये- इति। उदाहरणे अस्य सूत्रस्य अन्वयं कुर्मः। सुध्य्+उपास्य इत्यत्र परः = उपास्यः इत्यत्र उकारः अस्ति। उकारनिमित्तकः अजादेशः = अचः स्थाने आगतः आदेशः = ईकारस्य स्थाने आगतः आदेशः यकारः स्थानिवत् स्यात्। स्थानिभूतात् अचः = ईकरस्य पूर्वत्वेन दृष्टस्य = धकारस्य विधौ = द्वित्वविधौ कर्तव्ये। एवं स्थानिवद्भावः आगतः। स्थानिवद्भावेन यकारम् ईकारः इति मत्वा **अनचि च (८-४-४७)** इत्यनेन द्वित्वं न स्यात् इति पुनः शङ्का।

**समाधानम् -**

**(५१) न पदान्तद्विर्वचनवरेयलोपस्वरसर्वणानुस्वारदीर्घजश्चर्विधिषु (१-१-५८)** सूत्रार्थः - पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परनिमित्तः अजादेशः न स्थानिवत्- इति। इदानीं सुध्य्+उपास्य इत्यवस्थायां धकारस्य द्विर्वचनं = द्वित्वं क्रियते इति हेतोः तत्र **अचः परस्मिन्पूर्वविधौ (१-१-५७)** इति सूत्रेण प्राप्तः स्थानिवद्भावः अनेन **न पदान्तद्विर्वचनवरेयलोपस्वरसर्वणानुस्वार-**

**दीर्घजश्चर्विधिषु (१-१-५८)** सूत्रेण निषिध्यते। अतः धकारस्य द्वित्वं भवत्येव - इति समाधानम्।

अतः सुध्ध्य्+उपास्य इत्येव तिष्ठति। इदीनीं प्रथमधकारस्य दकारो भवति-

**(५२) झलां जश् झशि (८-४-५३)** सूत्रार्थः - झश्वर्णे परे झल्वर्णानां जश्-आदेशः भवति- इति। सुध्ध्य्+उपास्यः इत्यत्र झलां स्थाने = प्रथमधकारस्य स्थाने झशि परे = द्वितीयधकारे परे जश् वर्णः आदेशो भवति। स्थानसाम्यात् धकारस्य दकारः भवति। सुद्ध्युपास्यः इति भवति। सम्प्रति प्रकरणवशात् अपेक्षितं लोपसञ्ज्ञासूत्रं कथितम्-

**(५३) अदर्शनं लोपः (१-१-६०)** सूत्रार्थः - कस्यचित् वर्णस्य श्रवणप्रसङ्गे तस्य वर्णस्य अश्रवणं लोपसञ्ज्ञं भवति। यस्य श्रवणं भवेत् तस्य श्रवणं न भवति इत्यर्थः। तस्य लोपः भवति इत्यर्थः। इदानीं प्रकृतसूत्रेण यकारस्य लोपः शङ्कितः। यथा -

**(५४) संयोगान्तस्य लोपः (८-२-२३)** सूत्रार्थः - संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्- इति। अत्र सुध्ध्य् इत्यत्र यकारः संयोगस्य अन्ते वर्तते। तस्य लोपः भवतु इति शङ्का।

**समाधानम् -**

**यणः प्रतिषेधो वाच्यः (वा)** वार्त्तिकार्थः - संयोगान्तस्य यणः लोपो न भवति- इति। अतः संयोगान्तत्वेन यकारस्य लोपः न भवति - इति समाधानम्।

सुध्ध्य्+उपास्यः इति स्थिते यकारस्य द्वित्वं क्रियते-

**यणो मये द्वे वाच्ये (वा)** अत्र यण् मय् इत्यनयोः शब्दयोः पञ्चमीषष्ठ्योरेकवचने यणः इति मयः इति रूपं भवति। अतः अस्य वार्त्तिकस्य अर्थवर्णने पक्षद्वयं भवति। (१) यणः इति पञ्चमी मयः इति षष्ठी- इति, (२) मय इति पञ्चमी यण इति षष्ठी- इति च। धकारः मय् भवति। यकारः यण् भवति। अतः द्वितीये पक्षे यकारस्यापि द्वित्वम्। सुद्ध्य्युपास्यः इति भवति।

### ३.२.२ सुध्युपास्यः इत्यत्र चत्वारि रूपाणि -

धकारयकारयोर्द्वित्वविकल्पात् चत्वारि रूपाणि भवन्ति।

(१) द्विधं द्वियं रूपम्-

सुधी+उपास्यः इति स्थिते

सुध्य्+उपास्यः **इको यणचि (६-१-७७)** इत्यनेन ईकारस्य यकारः।

सुध्ध्य्+उपास्यः **अनचि च (८-४-४७)** इत्यनेन विकल्पेन धकारस्य द्वित्वम्।

सुद्ध्य्+उपास्यः **झलां जश् झशि (८-४-५३)** इत्यनेन प्रथमधकारस्य दकारः।

सुद्ध्य्य्+उपास्यः **यणो मये द्वे वाच्यो (वा)** इत्यनेन यकारस्य द्वित्वम्।

सुद्ध्य्युपास्यः इति रूपम्।

(२) द्विधम् एकयं रूपम्-

सुधी+उपास्यः इति स्थिते

सुध्य्+उपास्यः **इको यणचि (६-१-७७)** इत्यनेन ईकारस्य यकारः।

सुध्ध्य्+उपास्यः **अनचि च (८-४-४७)** इत्यनेन विकल्पेन धकारस्य द्वित्वम्।

सुद्ध्य्+उपास्यः **झलां जश् झशि (८-४-५३)** इत्यनेन प्रथमधकारस्य दकारः।

सुद्ध्युपास्यः इति रूपम्।

(३) एकधं द्वियं रूपम् -

सुधी+उपास्यः इति स्थिते

सुध्य्+उपास्यः **इको यणचि (६-१-७७)** इत्यनेन ईकारस्य यकारः।

सुध्य्य्+उपास्यः **यणो मये द्वे वाच्ये (वा)** इत्यनेन यकारस्य द्वित्वम्।

सुध्य्युपास्यः इति रूपम्।

(४) एकधम् एकयं रूपम्

सुधी+उपास्यः इति स्थिते

सुध्य्+उपास्यः **इको यणचि (६-१-७७)** इत्यनेन ईकारस्य यकारः।

सुध्युपास्यः इति रूपम्।

एवं प्रक्रियायां तु स्थानिवद्भावसूत्रं वा तन्निषेधसूत्रं वा न प्रवर्तते।

एतावता **इको यणचि (६-१-७७)** इति सूत्रस्य उदाहरणेषु इक्प्रत्याहारे इकारस्य उदाहरणं दृष्टम्। उकारस्य उदाहरणम्- मधु+अरिः = मध्वरिः। अस्यापि पूर्ववत् रूपचतुष्टयम्। ऋवर्णस्य उदाहरणम्- धातृ+अंशः = धात्रंशः। अस्य एकतकारस्य द्वितकारस्य इति रूपद्वयम्। रेफस्य तु द्वित्वं न भवति। लृवर्णस्य उदाहरणम् - लृ+आकृतिः = लाकृतिः इति एकमेव रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) इको यणचि (६.१.७७) इति सूत्रस्य उदाहरणानि कानि ?

(२) अनचि च (८-४-४७) इति सूत्रेण किमुच्यते ?

(३) अनचि च (८-४-४७) इति सूत्रेण द्वित्वं कदा निषिध्यते ?

(४) स्थानिवत्सूत्रेण किमुच्यते ?

(५) कदा स्थानिवद्भावः निषिध्यते ?

(६) अचः परस्मिन्पूर्वविधौ (१-१-५७) इति सूत्रं किमर्थम् ?

(७) अचः परस्मिन्पूर्वविधौ (१-१-५७) इति सूत्रेण यकारस्य स्थानिवद्भावः प्राप्तो न वा ?

| |
|---|
| (८) न पदान्तद्विर्वचनवरेयलोपस्वरसर्वणानुस्वारदीर्घजश्चर्विधिषु (१-१-५८) इति सूत्रेण किं क्रियते ? |
| (९) न पदान्तद्विर्वचनवरेयलोपस्वरसर्वणानुस्वारदीर्घजश्चर्विधिषु (१-१-५८) इति सूत्रस्य केन अंशेन स्थानिवद्भावनिषेधः कृतः ? |

प्रकरणवशात् द्वित्वविषये निरूपितं यथा-

**(५५) नादिन्याक्रोशे पुत्रस्य (८-४-४८)** सूत्रार्थः - आदिनीशबदे परे आक्रोशे = निन्दायां गम्यमानायां पुत्रशब्दावयवस्य यरः = तकारस्य द्वित्वं न भवति।

उदाहरणम्- पुत्रादिनी त्वमसि पापे। अत्र तकारस्य द्वित्वं न जातम्। तत्त्वकथने = सिद्धान्तकथने द्विर्वचनं भवत्येव। पुत्त्रादिनी सर्पिणी।

**तत्परे च (वा)** वार्त्तिकार्थः - पुत्रशब्दस्य तत्परे = पुत्रशबदे परे द्वित्वं न भवति- इति। उदाहरणम्- पुत्रपुत्रादिनी त्वमसि पापे ।

**वा हतजग्धयोः (वा)** वार्त्तिकार्थः - पुत्रशब्दस्य हतशबदे परे, जग्धशबदे परे विकल्पेन तकारस्य द्वित्वं भवति। उदाहरणम्- पुत्रहती - पुत्त्रहती। पुत्रजग्धी - पुत्त्रजग्धी।

**(५६) त्रिप्रभृतिषु शाकटायनस्य (८-४-५०)** सूत्रार्थः - त्र्यादिषु संयुक्तेषु प्रथमयरः द्वित्वं भवति शाकटायनस्य मते। अन्येषां मते न भवति इत्यर्थः। अतः द्वित्वं विकल्पेन भवति इति ज्ञायते- इति। उदाहरणम्- इन्न्द्रः - इन्द्रः। राष्ष्ट्रम् - राष्ट्रम्।

**(५७) सर्वत्र शाकल्यस्य (८-४-५१)** सूत्रार्थः - इतः प्राक् यत्र यत्र द्वित्वं विहितं तत्र सर्वत्र शाकल्यस्य मते द्वित्वं न भवति- इति। उदाहरणम्- अर्कः। ब्रह्मा। अत्र उभयत्रापि **अचो रहाभ्यां द्वे** (८-४-४६) इत्यनेन ककारस्य मकारस्य च द्वित्वं विहितम्। तदनेन निषिध्यते।

**(५८) दीर्घादाचार्याणाम् (८-४-५२)** सूत्रार्थः - केषाञ्चित् आचार्याणां मते दीर्घात् परस्य यरः द्वित्वं न भवति- इति। उदाहरणम्- दात्रम्। पात्रम्। उभयत्र आकारः दीर्घः। ततः परः तकारः यर् भवति। तस्य द्वित्वम् अनेन निषिध्यते।

**(५९) अचो रहाभ्यां द्वे (८-४-४६)** सूत्रार्थः - अचः परः रेफः हकारो वा भवेत्। तयोः परं विद्यमानस्य यरः द्वित्वं विकल्पेन भवति- इति। उदाहरणम्- हर्य्यनुभवः - हर्यनुभवः। अचः परः रेफः अस्ति। ततः परं विद्यमानस्य यरः = यकारस्य द्वित्वं विकल्पेन भवति। न ह्य्यस्ति - न ह्यस्ति। अचः परः हकारः अस्ति। ततः परं विद्यमानस्य यरः = यकारस्य द्वित्वं विकल्पेन भवति।

**(६०) हलो यमां यमि लोपः (८-४-६४)** सूत्रार्थः - हलः परस्य यमो लोपः वा स्यात् यमि परे- इति। उदाहरणम्- आदित्यः। अत्र आदित्य्य इति स्थिते प्रथमयकारस्य लोपः।

**स्वावलोकनप्रश्नाः -**

(१) आक्रोशशब्दस्य कः अर्थः ?

(२) तत्परे च (वा) इति वार्त्तिकेन द्वित्वं भवति उत न ?

(३) वा हतजग्धयोः (वा) इति वार्त्तिकेन किमुक्तम् ?

(४) त्रिप्रभृतिषु शाकटायनस्य (८-४-५०) इति सूत्रं किं कथयति ?

(५) काभ्यां सूत्राभ्यां द्वित्वं निषिध्यते ?

(६) अचो रहाभ्यां द्वे (८-४-४६) इति सूत्रेण द्वित्वं विकल्पेन भवति उत न ?

(७) हलो यमां यमि लोपः (८-४-६४) इत्यस्य उदाहरणं किम् ?

### ३.२.३ यान्तवान्तादेशसन्धिः -

अस्मिन् सन्धौ यकारः वकारश्च अन्ते आदेशौ भवतः।

**(६१) एचोऽयवायावः (६-१-७८)** अय् च अव् च आय् च आव् च अयवायावः। सूत्रार्थः - एचः क्रमादय् अव् आय् आव् एते ओदेशाः स्युः अचि परे- इति। अर्थात् - एकारस्य अय्, ओकारस्य अव्, ऐकारस्य आय्, औकारस्य आव् इति आदेशाः भवन्ति अचि परे - इति। एषु चतुर्षु आदेशेषु वकारयकारयोः **हलन्त्यम् (१-३-३)** इत्यनेन सूत्रेण इत्सञ्ज्ञा भवति। अतः सन्दर्भवशात् इत्सञ्ज्ञकस्य वर्णस्य लोपविधायकं सूत्रं प्रदर्शितं यथा -

**(६२) तस्य लोपः (१-३-९)** सूत्रार्थः - तस्य = इतः = इत्सञ्ज्ञकवर्णस्य लोपः स्यात्- इति। एवम् अनेन सूत्रेण वकारयकारयोः लोपः भवितुमर्हति। परं तु आदेशस्य अन्ते वकारयकारयोः उच्चारणसामर्थ्यात् यवयोर्लोपो न भवति। एवं च इत्संज्ञापीह न भवति।

**एचोऽयवायावः (६-१-७८)** सूत्रस्य उदाहरणानि - हरये। हरे+ए - रेफोत्तर-एकारस्य अचि परे = एकारे परे अय् आदेशः। हरय्+ए = हरये इति रूपम्।

विष्णवे - विष्णो+ए - णकारोत्तर-ओकारस्य अचि परे = एकारे परे अव् आदेशः। विष्णव्+ए = विष्णवे इति रूपम्।

नायकः - नै+अकः - नकारोत्तर-ऐकारस्य अचि परे = अकारे परे आय् आदेशः। नाय्+अकः=नायकः इति रूपम्।

पावकः - पौ+अकः - पकारोत्तर-औकारस्य अचि परे = अकारे परे आव् आदेशः। पाव्+अकः=पावकः इति रूपम्।

**(६३) वान्तो यि प्रत्यये (६-१-७९)** व् = वकारः अन्ते यस्य सः वान्तः। सूत्रार्थः - यकारादौ प्रत्यये परे ओकार-औकारयोः अव् आव् आदेशौ भवतः- इति।

उदाहरणम्- गव्यम्- **गोपयसोर्यत् (४-३-१६०)** इति सूत्रेण गोशब्दात् यत् प्रत्यये कृते तकारस्य अनुबान्धलोपे गो+य इति स्थिते **वान्तो यि प्रत्यये (६-१-७९)** इत्यनेन सूत्रेण अवादेशे गव्+य=गव्यम् इति रूपम्। गोः विकारः इत्यर्थः।

नाव्यम्- नौशब्दात् **नौवयोधर्मविषमूलसीतातुलाभ्यस्तार्यसमसमितसम्मितेषु (४.४.९१)** इति सूत्रेण यत् प्रत्यये कृते नौ+य इति स्थिते **वान्तो यि प्रत्यये (६-१-७९)** इत्यनेन सूत्रेण अवादेशे नाव्+य=नाव्यम् इति रूपम्। नावा तार्यम् इत्यर्थः।

**गोर्यूतौ छन्दस्युपसङ्ख्यानम् (वा)** वार्त्तिकार्थः - वेदे गोशब्दस्य यूतिशबदे परे अव् आदेशः भवति- इति।

**अध्वपरिमाणे च (वा)** वार्त्तिकार्थः - मार्गपरिमाणार्थे यूतिशबदे परे गोशब्दस्य आवादेशः भवति- इति।

उदाहरणम्- गव्यूतिः। गो+यूतिः, गव्+यूतिः = गव्यूतिः इति रूपम्। उभयोः वार्त्तिकयोः इदम् उदाहरणम्।

**(६४) धातोस्तन्निमित्तस्यैव (६-१-८०)** सूत्रार्थः - यादौ प्रत्यये परे धातोः एचः वान्तादेशः भवति चेत्- तर्हि, यादिप्रत्ययं निमित्तीकृत्य आगतस्य धातोरेचः एव भवति। अन्यस्य धातोरेचः न भवति इति।

उदाहरणम्- ओकारस्य लव्यम्। - लूञ् छेदने धातोः **अचो यत् (३.१.९७)** सूत्रेण यत् प्रत्ययः। यकारस्य अनुबान्धलोपः लू+य इति स्थिते **सार्वधातुकार्धधातुकयोः (७.३.८४)** इति सूत्रेण उकारस्य गुणे लो+य इति भवति। इदानीं **धातोस्तन्निमित्तस्यैव (६-१-८०)** इत्यनेन वान्तादेशः। लव्+य=लव्यम् इति रूपम्।

इदानीं सूत्रार्थेन सह योजयामः - यत् = यादिप्रत्ययः। लूञ् इति धातुः। यादिप्रत्ययं निमित्तीकृत्य 'लू' इत्यस्य अकारस्य गुणः जातः। अतः धातोः तादृशस्य ओकारस्य यादिप्रत्यये परे वान्तादेशः अत्र जातः।

औकारस्य - लाव्यम्। लूञ् छेदने धातोः **ओरावश्यके (३.१.१२५)** सूत्रेण ण्यत् प्रत्ययः। णकारतकारयोः अनुबान्धलोपः। लू+य इति स्थिते **अचो ञ्णिति (७.३.८४)** इति सूत्रेण उकारस्य वृद्धिः लौ+य इति भवति। इदानीं **धातोस्तन्निमित्तस्यैव (६-१-८०)** इत्यनेन वान्तादेशः। लाव्+य=लाव्यम् इति रूपम्। अवश्यं लाव्यम् = अवश्यलाव्यम् इति रूपम्।

इदानीं सूत्रार्थेन सह योजयामः - ण्यत् = यादिप्रत्ययः। लूञ् इति धातुः। यादिप्रत्ययं निमित्तीकृत्य 'लू' इत्यस्य वृद्धिः जातः। अतः धातोः तादृशस्य ओकारस्य यादिप्रत्यये परे वान्तादेशः अत्र जातः।

**(६५) क्षय्यजय्यौ शक्यार्थे (६-१-८१)** यान्तादेशनिपातनार्थमिदम्। क्षेतुं शक्यं क्षय्यम्। जेतु शक्यं जय्यम्।

**(६६) क्रय्यस्तदर्थे (६-१-८२)** तस्मै प्रकृत्यर्थायेदं तदर्थम्। क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं = संस्थापितं क्रय्यम्।

**(६७) लोपः शाकल्यस्य (८-३-१९)** सूत्रार्थः - अवर्णपूर्वयोः (अवर्णः पूर्वः यस्मात् सः अवर्णपूर्वः, तयोः) पदान्तयोः यवयोः वा लोपोऽशि परे- इति। अर्थात् पदान्ते अवर्णात् अनन्तरं यकारो वकारो वा स्यात् तस्य अशि परे लोपः भवति।

उदाहरणम् - हर एहि। हरयेहि। अत्र हरे+एहि इति स्थिते **एचोऽयवायावः (६-१-७८)** इत्यनेन एकारस्य अय् आदेशे हरय्+एहि इति भवति। **लोपः शाकल्यस्य (८-३-१९)** इत्यनेन विकल्पेन यकारलोपः। हर एहि इति रूपम्। विकल्पेन लोपः इति कारणेन। लोपाभावे हरयेहि इति रूपम्।

विष्ण इह। विष्णविह। अत्र विष्णो+इह इति स्थिते **एचोऽयवायावः (६-१-७८)** इत्यनेन अव् आदेशे विष्णव्+इह इति भवति। **लोपः शाकल्यस्य (८-३-१९)** इत्यनेन विकल्पेन वकारलोपः। विष्ण इह इति रूपम्। विकल्पेन लोपः इति कारणेन। लोपाभावे विष्णविह इति रूपम्।

श्रिया उद्यतः । श्रियायुद्यतः। अत्र श्रियै+उद्यतः इति स्थिते **एचोऽयवायावः (६-१-७८)** इत्यनेन आय् आदेशे श्रियाय्+उद्यतः इति भवति। **लोपः शाकल्यस्य (८-३-१९)** इत्यनेन विकल्पेन यकारलोपः। श्रिया उद्यतः इति रूपम्। विकल्पेन लोपः इति कारणेन। लोपाभावे श्रियायुद्यतः इति रूपम्।

गुरा उत्कः। गुरावुत्कः। अत्र गुरौ+उत्कः इति स्थिते **एचोऽयवायावः (६-१-७८)** इत्यनेन आव् आदेशे गुराव्+उत्कः इति भवति। **लोपः शाकल्यस्य (८-३-१९)** इत्यनेन विकल्पेन वकारलोपः। गुरा उत्कः इति रूपम्। विकल्पेन लोपः इति कारणेन। लोपाभावे गुरावुत्कः इति रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) एचोयवायावः (६.१.७८) सूत्रस्य चत्वारि उदाहरणानि कानि ?

(२) वान्तो यि प्रत्यये (६-१-७९) सूत्रस्य उदाहरणे के ?

(३) गव्यूतिः इति पदं केन वार्त्तिकेन छन्दसि साधितम् ?

(४) गव्यूतिः इति पदं केन वार्त्तिकेन लोके साधितम् ?

(५) **धातोस्तन्निमित्तस्यैव (६-१-८०)** सूत्रस्य उदाहरणद्वयं किम् ?

(६) क्षय्यम्, जय्यम् इति द्वे पदे कस्मिन् अर्थे भवतः ?

(७) **क्रय्यस्तदर्थे (६-१-८२)** इति सूत्रे क्रय्यमित्युक्ते किम् ?

एतावत्पर्यन्तम् अच्सन्धिप्रकरणे उभयोः वर्णयोः स्थाने एकस्यैव वर्णस्य = पूर्ववर्णस्य कार्यं दृष्टम्। इदानीम् उभयोः = पूर्वपरयोः वर्णयोः स्थाने एकवर्णादेशरूपः एकादेशसन्धिः निरूप्यते।

## ३.३.० एकादेशसन्धिः -

**(६८) एकः पूर्वपरयोः (६-१-८४)** अधिकारसूत्रमिदम्। एकः पूर्वपरयोः इत्यधिकृत्य।

### ३.३.१ गुणसन्धिः -

**(६९) आद् गुणः (६-१-८७)** सूत्रार्थः - अवर्णादचि परे पूर्वपरयोः एको गुणः आदेशः स्यात्संहितायाम्- इति।

उदाहरणम्- उपेन्द्रः- उप+इन्द्रः = उपेन्द्रः। अकार-इकारयोः स्थाने एकः गुणः आदेशः जातः। उत्पत्तिस्थानसाम्यात् एकारः भवति। रमा+ईशः = रमेशः, गङ्गा+उदकम् = गङ्गोदकम्। सर्वत्र तत्तत्स्थानसाम्यात् गुणवर्णः भवति।

**(७०) उरण् रपरः (१-१-५१)** सूत्रार्थः - ऋ इति त्रिंशतः संज्ञा भवति इत्युक्तं प्राक्। ऋवर्णस्य स्थाने योऽण् भवति स अण् रपरः सन्नेव प्रवर्तते। रः परः यस्मात् सः रपरः। अत्र 'र' इति प्रत्याहारः इति हेतोः आन्तरतम्यात् ऋवर्णस्य रपरः, लृवर्णस्य लपरः भवति।

उदाहरणम्- कृष्णर्द्धिः। कृष्ण+ऋद्धिः, कृष्ण्+अर्+द्धिः = कृष्णर्द्धिः। तवल्कारः। तव+लृकारः, तव्+अल्+कारः = तवल्कारः।

**(७१) झरो झरि सवर्णे (८-४-६५)** सूत्रार्थः - हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि परे- इति।

### ३.३.२ कृष्णर्द्धिशब्दस्य रूपत्रयम् -

(१) एकधकारस्य रूपम्- कृष्णर्धिः। कृष्ण + ऋद्धिः इत्यत्र द्वित्वे अकृते अनेन सूत्रेण प्रथमधकारस्य लोपे एकधकारस्य रूपं कृष्णर्धिः इति।

(२) द्विधकारस्य रूपम्- कृष्णर्द्धिः। कृष्ण + ऋध्धिः इत्यत्र द्वित्वं न क्रियते, विद्यमानस्य लोपोऽपि न क्रियते। द्विधकारस्य रूपं कृष्णर्द्धिः इति।

(३) त्रिधकारस्य रूपम्- कृष्णर्द्द्धिः। कृष्ण + ऋद्धिः इत्यत्र **अचो रहाभ्यां द्वे (८.४.४६)** इत्यनेन पक्षे द्वित्वे कृते लोपे अकृते त्रिधकारस्य रूपं कृष्णर्द्द्धिः इति।

अत्र द्वितीये तृतीये च रूपे **झलां जश् झशि (८-४-५३)** इत्यनेन धकारस्य दकारः।

### ३.३.३ तवल्कारशब्दस्य रूपचतुष्टयम् -

तवल्कारः इत्यत्र **यणो मयो द्वे वाच्ये (वा)** इति वार्तिकस्य यण इति पञ्चमी मय इति षष्ठी इति पक्षे ल् इति यण् भवति। क इति मय् भवति। अतः ककारस्य द्वित्वम्। लकारस्य तु **अनचि च (८-४-४७)** इति सूत्रेण द्वित्वम्। अतः तवल्कारः इत्यत्र रूपचतुष्टयम्। अस्य रूपचतुष्टयस्य सिद्धिः श्लोकेन निरूपितः यथा -

द्वित्वं लस्यैव कस्यैव नोभयोरुभयोरपि ।
तवल्कारादिषु बुधैर्बोध्यं रूपचतुष्टयम् ।।

(१) एकलम्, एककम् - तवल्कारः।
(२) एकलम्, द्विकम् - तवल्क्कारः।
(३) द्विलम्, एककम् - तवल्ल्कारः।
(४) द्विलम्, द्विकम् - तवल्ल्क्कारः। इति

**स्वावलोकनप्रश्नाः -**

(१) एकः पूर्वपरयोः (६-१-८४) इति कीदृशं सूत्रम् ?

(२) गुणसन्धिविधायकं सूत्रं किम् ?

(३) ऋस्थाने यः अण् भवति सः कथं भवति ?

(४) झरो झरि सवर्णे (८-४-६५) इति सूत्रं किं विधीयते ?

(५) कृष्णर्धिः इत्यस्य कानि रूपाणि भवन्ति ?

(६) तवल्कारः इत्यस्य कानि रूपाणि भवन्ति ?

## ३.३.४ वृद्धिसन्धिः -

**(७२) वृद्धिरेचि (६-१-८८)** सूत्रार्थः - अवर्णात् एचि परे पूर्वपरयोः वृद्धिरेकादेशः स्यात्- इति।

उदाहरणम् - कृष्णैकत्वम् - कृष्ण+एकत्वम् = कृष्णैकत्वम्। अकार-एकारयोः स्थाने एकः वृद्धिवर्णः ऐकारः आगतः।

गङ्गौघः - गङ्गा+ओघः = गङ्गौघः। आकार-ओकारयोः स्थाने एकः वृद्धिवर्णः औकारः आगतः।

देवैश्वर्यम् - देव+ऐश्वर्यम् = देवैश्वर्यम्। अकार-ऐकारयोः स्थाने एकः वृद्धिवर्णः ऐकारः आगतः।

कृष्णौत्कण्ठ्यम् - कृष्ण+औत्कण्ठ्यम्। अकार-औकारयोः स्थाने एकः वृद्धिवर्णः औकारः आगतः।

**(७३) एत्येधत्यूठ्सु (६-१-८९)** इण् गतौ इति, एध वृद्धौ इति च धातू। सूत्रार्थः - अवर्णात् एजाद्योः एत्येधत्योः ऊठि च परे वृद्धिरेकादेशः स्यात्- इति। एजाद्योः इति तु एत्येधत्योः विशेषणम्।

पररूपगुणापवादः - अवर्णात् एति परे एधति परे च **एङि पररूपम् (६-१-९४)** इत्यनेन

पररूपं प्राप्तम्। अवर्णात् ऊठि परे **आद् गुणः (६-१-८७)** इत्यनेन गुणः प्राप्तः। अतः पररूपगुणयोः अपवादत्वेन इदं सूत्रमारबधम्। अतः अत्र वृद्धिः भवति।

उदाहरणानि- उपैति- उप+एति = उपैति। उपैधते - उप+एधते = उपैधते। प्रष्ठौहः - प्रष्ठ+ऊहः = प्रष्ठौहः। एषु उदाहरणेषु उभयोः वर्णयोः स्थाने एकः वृद्धिवर्णः आगतः।

**स्वावलोकनप्रश्नाः -**

(१) गङ्गौघः इत्यत्र वृद्धिविधायकं सूत्रं किम् ?

(२) एजाद्योः इति कस्य विशेषणम् ?

(३) एत्येधत्यूठ्सु (६-१-८९) इति सूत्रं कयोः सूत्रयोः अपवादसूत्रं भवति ?

**अक्षादूहिन्यामुपसङ्ख्यानम् (वा)** वार्त्तिकार्थः - अक्षशब्दात् ऊहिनीशबदे परे वृद्धिः एकादेशः भवति- इति। उदाहरणम् - अक्ष+ऊहिनी = अक्षौहिणी सेना।

**स्वादीरेरिणोः (वा)** वार्त्तिकार्थः - स्वशब्दात् ईरशबदे परे ईरिन्शबदे च परे वृद्धिः एकादेशः भवति- इति। उदाहरणम्- स्व+ईरः = स्वैरः। स्वेन छन्देन ईरितुं = सञ्चरितुं शीलमस्य इत्यर्थे स्व+ईरी = स्वैरी। स्त्रीलिङ्गे स्वैरिणी इति रूपम्।

**प्रादूहोढोढ्येषैष्येषु (वा)** वार्त्तिकार्थः - प्र इत्युपसर्गात् ऊह, ऊढ, ऊढि, एष, एष्य एतेषु परेषु वृद्धिरेकादेशः स्यात्- इति।

उदाहरणानि - प्र+ऊहः = प्रौहः। प्र+ऊढः = प्रौढः। प्र+ऊढिः = प्रौढिः। इष इच्छायां तुदादिः । इष गतौ दिवादिः । इष आभीक्ष्ण्ये क्र्यादिः । एषां घञि ण्यति च एषः एष्यः इति रूपे । तत्र **एङि पररूपम् (६-१-९४)** इत्यनेन पररूपे प्राप्तेऽनेन वार्त्तिकेन वृद्धिः। प्र+एषः = प्रैषः। प्र+एष्यः = प्रैष्यः।

### ३.३.५ प्रोढवान् इत्यत्र वृद्धिः न -

**(प) अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्** इति काचित् परिभाषा वर्तते। तेन ऊढः इति क्तप्रत्ययान्तशब्दः एव गृह्यते न तु ऊढवान् इति क्तवतुप्रत्ययान्तस्य एकदेशः। अतः अत्र वृद्धिः न भवति। प्र+ऊढवान् = प्रोढवान् इत्येव रूपम्। एवञ्च अत्र **आद् गुणः (६-१-८७)** इति सूत्रेण गुणः एव भवति।

**ऋते च तृतीयासमासे (वा)** वार्त्तिकार्थः - तृतीयासमासे अकारात् ऋतशबदे परे वृद्धिरेकादेशः स्यात्- इति।

सुखेन ऋतः सुखार्तः। तृतीया समासात् अन्यत्र न भवति। परमश्चासौ ऋतश्च परमर्तः। अत्र गुणः एव भवति।

**प्रवत्सतरकम्बालवसनार्णदशानामृणे (वा)** वार्त्तिकार्थः - प्र, वत्सतर, कम्बाल, वसन, ऋण, दश एतेषाम् ऋणशबदे परे वृद्धिरेकादेशः स्यात् - इति।

उदाहरणानि - प्र+ऋणम् = प्रार्णम्। वत्सतर+ऋणम् = वत्सतरार्णम्। कम्बाल+ऋणम् = कम्बालार्णम्। वसन+ऋणम् = वसनार्णम्। ऋणस्यापनयनाय यदन्यदृणं क्रियते तत् ऋण+ऋणम् = ऋणार्णम् । दश+ऋणः = दशार्णः देशः। दश+ऋणा = दशार्णा नदी।

**स्वावलोकनप्रश्नाः -**

(१) अक्ष+ऊहिनी = ——————————

(२) स्व+ईरी = ——————————

(३) प्र+ऊढवान् = ——————————

(४) प्र+एष्य = ——————————

(५) परम+ऋत = ——————————

(६) ऋणार्णमित्यस्य कः अर्थः ?

(७) दशार्णा इत्यस्य कः अर्थः ?

**(७४) उपसर्गादृति धातौ (६-१-९१)** सूत्रार्थः - अवर्णान्तात् उपसर्गात् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात्- इति।

उदाहरणम् - उपार्च्छति। उप+ऋच्छति = उपार्च्छति। प्रार्च्छति। प्र+ऋच्छति = प्रार्च्छति। अत्र उप+ऋच्छति इति स्थिते अकार-ऋकारयोः स्थाने वृद्धौ आकरः। स च **उरण् रपरः (१-१-५१)** इत्यनेन रपरः = आर् इति भवति। उपार् च्छति इत्यवस्थायां रेफस्य विसर्गो भवतु इति शङ्का प्रदर्श्यते -

**(७५) अन्तादिवच्च (६-१-८५)** सूत्रार्थः - योऽयमेकादेशः सः पूर्वस्य अन्तवत् भवति परस्य आदिवत् भवति- इति। तथा च - उपार्च्छति इत्यत्र आर् इति एकादेशः आगतः। सः पूर्वस्य अन्तवद्भवति। अतः रेफस्य स्थाने **खरवसानयोर्विसर्जनीयः (८-३-१५)** इति सूत्रेण विसर्गो भवतु सूत्रम् उपस्थापितं यथा-

**(७६) खरवसानयोर्विसर्जनीयः (८-३-१५)** सूत्रार्थः - खरि अवसाने च परे पदान्ते विद्यमानस्य रेफस्य विसर्जनीयः स्यात्- इति। अतः विसर्गो भवतु इति शङ्का।

समाधानम्- अन्तवद्भावेन पदान्तरेफस्य विसर्गः न भवति। तत्र सूत्रकारस्य सूत्रमेव प्रमाणम्। तथा हि- **उभयथर्क्षु (८.३.८)** इति सूत्रे ऋक्षुशबदे परे अर् इति एकादेशानन्तरम् उभयथर्क्षु इत्येव निर्देशः कृतः सूत्रकारेण। न तु पूर्वान्तवद्भावेन रेफस्य विसर्गः कृतः। एवमेव **कर्तरि चर्षिदेवतयोः ( ३.२.१८६)** इति सूत्रे ऋषिशबदे परे अर् इति एकादेशानन्तरं चर्षिदेवतयोः इत्येव निर्देशः कृतः। न तु पूर्वान्तवद्भावेन रेफस्य विसर्गः कृतः। अतः सूत्रकारस्य एतादृशनिर्देशः एव प्रमाणं भवति - रेफस्य अन्तवद्भावेन विसर्गः न भवति- इति।

**(७७) वा सुप्यापिशलेः (६-१-९२)** सूत्रार्थः - अवर्णान्तात् उपसर्गात् ऋकारादौ सुबधातौ परे वृद्धिर्वा स्यात्- इति। आपिशलिग्रहणं पूजार्थम्।

उदाहरणम् - ऋषभः इति सुबान्तात् ऋषभम् आत्मनः इच्छति इत्यर्थे ऋषभीयति इति भवति। सः सुबान्तप्रकृतिकधातुः। प्र+ऋषभीयति = प्रार्षभीयति। वृद्ध्यभावे गुणे प्रर्षभीयति। सावर्ण्यात् ऌवर्णस्य ग्रहणम्।
ऌकारम् आत्मनः इच्छति ऌकारीयति। प्र+ऌकारीयति = प्राल्कारीयति। वृद्ध्यभावे गुणे प्रल्कारीयति।

| **स्वावलोकनप्रश्नौ -** |
|---|
| (१) उपार्च्छति इत्यत्र रेफस्य विसर्गः भवति उत न ? |
| (२) ऋषभीयति इत्यस्य अर्थः कः ? |

## ३.४.० पररूपसन्धिः -

### ३.४.१ पररूपसन्धिः - नित्यम् -

**(७८) एङि पररूपम् (६-१-९४)** सूत्रार्थः - अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पररूपमेकादेशः स्यात्- इति।

उदाहरणम् - प्र+एजते = प्रेजते। उप+ओषति = उपोषति। अ+ए इत्यनयोः एकारः, अ+ओ इत्यनयोः ओकारः आगतः। द्वौवपि वर्णौ परं विद्यमानौ।

### ३.४.२ पररूपसन्धिः - विकल्पः -

**एङि पररूपम् (६-१-९४)** सूत्रे पुनः वा, सुपि इत्यनुवर्त्त्य वाक्यभेदेन व्याख्येयम्। तदा धातौ इत्यस्य स्थाने सुबधातौ इति भवति। अवर्णान्तात् उपसर्गात् एङादौ सुबधातौ परे पररूपमेकादेशः भवति विकल्पेन।

उदाहरणम् - उप+एडकीयति = उपेडकीयति। पक्षे वृद्धौ उपैडकीयति। प्र+ओघीयति = प्रोघीयति। पक्षे वृद्धौ प्रौघीयति।

**एवे चानियोगे (वा)** वार्त्तिकार्थः - अनियोगे = नियोगभिन्ने अर्थे विद्यमानस्य एवशब्दस्य पररूपं भवति। नियोगः = अवधारणम्।

उदाहरणम् - क्व+एव = क्वेव भोक्ष्यसे। अत्र एवशब्दः अनवधारणे वर्तते। क्वेव भोक्ष्यसे इत्युक्ते अत्र इति नैव निश्चिनुमः इत्यर्थः। नियोगे = अवधारणे तु वृद्धिः भवत्येव। तव+एव = तवैव।

पुनः प्रकरणवशात् सञ्ज्ञासूत्रमारबधम्।

**(७९) अचोऽन्त्यादि टि (१-१-६४) अन्त्यः आदिः यस्य तत् अन्त्यादि।** सूत्रार्थः - अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसञ्ज्ञं स्यात्- इति। इमां सञ्ज्ञामुपयुज्य पररूपं विहितं यथा -
**शकन्ध्वादिषु पररूपं वाच्यम् (वा)** तच्च टेः। वार्त्तिकार्थः - शकन्धुगणपठितानां शब्दानां टिभागस्य पररूपं भवति इत्यर्थः।

उदाहरणानि - शक+अन्धुः = शकन्धुः। ककारोत्तरः अकारः टिभागः भवति। तस्य तथा अन्धुशब्दस्य अकारस्य च मध्ये पररूपमेकादेशः जातः। एवं कर्कन्धुः, कुलटा इत्यादि।

**(ग) सीमन्तः केशवेशे -** केशानां सन्निवेशविशेषे गम्यमाने सीमन्शब्दस्य टिभागः = मकारोत्तर-अन्, तस्य तथा अन्तशब्दस्य अकारः इत्यनयोः पररूपमेकादेशः स्यात्। सीमन्+अन्तः = सीमन्तः।

मनस्+ईषा = मनीषा। अत्र अस् इति टिभागः। तस्य पुनः ईकारस्य च पररूपमेकादेशः जातः। हल+ईषा = हलीषा। लाङ्गल+ईषा = लाङ्गलीषा। पतन्+अञ्जलिः = पतञ्जलिः। अत्र अन् इति टिभागः।

**सारङ्गः पशुपक्षिणोः -** पशुः अथवा पक्षी इत्यर्थे सारशब्दस्य टिभागः = रेफोत्तर-अकारः, तस्य तथा अङ्गशब्दस्य अकारः इत्यनयोः पररूपमेकादेशः स्यात्। सार+अङ्गः = सारङ्गः। आकृतिगणोऽयम्। मार्तण्डः - मृत+अण्डः = मृतण्डः। अण्प्रत्यये कृते आदिवृद्धिः मार्तण्डः।

| **स्वावलोकनप्रश्नाः -** |
|---|
| (१) **एङि पररूपम् (६-१-९४)** इत्यनेन कः सन्धिः विधीयते ? |
| (२) एवे चानियोगे इत्यत्र एवशब्दस्य कः अर्थः ? |
| (३) टिसञ्ज्ञाविधायकं सूत्रं किम् ? |
| (४) शकन्धुगणीयशब्दानां कः सन्धिः भवति ? |

## ३.४.३ पररूपसन्धिः - विकल्पः -

**ओत्वोष्ठयोः समासे वा (वा)** वार्त्तिकार्थः - ओतुशबदे ओष्ठशबदे च परे समासे विकल्पेन पररूपं भवति।

उदाहरणम् - स्थूल+ओतुः - स्थूलोतुः, स्थूलौतुः। ओतुः = मार्जालः। बिम्बा+ओष्ठः = बिम्बोष्ठः, बिम्बौष्ठः।

समासात् अन्यत्र वृद्धिरेव भवति। उदाहरणम् - तव+ओष्ठः = तवौष्ठः।

## ३.४.४ पररूपसन्धिः - नित्यम् -

**(८०) ओमाङोश्च (६-१-९५)** ओम् च आङ् च औमाङौ। तयोः ओमाङोः इति विग्रहः। सूत्रार्थः - अवर्णान्तात् ओम्शबदे परे आङ्शबदे च परे पररूपमेकादेशः स्यात्- इति।

उदाहरणम् - शिवाय+ओं नमः = शिवायों नमः। आ+इहि = एहि। एहि इत्यत्र आङ् अस्ति। शिव+एहि = शिवेहि।

**(८१) अव्यक्तानुकरणस्यात इतौ (६-१-९८)** सूत्रार्थः - अव्यक्तः = अस्फुटवर्णविभागः, ध्वनिः = वृक्षादिपतनध्वनिः। तस्य अनुकरणम् = अव्यक्तानुकरणम्। तादृश-अनुकरणस्य यः "अत्"इति शब्दः ततः इतिशबदे परे पररूपमेकादेशः भवति - इति।

उदाहरणम् - पटत्+इति = पटिति। अत्र पटत् इत्यत्र अन्ते "अत्" इत्यस्ति, तस्य तथा इतिशब्दस्य इकारस्य च पररूपं भवति।

**एकाचो न (वा)**। एकः अच् यस्य सः एकाच्। वार्त्तिकार्थः - अव्यक्तानुकरणे अत् इत्यस्य इतिशबदे परे पररूपं भवति इति यदुक्तं तत् एकाचः न भवति- इति। अर्थात् यत्र एकाचि ‘‘अत्’’ इत्यस्ति तस्य इतिशबदे परे पररूपं न भवति।

उदाहरणम् - श्रत्+इति = श्रदिति । अत्र श्रत् इति एकाच्। अतः अत्र पररूपं न भवति।

**(८२) नाम्रेडितस्यान्त्यस्य तु वा (६-१-९९)** आम्रेडितं किमिति अनुपदमेव उच्यते। सूत्रार्थः - आम्रेडितस्य अत्शब्दस्य पररूपं न स्यात् इति परे। अन्त्यस्य तु तकारमात्रस्य वा पररूपं स्यात्। आम्रेडितं किमिति कथयति -

**(८३) तस्य परमाम्रेडितम् (८-१-२)** सूत्रार्थः - द्विरुक्तस्य परं रूपमाम्रेडितसञ्ज्ञं स्यात्- इति। पटत् पटत् इत्यत्र द्वितीयस्य पटत् इत्यस्य आम्रेडितसञ्ज्ञा भवति। पटत् पटत्+इति इति स्थिते **नाम्रेडितस्यान्त्यस्य तु वा (६-१-९९)** इत्यनेन द्वितीयपटत्शब्दस्य तकारस्य तथा इकारस्य च पररूपम्। पटत्पट+इति। ततः **आद् गुणः (६-१-८७)** इति गुणः। पटत्पटेति - इति रूपम्। पररूपस्य वैकल्पिकत्वात् पररूपाभावे पटत् पटत् + इति इति स्थिते द्वीतीयपटत्शब्दस्य तकारस्य दकारं कथयति-

**(८४) झलां जशोऽन्ते (८-२-३९)** सूत्रार्थः - पदान्ते झलां जशः स्युः- इति। एवं द्वितीयपटत्शब्दस्य तकारस्य दकारे पटत्पटदिति- इति रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) समासे कयोः शब्दयोः परयोः विकल्पेन पररूपं भवति ?

(२) ओमाङोश्च (६-१-९५) इत्यनेन किं विधीयते ?

(३) एकाचः अव्यक्तानुकरणस्य पररूपं भवति उत न ?

(४) आम्रेडितस्य कस्य वर्णस्य पररूपं भवति ?

(५) आम्रेडितसञ्ज्ञा कस्य भवति ?

## ३.५.० सवर्णदीर्घसन्धिः -

**बोधप्रश्नः -**

(१) सवर्णदीर्घसन्धिविषये किं जानन्ति भवन्तः ?

(२) सवर्णदीर्घसन्धिः कदा भवति ?

व्याकरणे तस्य सूत्रमस्ति -

### ३.५.१ सवर्णदीर्घसन्धिः - नित्यम् -

**(८५) अकः सवर्णे दीर्घः (६-१-१०१)** सूत्रार्थः - अक्वर्णस्य सवर्णे अचि परे पूर्वपरयोः दीर्घ एकादेशः स्यात्- इति।

उदाहरणम् - दैत्य+अरिः = दैत्यारिः। अत्र यकारोत्तर-अकारः अक्। अरिः इत्यत्र अकारः सवर्णः अच्। उभयोः स्थाने तस्यैव दीर्घवर्णः आकारः एकादेशो भवति। एवमेव श्री+ईशः = श्रीशः। विष्णु+उदयः = विष्णूदयः।

### ३.५.२ सवर्णदीर्घसन्धिः - पक्षे -

**ऋति सवर्णे ऋ वा (वा)** वार्त्तिकार्थः - ऋवर्णस्य ऋवर्णे परे विकल्पेन ऋवर्णः एकादेशः भवति।

उदाहरणम् - होतृ+ऋकारः = होतृकारः। ऋवर्णस्य वैकल्पिकत्वात् ऋवर्णाभावे **अकः सवर्णे दीर्घः (६-१-१०१)** इत्यनेन दीर्घः होतॄकारः इति रूपम्।

**लृति सवर्णे लृ वा (वा)**। वार्त्तिकार्थः - लृवर्णस्य लृवर्णे परे विकल्पेन लृवर्णः एकादेशः भवति।

उदाहरणम् - होतृ+लृकारः = होत्लृकारः। लृवर्णस्य वैकल्पिकत्वात् लृवर्णाभावे, लृवर्णस्य दीर्घाभावात् च पक्षे **अकः सवर्णे दीर्घः (६-१-१०१)** इत्यनेन दीर्घः होतॄकारः इति रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) सवर्णदीर्घसन्धिविधायकं सूत्रं किम् ?

(२) ऋति सवर्णे ऋ वा (वा) इत्यनेन किं विधीयते ?

(३) लृति सवर्णे लृ वा (वा) इत्यनेन किं विधीयते ?

## ३.६ पूर्वरूपसन्धिः -

**बोधप्रश्नः -**

(१) पररूपमित्युक्ते ज्ञातमस्ति। पूर्वरूपमित्युक्ते किं स्यात् ?

**(८६) एङः पदान्तादति (६-१-१०९)** सूत्रार्थः - पदान्तात् एङः अति परे पूर्वरूपमेकादेशः स्यात्- इति।

उदाहरणम्- हरे+अव = हरेऽव। अत्र पदान्ते विद्यमानः एकारः एङ् भवति। तस्य अकारपरकत्वमस्ति। तदा पूर्वरूपम् एकारः एकादेशो भवति। एवमेव विष्णो+अव = विष्णोऽव।

**(८७) सर्वत्र विभाषा गोः (६-१-१२२)** सूत्रार्थः - सर्वत्र = लोके वेदे च एङन्तस्य गोशब्दस्य अति परे प्रकृतिभावः वा स्यात्पदान्ते- इति। प्रकृतिभावः = स्वभावेन संस्थानम्।

उदाहरणम् - गो+अग्रम् = गो अग्रम्। प्रकृतिभावाभावे **एङः पदान्तादति (६-१-१०९)** इत्यनेन पूर्वरूपं गोऽग्रम् इति रूपम्।

**सर्वत्र विभाषा गोः (६-१-१२२) इति सूत्रेण विकल्पेन** प्रकृतिभावः उच्यते। न तु पूर्वरूपम्। प्रकृतिभावाभावे **एङः पदान्तादति (६-१-१०९)** इत्यनेन पूर्वरूपं भवति। प्रकृतिभावाभावे पूर्वरूपं भवति इति हेतोः अत्र इदं सूत्रम् उपन्यस्तम्।

इदानीं प्रकरणवशात् अवङ् आदेशः उच्यते -

**(८८) अवङ् स्फोटायनस्य (६-१-१२३)** सूत्रार्थः - अचि परे पदान्ते गोः अवङ् स्यात् स्फोटायनस्य मते। अन्येषां मते तु न भवति। अतः अवङ् विकल्पेन भवति - इति।

उदाहरणम् - गोशब्दस्य ओकारस्य अवङ्-आदेशे कृते गव+अग्रम् इति स्थिते **अकः सवर्णे दीर्घः (६-१-१०१)** इत्यनेन सवर्णदीर्घः, गवाग्रम् इति रूपम्।

**(८९) इन्द्रे च (६-१-१२४)** सूत्रार्थः - गोशब्दस्य इन्द्रशबदे परे गोशब्दस्य ओकारस्य अवङ् आदेशः भवति- इति।

उदाहरणम् - गो+इन्द्रः इति स्थिते अवङ्-आदेशे कृते गव+इन्द्रः इति भवति। तदा **आद्गुणः (६.१.८७)** इत्यनेन गुणः गवेन्द्रः इति रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) एङः पदान्तादति (६-१-१०९) इति सूत्रेण किं विधीयते ?

(२) सर्वत्र विभाषा गोः (६-१-१२२) इत्यनेन प्रकृतिभावः विधीयते उत पूर्वरूपम् ?

(३) गोशब्दस्य विकल्पेन अवङ् आदेशः कस्य मते भवति ?

(४) इन्द्रे च (६-१-१२४) इति सूत्रं किं कथयति ?

## ३.७.० सन्धिसारः -

कुत्र कः सन्धिः भवति इति ज्ञानार्थं सरलतया सन्धिः अत्र निरूप्यते।

### ३.७.१ यण्सन्धिः -

**यण्सन्धिविधायकसूत्रम्-**

(१) इको यणचि (६-१-७७)

**यण्स्थानम् -**

इ ई उ ऊ ऋ ॠ ऌ इत्येतेभ्यो असवर्णे अचि परे इ ई इत्यनयोः स्थाने यकारः उ ऊ इत्यनयोः स्थाने वकारः ऋ ॠ इत्यनयोः स्थाने रेफः लकारस्य स्थाने लकारश्च आदेशो भवति। इ ई इत्यनयोः इ ई इत्येतौ सवर्णौ भवतः। अन्ये असवर्णाः भवन्ति। एवमन्येषामपि ज्ञातव्यम्।

इ, ई + असवर्णस्वरः = य्

उ, उ + असवर्णस्वरः = व्

ऋ, ॠ + असवर्णस्वरः = र्

लृ + असवर्णस्वरः = ल्

उदाहरणानि - इति + अपि, इत्+य्+अपि = इत्यपि। इकारस्य स्थाने यकारादेशः।

नदी + अत्र, नद्+य्+अत्र = नद्यत्र। ईकारस्य स्थाने यकारादेशः।

मधु + अरिः, मध्+व्+अरिः = मध्वरिः। उकारस्य स्थाने वकारादेशः।

वधू + आगमनम्, वध्+व+आगमनम् = वध्वागमनम्। ऊकारस्य स्थाने वकारादेशः।

पितृ + इच्छा, पित्+र्+इच्छा = पित्रिच्छा। ऋकारस्य स्थाने रेफादेशः।

घस्लृ + आदेशः, घस्+ल्+आदेशः = घस्लादेशः। लृकारस्य स्थाने लकारादेशः।

### ३.७.२ यान्तवान्तादेशसन्धिः -

**यान्तवान्तादेशसन्धिविधायकसूत्राणि-**

(१) एचोऽयवायावः (६.१.७८)

(२) वान्तो यि प्रत्यये (६-१-७९) अनेन सूत्रेण केवलं वान्तादेशः उच्यते।

(३) धातोस्तन्निमित्तस्यैव (६-१-८०) अनेनापि सूत्रेण केवलं वान्तादेशः उच्यते।

(४) क्षय्यजय्यौ शक्यार्थे (६-१-८१) यान्तादेशनिपातनसूत्रमिदम्।

(५) क्रय्यस्तदर्थे (६-१-८२) यान्तादेशनिपातनसूत्रमिदम्।

**वार्तिके-**

(१) गोर्यूतौ छन्दस्युपसङ्ख्यानम् (वा) अनेन केवलम् अवादेशः उच्यते।

(२) अध्वपरिमाणे च (वा) अनेनापि केवलं अवादेशः उच्यते।

**यान्तवान्तादेशस्थानानि -**

(१) ए ऐ इत्येताभ्यां वर्णाभ्यम् अज्वर्णे परे एकारस्य स्थाने अय्, ऐकारस्य स्थाने आय् च आदेशो भवति।

(२) ओ औ इत्येताभ्यां वर्णाभ्याम् अज्वर्णे परे तथा यकारादौ प्रत्यये च परे ओकारस्य स्थाने अव् औकारस्य स्थाने आव् च आदेशो भवति।

(३) गोशब्दस्य ओकारस्य यूतिशबदेपरे अवादेशः भवति वेदे। गव्यूतिः इति रूपम्।

(४) लोके तावत् मार्गपरिमाणार्थे एव भवति। गव्यूतिः इत्येव रूपम्।

(५) धातूनां वान्तादेशविषये यान्तवान्तादेशसन्धौ **धातोस्तन्निमित्तस्यैव (६-१-८०)** इति सूत्रं पश्यन्तु।

(६) पदान्तात् एकारात् ओकारात् ह्रस्व-अवर्णे परे अय् आय् आदेशौ न भवतः। तत्र पररूपं भवति।

(७) पदन्ते विद्यमानानाम् ए ऐ ओ औ इत्येतेषां स्थाने अय् आय् अव् आव् आदेशानन्तरं **लोपः शाकल्यस्य (८-३-१९)** इति सूत्रेण विकल्पेन वकारस्य यकारस्य च लोपः भवति इति हेतोः रूपद्वयं भवति।

ए+ स्वरः = अय्

ऐ+ स्वरः = आय्

ओ+स्वरः = अव्

औ+स्वरः = आव्

उदाहरणानि - हरे + एहि, हर्+अय्+एहि = यलोपे हर एहि, यलोपाभावे हरयेहि इति रूपम्।

श्रियै + उद्यतः, श्रिय्+आय्+उद्यतः = यलोपे श्रिया उद्यतः, यलोपाभावे श्रियायुद्यतः इति रूपम्।

विष्णो + इह, विष्ण्+अव्+इह = वलोपे विष्ण इह, वलोपाभावे विष्णविह इति रूपम्।

बाालकौ + आगतौ, बाालक्+आव्+आगतौ = वलोपे बाालका आगतौ, वलोपाभावे बाालकावागतौ इति रूपम्।

**इदमत्रावधेयम्** - यकारवकारलोपानन्तरं यद्रूपं तत्र पुनः सन्धिः न भवति। यतो हि - यकारवकारयोः लोपविधायकं **लोपः शाकल्यस्य (८-३-१९)** इति सूत्रं त्रिपाद्याम् अस्ति। तत्र उदाहरणानुसारं वृद्धिरेचि (६.१.८८) इति सूत्रेण वृद्धिः अथ वा अदेङ्गुणः (६.१.८७) इत्यनेन गुणो वा अकः सवर्णे दीर्घः (६.१.१०१) इत्यनेन सवर्णदीर्घः वा भवेत्। परम् एतानि सूत्राणि षष्ठाध्याये सन्ति। अतः यलोपस्य अथ वा वलोपस्य असिद्धत्वात् पुनः सन्धिः न भवति।

### ३.७.३ गुणसन्धिः -

**गुणसन्धिविधायकसूत्रम् -**

(१) आद्गुणः (६.१.८७)

**गुणस्थानम् -**

अ आ इत्येताभ्यां वर्णाभ्याम् इ ई इत्येतयोः परयोः एकारः, उ उ इत्येतयोः परयोः ओकारः, ऋ ॠ इत्येतयोः परयोः अर्, लृकारे परे अल् च पूर्वपरयोः स्थाने एकादेशः भवति।

अ, आ + इ, ई = ए

अ, आ + उ, ऊ = ओ

अ, आ + ऋ, ॠ = अर्

अ, आ + लृ = अल्

उदाहरणानि -

गण+ईशः, गण्+ए+शः = गणेशः। अत्र पूर्वपरयोः अकार+ईकारयोः स्थाने एकारादेशः।

महा+इन्द्र, मह्+ए+न्द्रः = महेन्द्रः। अत्र पूर्वपरयोः आकार+इकारयोः स्थाने एकारादेशः।

सूर्य+उदयः सूर्य्+ओ+दयः = सूर्योदयः। अत्र पूर्वपरयोः अकार+उकारयोः स्थाने ओकारादेशः।

महा+ऊर्मिः मह्+ओ+र्मिः = महोर्मिः। अत्र पूर्व+परयोः आकार+ऊकारयोः स्थाने ओकारादेशः।

देव+ऋषिः देव्+अर्+षिः = देवर्षिः। अत्र पूर्वपरयोः अकार+ऋकारयोः स्थाने अर्-आदेशः।

महा+ऋषिः मह्+अर्+षिः = महर्षिः। अत्र पूर्वपरयोः आकार+ऋकारयोः स्थाने अर्-आदेशः।

तव+लृकारः तव्+अल्+कारः = तवल्कारः। अत्र पूर्वपरयोः अकार+लृकारयोः स्थाने अल्-आदेशः।

महा+लृकारः मह्+अल्+कारः = महल्कारः। अत्र पूर्वपरयोः आकार+लृकारयोः स्थाने अल्-आदेशः।

अत्र **उरण् रपरः (१-१-५१)** इत्यनेन अर् अल् इत्येतौ भवतः।

### ३.७.४ वृद्धिसन्धिः -

**वृद्धिसन्धिविधायकसूत्राणि -**

(१) वृद्धिरेचि (६-१-८८)

(२) एत्येधत्यूठ्सु

(३) उपसर्गादृति धातौ (६-१-९१)

(४) वा सुप्यापिशलेः (६-१-९२)

**वार्त्तिकानि -**

(१) अक्षादूहिन्यामुपसङ्ख्यानम् (वा)

(२) स्वादीरेरिणोः (वा)

(३) प्रादूहोढोढ्येषैष्येषु (वा)

(४) ऋते च तृतीयासमासे (वा)

(५) प्रवत्सतरकम्बालवसनार्णदशानामृणे (वा)

**वृद्धिस्थानानि -**

(१) अ आ इत्येताभ्यां वर्णाभ्याम् ए ऐ इत्येतयोः परयोः ऐकारः ओ औ इत्येतयोः परयोः औकारः च पूर्वपरयोः स्थाने एकादेशः भवति।

(२) अवर्णात् एजाद्योः एत्येधत्योः ऊठि च परे पूर्वपरयोः ऐकारः एकादेशः भवति।

(३) अवर्णान्तात् उपसर्गात् ऋकारादौ धातौ परे पूर्वपरयोः आर्-एकादेशः भवति।

(४) अवर्णान्तात् उपसर्गात् ऋकारादौ सुबधातौ परे पूर्वपरयोः आर्-एकादेशः वा स्यात्।

(५) वार्त्तिकैः यत्र वृद्धिः विधीयते इति तत्तत्स्थानमेव पश्यन्तु।

अ, आ + ए, ऐ = ऐ

अ, आ + ओ, औ = औ

अ,आ + ऋ = आर्

अ,आ + लृ = आल्

उदाहरणानि -

सदा+एव, सद्+ऐ+व = सदैव। अत्र पूर्वपरयोः आकार+एकारयोः स्थाने ऐकारादेशः।

महा+ऐश्वर्यम्, मह्+ऐ+श्वर्यम् = महैश्वर्यम्। अत्र पूर्वपरयोः आकार+ऐकारयोः स्थाने ऐकारादेशः।

गङ्गा+ओघः गङ्ग्+औ+घः = गङ्गौघः। अत्र पूर्वपरयोः आकार+ओकारयोः स्थाने औकारादेशः।

वन+औषधम् वन्+औ+षधम् = वनौषधम्। अत्र पूर्वपरयोः अकार+औकारयोः स्थाने औकारादेशः।

उप+ऋच्छति उप्+आर्+च्छति = उपार्च्छति। अत्र पूर्वपरयोः अकार+ऋकारयोः स्थाने आर्-आदेशः।

प्र+ऋषभीयति प्र्+आर्+षभीयति = प्रार्षभीयति। अत्र पूर्वपरयोः अकार+ऋकारयोः स्थाने आर्-आदेशः। वृद्ध्यभावे गुणः। प्र+ऋषभीयति प्र्+अर्+षभीयति = प्रर्षभीयति।

उप+लृकारीयति, उप्+आल्+कारीयति = उपाल्कारीयति। अत्र पूर्वपरयोः अकार+लृकारयोः स्थाने आल्-आदेशः। वृद्ध्यभावे गुणः। उप+लृकारीयति, उप्+अल्+कारीयति = उपल्कारीयति।

### ३.७.५ पररूपसन्धिः -

**पररूपसन्धिविधायकसूत्राणि -**

(१) एङि पररूपम् (६-१-९४)

(२) ओमाङोश्च (६-१-९५)

(३) अव्यक्तानुकरणस्यात इतौ (६.१.९८)

**वार्त्तिके -**

(१) एवे चानियोगे (वा)

(२) शकन्ध्वादिषु पररूपं वाच्यम् (वा)

**गणसूत्रे**

(१) सीमन्तः केशवेशे

(२) सारङ्गः पशुपक्षिणोः

**विकल्पेन पररूपविधायकसूत्रम् -**

(१) नाम्रेडितस्यान्त्यस्य तु वा (६-१-९९)

**विकल्पेन पररूपविधायकवार्त्तिकम् -**

(१) ओत्वोष्ठयोः समासे वा (वा)

**पररूपनिषेधवार्त्तिकम् -**

(१) एकाचो न (वा)

**पररूपस्थानानि -**

(१) अवर्णान्तात् उपसर्गात् एकारादौ धातौ परे एकारः ओकारादौ धातौ परे ओकारः पूर्वपरयोः स्थाने एकादेशो भवति।

(२) अकारान्ताद् आकारान्ताद्वा शब्दात् ओम् इति शबदे परे, आङ् इति शबदे च परे पूर्वपरयोः पररूपमेकादेशः स्यात्। ओम् परे ओकारः भवति। आङ् परे तु एकारः अस्ति चेत् एकारः, ओकारः अस्ति चेत् ओकारः च एकादेशो भवति। आङ् इत्यत्र आकारः एव श्रूयते।

(३) अव्यक्तानुकरणस्य अत् इत्यस्य इतिशबदे परे पूर्वपरयोः पररूपमेकादेशः स्यात्।

(४) पूर्वोक्तनियमाभावेऽपि कुत्रचित् पररूपं भवति। कुत्रचित् विकल्पेन भवति। कुत्रचित् न भवति। तदर्थं तत्तत्स्थानानि पश्यन्तु।

उदाहरणम् -

प्र+एजते, प्र्+ए+जते = प्रेजते। अत्र पूर्वपरयोः अकार-एकारयोः पररूपम्। एकारः एकादेशः।

उप+ओषति, उप्+ओ+षति = उपोषति। अत्र पूर्वपरयोः अकार-ओकारयोः पररूपम्। ओकारः एकादेशः।

शिवाय+ओं नमः, शिवाय्+ओं नमः = शिवायों नमः। अत्र पूर्वपरयोः अकार-ओकारयोः पररूपम्। ओकारः एकादेशः।

का+ओमिति वदति, क्+ओ+ मिति वदति = कोमिति वदति। अत्र पूर्वपरयोः आकार-ओकारयोः पररूपम्। ओकारः एकादेशः।

आ + इहि = (गुणसन्धि) एहि इत्यत्र एकारे आङ् अस्ति।

शिव+एहि, शिव्+ए+हि = शिवेहि। अत्र पूर्वपरयोः अकार-एकारयोः पररूपम्। एकारः एकादेशः।

### ३.७.६ सवर्णदीर्घसन्धिः -

**सवर्णदीर्घसन्धिविधायकसूत्रम् -**

(१) अकः सवर्णे दीर्घः (६-१-१०१)

**सवर्णदीर्घस्थानानि -**

(१) अ आ इत्येताभ्याम् अ आ इत्येतयोः परयोः आकारः, इ ई इत्येताभ्याम् इ ई इत्येतयोः परयोः ईकारः, उ ऊ इत्येताभ्याम् उ ऊ इत्येतयोः परयोः ऊकारः च पूर्वपरयोः स्थाने एकादेशः भवति।

(२) ऋ इत्यस्मात् ऋ ऌ इत्येतयोः परयोः पूर्वपरयोः स्थाने ऋवर्णः एकादेशो भवति।

उदाहरणम् -

परम+अर्थः, परम्+आ+र्थः = परमार्थः। अत्र पूर्वपरयोः अकार-अकारयोः सवर्णदीर्घः। आकारः एकादेशः।

देव+आलयः, देव्+आ+लयः = देवालयः। अत्र पूर्वपरयोः अकार-आकारयोः सवर्णदीर्घः। आकारः एकादेशः।

विद्या+अभ्यासः, विद्य्+आ+भ्यासः = विद्याभ्यासः। अत्र पूर्वपरयोः आकार-अकारयोः सवर्णदीर्घः। आकारः एकादेशः।

विद्या+आलयः, विद्य्+आ+लयः = विद्यालयः। अत्र पूर्वपरयोः आकार-आकारयोः सवर्णदीर्घः। आकारः एकादेशः।

कवि+इन्द्रः, कव्+ई+न्द्र = कवीन्द्रः। अत्र पूर्वपरयोः इकार-इकारयोः सवर्णदीर्घः। ईकारः एकादेशः।

मही+ईशः, मह्+ई+शः = महीशः। अत्र पूर्वपरयोः ईकार-ईकारयोः सवर्णदीर्घः। ईकारः एकादेशः।

भानु+उदयः, भान्+ऊ+दयः = भानूदयः। अत्र पूर्वपरयोः उकार-उकारयोः सवर्णदीर्घः। ऊकारः एकादेशः।

वधू+उत्साहः, वध्+ऊ+त्साहः = वधूत्साहः। अत्र पूर्वपरयोः ऊकार-उकारयोः सवर्णदीर्घः। ऊकारः एकादेशः।

पितृ+ऋणम्, पित्+ॠ+णम् = पितॄणम्। अत्र पूर्वपरयोः ऋकार-ऋकारयोः सवर्णदीर्घः। ॠकारः एकादेशः।

होतृ+ऌकारः, होत्+ॠ+कारः = होतॄकारः। अत्र पूर्वपरयोः ऋकार-ऌकारयोः सवर्णदीर्घः। ॠकारः एकादेशः।

### ३.७.७ पूर्वरूपसन्धिः -

**पूर्वरूपसन्धिविधायकसूत्रम् -**

(१) एङः पदान्तादति (६-१-१०९)

**पूर्वरूपस्थानम् -**

पदान्ताद् एकाराद् अकारे परे एकारः, पदान्ताद् ओकाराद् अकारे परे ओकारः च पूर्वपरयोः स्थाने एकादेशः भवति।

उदाहरणम् -

अन्ते+अपि अन्त्+ए+पि = अन्तेऽपि। अत्र पूर्वपरयोः एकार-अकारयोः पूर्वरूपम्। एकारः एकादेशः।

सो+अपि स्+ओ+पि = सोऽपि। अत्र पूर्वपरयोः ओकार-अकारयोः पूर्वरूपम्। ओकारः एकादेशः।

प्रायः अस्मिन् सन्धौ एकारानन्तरं तथा ओकारानन्तरं च 'ऽ' इदं चिह्नं स्पष्टप्रतिपत्तये लिख्यते। शास्त्रे कुत्रापि नोक्तम्।

इत्थं प्रायः अच्सन्धौ = स्वरसन्धौ यण्सन्धिः, यान्तवान्तादेशसन्धिः, गुणसन्धिः, वृद्धिसन्धिः, पररूपसन्धिः, सवर्णदीर्घसन्धिः, पूर्वरूपसन्धिः इति सप्त सन्धयः तथा तेषां सारश्च अत्र निरूपिताः।

**।। इति अच्सन्धिप्रकरणम् ।।**

# ।। अथ चतुर्थखण्डः प्रकृतिभावप्रकरणम्।।

**संरचना**

४.० प्रस्तावना।
४.१ लक्षिताधिगमविशेषाः।
४.२ प्रकृतिभावः।
४.३ प्लुतसञ्ज्ञा।
४.४ प्रगृह्यसञ्ज्ञा।
४.५ प्रकृतिभावस्य सारः।

## ४.० प्रस्तावना -

एतावता अस्माभिः सन्धिप्रकरणे स्वरसन्धिविषये अधीतम्। तत्र स्वरसन्धिनिमित्ते सत्यपि प्रकृतिभावः इत्युक्ते प्रकृत्या = स्वभावेन निर्विकारस्वरूपेण तिष्ठति इत्यर्थः। स्वभावेन अवस्थितिः प्रकृतिभावः। प्रकृत्या = स्वभावेन, भावः = अवस्थितिः। निमित्ते सत्यपि सन्धिकार्यं न भवति इत्यर्थः। उदाहरणम्- हरी एतौ इत्यत्र **इको यणचि** (६.१.७७) इत्यनेन विधीयमानस्य यण्सन्धेः निमित्तम् अस्ति। तथापि सन्धिकार्यं न भवति। सम्प्रति प्रकृतिभावं पठामः।

## ४.१ लक्षिताधिगमविशेषाः -

एनं पाठं पठित्वा भवन्तः

- प्रकृतिभावविषिये ज्ञास्यन्ति।
- प्रकृतिभावविधायकानि सूत्राणि ज्ञास्यन्ति।
- प्रकृतिभावः कुत्र प्रवर्तते कुत्र न प्रवर्तते इति ज्ञास्यन्ति।
- प्लुतविधायकानि सूत्राणि ज्ञास्यन्ति।
- प्रगृह्यविधायकानि सूत्राणि ज्ञास्यन्ति।

## ४.२.० प्रकृतिभावः -

### ४.२.१ प्रकृतिभावविधायकसूत्राणि -

**(९०) प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५)** प्लुताः प्रगृह्याश्च वक्ष्यन्ते। सूत्रार्थः - प्लुताः प्रगृह्याश्च अचि परे नित्यं प्रकृत्या स्युः- इति।

उदाहरणम्- एहि कृष्ण३ अत्र गौश्चरति। अत्र कृष्णशब्दस्य णकारोत्तर-अकारः प्लुतः भवति। अत्र इत्यत्र अकारः अच् भवति। अतः अत्र सवर्णदीर्घस्य निमित्ते सत्यपि प्रकृतिभावः भवति।

हरी एतौ। अत्र हरीशब्दस्य रेफोत्तर-ईकारस्य प्रगृह्यसञ्ज्ञा अस्ति। एतौ इत्यत्र एकारः अचि अन्तर्भवति। अतः अत्र यणः निमित्ते सत्यपि प्रकृतिभावः भवति।

**(९१) इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (६-१-१२७)** सूत्रार्थः - पदान्ता इकः असवर्णेऽचि परे प्रकृत्या विकल्पेन स्युः। इकः ह्रस्वश्च विकल्पेन भवति- इति। एकदा एव इकः प्रकृतिभावः ह्रस्वश्च विकल्पेन भवतः। न तु पर्यायेण। अनेन सूत्रेण विधीयमानस्य प्रकृतिभावस्य प्लुतः प्रगृह्यो वा नापेक्षते।

उदाहरणम्- चक्रि अत्र। चक्री+अत्र इति स्थिते अनेन सूत्रेण रेफोत्तर-ईकारः इक् भवति। 'अत्र' इत्यत्र अकारः अच् भवति। अतः अत्र प्रकृतिभावः, ईकारस्य ह्रस्वः च भवति। चक्रि अत्र इति रूपम्। ह्रस्वप्रकतिभावयोरभावे चक्री + अत्र इति स्थिते **इको यणचि (६.१.७७)** इत्यनेन यण् भवति।

**(९२) ऋत्यकः (६-१-१२८)** सूत्रार्थः - पदान्ता अकः ऋवर्णे परे प्रकृत्या विकल्पेन स्युः। अकः ह्रस्वश्च विकल्पेन भवति- इति।

उदाहरणम् - ब्रह्म ऋषिः। ब्रह्मा+ऋषिः इति स्थिते मकारोत्तर-आकारः अक् भवति। 'ऋषिः' इत्यत्र ऋकारः अस्ति। अतः अत्र अनेन सूत्रेण प्रकृतिभावः, आकारस्य ह्रस्वः च भवति। ब्रह्म ऋषिः इति रूपम्। प्रकतिभावह्रस्वयोरभावे ब्रह्मा+ऋषिः इति स्थिते **इको यणचि (६.१.७७)** इत्यनेन यण् भवति। ब्रह्मर्षिः इति रूपम्।

समासेऽप्ययं प्रकृतिभावः भवति। उदाहरणम् - सप्तऋषीणाम्। विकल्पत्वात् सप्तर्षीणाम् इत्यपि रूपम्।

## ४.२.२ प्रकृतिभावनिषेधः -

**न समासे (वा)** वार्त्तिकार्थः - पदान्ते विद्यमानानाम् इक्वर्णानाम् अचि परे समासे प्रकृतिभावः न भवति- इति।

उदाहरणम् - वाप्याम् अश्वः इत्यर्थे समासे वापी+अश्वः इति स्थिते प्रकृतिभावः न भवति। **इको यणचि (६.१.७७)** इत्यनेन यण् भवति = वाप्यश्वः इति रूपम्।

**सिति च (वा)** सकारः इत् यस्य सः सित्। तस्मिन् सिति। वार्त्तिकार्थः - पदान्ते विद्यमानानाम् इक्वर्णानाम् सिति परे प्रकृतिभावः न भवति- इति।

उदाहरणम् - पर्शु+ णस् इति स्थिते णित्वात् आदिवृद्धिः। पार्शु+अ इति स्थिते प्रकृतिभावः न भवति। **इको यणचि (६.१.७७)** इत्यनेन यण् भवति = पार्श्वम् इति रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) प्रकृतिभावविधायकानि सूत्राणि कानि ?

(२) इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (६-१-१२७) इति सूत्रेण प्रकृतिभावः नित्यं विधीयते उत विकल्पेन ?

(३) ऋत्यकः (६-१-१२८) इति सूत्रं समासे अपि प्रवर्तते वा ?

(४) न समासे (वा) इति वार्त्तिकस्य उदाहरणं किम् ?

(५) सिति च (वा) इति वार्त्तिकस्य अर्थः कः ?

## ४.३ प्लुतसञ्ज्ञा -

प्लुताः प्रगृह्याश्च वक्ष्यन्ते इति प्रागुक्तम्। तत्र इदानीं प्लुतसञ्ज्ञाविधायकानि सूत्राणि उच्यन्ते।

**(९३) वाक्यस्य टेः प्लुत उदात्तः** (८-२-८२) अधिकारसूत्रमिदम्। **वाक्यस्य टेः प्लुत उदात्तः** इत्यधिकृत्य। अस्मिन् अधिकारे सर्वत्र वाक्यस्य टिभागस्य प्लुतः भवति, सः प्लुतः उदात्तोऽपि भवति इत्यर्थः।

**(९४) प्रत्यभिवादेऽशूद्रे** (८-२-८३) न शूद्रः अशूद्रः, शूद्रभिन्नः इत्यर्थः। प्रत्यभिवादः = आशीर्वचनम्। सूत्रार्थः - अशूद्रविषये प्रत्यभिवादे यद्वाक्यं प्रयुज्यते तस्य वाक्यस्य टिभागस्य प्लुतः स्यात् सः प्लुतः उदात्तः भवति- इति।

अभिवादनक्रमः - अभिवादये देवदत्तोऽहम्- इत्यादि। प्रत्यभिवादनक्रमः - भो आयुष्मानेधि देवदत्त३। अत्र प्रत्यभिवादनस्य देवदत्तशब्दस्य अन्त्य-अकारः टिभागः। सः प्लुतः भवति उदात्तोऽपि भवति।

**स्त्रियां न (वा)** वार्त्तिकार्थः - स्त्रीणां प्रत्यभिवादे वाक्यस्य टिभागस्य प्लुतः तथा उदात्तः न भवति।

उदाहरणम् - अभिवादये गार्ग्यहम्- इत्यभिवादनम्। भो आयुष्मती भव गार्गि इति प्रत्यभिवादनम्।

**भोराजन्यविशां वेति वाच्यम् (वा)**। वार्त्तिकार्थः - (१) भोः इति शब्दस्य (२) राजन्यवाचकनाम्नः (३) वैश्यवाचकनाम्नः टिभागस्य प्लुतः विकल्पेन भवति- इति।

क्रमशः उदाहरणत्रयम् - आयुष्मानेधि भोः३ । आयुष्मानेधीन्द्रवर्म३न् । आयुष्मानेधीन्द्रपालित३। त्रिषु उदाहरणेषु अपि प्लुतयुक्तं पदं टिभागे अस्ति।

**(९५) दूराद्धूते च** (८-२-८४) हूतम्- सम्बोधनम्। सूत्रार्थः - दूरात्संबोधने यद्वाक्यं प्रयुज्यते तस्य वाक्यस्य टेः प्लुतः भवति सः प्लुतः उदात्तः भवति- इति।

उदाहरणम् - सक्तून् पिबा देवदत्त३।

**(९६) हैहेप्रयोगे हैहयोः** (८-२-८५) है, हे इति सम्बोधनद्योतकम् अव्ययद्वयम्। सूत्रार्थः - है, हे इत्यनयोः प्रयोगं कृत्वा दूरात् सम्बोधनार्थं यद्वाक्यं प्रयुज्यते तस्मिन् वाक्ये है, हे इत्यनयोः एव प्लुतः स्यात्- इति।

उदाहरणम् - हे३ राम । राम है३।

**(९७) गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्** (८-२-८६) सूत्रार्थः - दूराद् सम्बोधने यद्वाक्यं प्रयुज्यते तस्मिन् वाक्ये सम्बोधनात्मकं यत् पदं वर्तते तस्य अवयवस्य ऋकारभिन्नस्य अन्त्यभिन्नस्य

गुरुसञ्ज्ञकस्य प्लुतः भवति। अन्त्यस्य तु ह्रस्वस्यापि प्लुतः भवति। अत्र सर्वत्र प्लुतः विकल्पेन भवति- इति। एकदा एव सर्वेषां प्लुतः न भवति, पर्यायेण भवति।

उदाहरणम् - एहि दे३वदत्त। एहि देवद३त्त। एहि देवदत्त३।

**(९८) अप्लुतवदुपस्थिते (६-१-१२९)** उपस्थितः = अनार्षः = अवैदिकः इति शब्दः। सूत्रार्थः - अवैदिके इतिशबदे परे प्लुतः अप्लुतवद् भवति- इति।

उदाहरणम् - सुश्लोक इति। अत्र ककारोत्तर-अकारः प्लुतः। तस्य इतिशब्दपरकत्वमस्ति। स च इतिशब्दः अवैदिकः = लौकिकः। अतः सः प्लुतः अप्लुतवद् भवति। अर्थात् अप्लुतकार्यं = यणादिकं करोतीत्यर्थः। सुश्लोकेति- इति रूपम्।

**(९९) ई३ चाक्रवर्मणस्य (६-१-१३०)** सूत्रार्थः - प्लुतः ईकारः अचि परे विकल्पेन अप्लुतवद् भवति- इति।

उदाहरणम् - चिनुही३ इति। चिनुही३ इदम्। अत्र उभयत्र ईकारः प्लुतः। अतः अनयो उदाहरणयोः प्रकृतिभावः **प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५)** इति सूत्रेण। चिनुहीति। चिनुहीदम्। **ई३ चाक्रवर्मणस्य (६-१-१३०)** इत्यनेन प्लुतः विकल्पेन अप्लुतवद् जातः। अतः प्रकृतिभावः न। उभयत्र **अकः सवर्णे दीर्घः (६-१-१०१)** इत्यनेन सवर्णदीर्घः।

**स्वावलोकनप्रश्नाः -**

(१) वाक्यस्य टेः प्लुत उदात्तः (८-२-८२) इति कीदृशं सूत्रम् ?

(२) अभिवादनक्रमः कथं भवति ?

(३) प्रत्यभिवादनक्रमः कथं भवति ?

(४) हूतम् इत्युक्ते किम् ?

(५) सम्बाोधनद्योतकम् अव्ययद्वयं लिखत ?

(६) गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् (८-२-८६) इत्यनेन प्लुतः सर्वेषाम् एकदा भवति उत पर्यायेण ?

(७) एषु उपस्थित-शब्दस्य कः अर्थः समीचीनः ?

(१) अनार्षः (२) अवैदिकः (३) लौकिकः (४) सर्वोऽपि समीचीनः

(८) ई३ चाक्रवर्मणस्य (६-१-१३०) इति सूत्रेण ईकारस्य अप्लुतवद् भावः नित्यम् उत विकल्पेन ?

## ४.४ प्रगृह्यसञ्ज्ञा -

प्लुताः प्रगृह्याश्च वक्ष्यन्ते इति प्रागुक्तम्। तत्र इदानीं प्रगृह्यसञ्ज्ञाविधायकानि सूत्राणि उच्यन्ते।

**(१००) ईदूदेद्द्विवचनं प्रगृह्यम् (१-१-११)** सूत्रार्थः - ईकारान्तं द्विवचनम्, ऊकारान्तं द्विवचनम्, एकारान्तं द्विवचनं प्रगृह्यसञ्ज्ञं भवति।

उदाहरणम् - हरी एतौ। विष्णू इमौ। गङ्गे अमू। पचेते इमौ । हरी इति ईकारान्तम् अस्ति, द्विवचनं च अस्ति। अतः अस्य प्रगृह्यसञ्ज्ञा। विष्णू इति ऊकारान्तम् द्विवचनं च अस्ति। अतः अस्य प्रगृह्यसञ्ज्ञा। गङ्गे, पचेते इति उभयत्र एकारान्तमस्ति, द्विवचनमपि अस्ति। अतः अस्य प्रगृह्यसञ्ज्ञा। अतः एषु उदाहरणेषु प्रकृतिभावः **प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५)** इति सूत्रेण।

**(१०१) अदसो मात् (१-१-१२)** सूत्रार्थः - अदस्शब्दावयवस्य मकारात् परस्य ईकारस्य तथा ऊकारस्य च प्रगृह्यसञ्ज्ञा स्यात्।

उदाहरणम् - अमी ईशाः। अमी इत्यत्र मकारोत्तर-ईकारस्य प्रगृह्यसञ्ज्ञा। रामकृष्णावमू आसाते। अमू इत्यत्र मकारोत्तर-ऊकारस्य प्रगृह्यसञ्ज्ञा। अतः एतयोः उदाहरणयोः प्रकृतिभावः **प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५)** इति सूत्रेण।

**(१०२) शे (१-१-१३)** सूत्रार्थः - छन्दसि यः शे इत्यादेशः सः प्रगृह्यसञ्ज्ञः स्यात्।

उदाहरणम् - अस्मे इन्द्राबृहस्पती। अस्मे इत्यस्य अस्मभ्यम् इत्यर्थः। चतुर्थीबाहुवचनस्य भ्यस्प्रत्ययस्य शे इत्यादेशः। अतः अस्मिन् उदाहरणे प्रकृतिभावः **प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५)** इति सूत्रेण।

**(१०३) निपात एकाजनाङ् (१-१-१४)** निपातः इत्युक्ते किमिति स्मरन्तु। इतः प्राक् सञ्ज्ञाप्रकरणे **चादयोऽसत्त्वे (१.४.५७) प्रादयः (१.४.५८)** इति सूत्राभ्यां निपातसञ्ज्ञा उक्ता। सूत्रार्थः - निपातेषु आङ् इति निपातं विहाय अन्येषाम् एकाज्निपातानां प्रगृह्यसञ्ज्ञा भवति- इति।

उदाहरणम् - इ इति विस्मयार्थकनिपातस्य प्रगृह्यसञ्ज्ञा। उ इति वितर्कार्थकनिपातस्य प्रगृह्यसञ्ज्ञा। अनाङ् इति निषेधेन आ इत्यस्य तु प्रगृह्यसञ्ज्ञा भवति। अतः एषु उदाहरणेषु प्रकृतिभावः **प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५)** इति सूत्रेण। इ इन्द्रः। उ उमेशः। आ एवं नु मन्यसे। इति।

**(१०४) ओत् (१-१-१५)** सूत्रार्थः - ओदन्तः निपातः प्रगृह्यः स्यात्- इति।

उदाहरणम् - अहो ईशाः। अहो इत्यत्र ओकारः अन्ते अस्ति। तस्य प्रगृह्यसञ्ज्ञा अस्ति। अतः अस्मिन् उदाहरणे प्रकृतिभावः **प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५)** इति सूत्रेण।

**(१०५) संबुद्धौ शाकल्यस्येतावनार्षे (१-१-१६)** अनार्षः = अवैदिकः = लौकिकः। सूत्रार्थः - सम्बुद्धिसञ्ज्ञां निमित्तीकृत्य आगतः यः ओकारः तस्य लौकिके इतिशबदे परे विकल्पेन प्रगृह्यसञ्ज्ञा भवति- इति।

उदाहरणम् - विष्णो इति। ओकारस्य लौकिक-इतिशब्दपरकत्वात् ओकारस्य प्रगृह्यत्वे प्रकृतिभावः **प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५)** इति सूत्रेण। ओकारस्य प्रगृह्यत्वस्याभावे

विष्णो + इति, इति स्थिते **एचोयवायावः (६ .१ .७८)** इत्यनेन अवादेशे विष्णविति, इति रूपम्। अवादेशानन्तरं **लोपः शाकल्यस्य (८ .३ .१९)** इत्यनेन वकारस्य वैकल्पिकलोपे विष्ण इति- इति रूपम्।

**(१०६) उञः (१-१-१७)** सूत्रार्थः - उञ् इति निपातस्य इतिशबदे परे प्रगृह्यसञ्ज्ञा विकल्पेन भवति- इति।

उदाहरणम् - उ इति। उ इत्यस्य प्रगृह्यसञ्ज्ञा। अतः प्रकृतिभावः **प्लुतप्रगृह्या अचि नित्यम्** (६-१-१२५) इति सूत्रेण। प्रगृह्यस्य अभावे **इको यणचि (६ .१ .८७)** इत्यनेन यण् 'विति', इति रूपम्।

**(१०७) ऊँ (१-१-१८)** सूत्रार्थः - उञ् इति निपातस्य इतिशबदे परे दीर्घः अनुनासिकः प्रगृह्यः ऊँ इति आदेशः विकल्पेन भवति।

उदाहरणम् - उञः ऊँ इत्यादेशे ऊँ इति- इति एकं रूपम्। ऊँ इत्यस्य प्रगृह्यसञ्ज्ञासत्त्वात्। ऊँ इत्यादेशाभावे **उञः (१ .१ .१७)** इत्यनेन यद्रूपं तदेव भवति। उ इति- इति रूपम्। तस्यापि अभावे इको यणचि (६-१-७७) इति उकारस्य यणादेशे वकारे कृते विति- इति च रूपम्।

**(१०८) मय उञो वो वा (८-३-३३)** सूत्रार्थः - मय्प्रत्याहारे विद्यमानात् वर्णात् परस्य उञ् इत्यस्य अचि परे विकल्पेन 'व्' इत्यादेशः भवति।

उदाहरणम् - किमु उक्तम्। अत्र किमु इत्यत्र मयः परः उकारः अस्ति। तस्य विकल्पेन 'व्' इत्यादेशे किम्व् + उक्तम् = किम्वुक्तम् इति रूपम्। किमु उक्तम्। उञः उकारस्य 'व्' इत्यादेशाभावे **उञः (१ .१ .१७)** इत्यनेन प्रगृह्यसञ्ज्ञा भवति। ततः प्रकृतिभावः **प्लुतप्रगृह्या अचि नित्यम्** (६-१-१२५) इति सूत्रेण।

**(१०९) ईदूतौ च सप्तम्यर्थे (१-१-१९)** सूत्रार्थः - सप्तम्यर्थे विद्यमानः ईदन्तशब्दः ऊदन्तशब्दश्च प्रगृह्यः भवति- इति।

उदाहरणम् - सोमो गौरी अधिश्रितः । अत्र सोमः गौर्याम् अधिश्रितः इत्यर्थः। मामकी तनू इति। अत्र मामक्यां तन्वाम् इति इत्यर्थः। प्रगृह्यत्वात् **प्लुतप्रगृह्या अचि नित्यम्** **(६-१-१२५)** इति सूत्रेण प्रकृतिभावः।

प्रकरणवशात् अनुनासिकविधायकं सूत्रं कथ्यते-

**(११०) अणोऽप्रगृह्यस्यानुनासिकः (८-४-५७)** सूत्रार्थः - प्रगृह्यभिन्नस्य अणः अवसाने परे अनुनासिकः विकल्पेन भवति।

उदाहरणम् - दधिँ। विकल्पेन अनुनासिके सति इदं रूपम्। दधि। अनुनासिकाभावे इदं रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) हरी एतौ इत्यत्र कुतः सन्धिः न भवति ?

(२) ईदूदेद्द्विवचनं प्रगृह्यम् (१-१-११) इत्यनेन कस्य प्रगृह्यसञ्ज्ञा विधीयते ?

(३) अदसो मात् (१-१-१२) इति सूत्रेण अदश्शब्दस्य मकारात् परस्य कयोः वर्णयोः प्रगृह्यसञ्ज्ञा भवति ?

(४) शे इति किम् ? अस्य का सञ्ज्ञा ?

(५) निपात एकाजनाङ् (१-१-१४) इति सत्रे "अनाङ्" इति निषेधेन केवलम् 'आ' इत्यस्य प्रगृह्यसञ्ज्ञा भवति उत न ?

(६) अहो ईशाः इत्यत्र हकारोत्तर-ओकारस्य केन सूत्रेण का सञ्ज्ञा भवति ?

(७) संबुद्धौ शाकल्यस्येतावनार्षे (१-१-१६) इति सूत्रे अनार्षे इति कथनेन कुत्र सन्धिः न भवति ? उदाहरणं किम् ?

(८) उञः (१.१.१७) इत्यनेन प्रकृतिभावस्य विकल्पेन अभावे उ + इति - इति स्थिते किं रूपम् ?

(९) ॐ इति किम् ? कुत्र भवति ? अस्य का सञ्ज्ञा ?

(१०) मय उञो वो वा (८.३.३३) इत्यस्य उदाहरणं किम् ?

(११) सोमो गौरी अधिश्रितः इत्यत्र गौरीशब्दः कस्मिन् अर्थे भवति ?

(१२) अणोऽप्रगृह्यस्यानुनासिकः (८-४-५७) इति सूत्रस्य अननुनासिकाभावपक्षे किमुदाहरणम् ?

## ४.५ प्रकृतिभावस्य सारः -

कुत्र कदा प्रकृतिभावः भवति इति ज्ञानार्थं सरलतया प्रकृतिभावः अत्र निरूप्यते।

### ४.५.१ प्रकृतिभावः -

**प्रकृतिभावविधायकसूत्राणि -**

(१) प्लुतप्रगृह्या अचि नित्यम् (६-१-१२५)

(२) इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (६-१-१२७)

(३) ऋत्यकः (६-१-१२८)

**प्रकृतिभावनिषेधकवार्त्तिके -**

(१) न समासे (वा)

(२) सिति च (वा)

**प्रकृतिभावस्थानानि -**

(१) प्लुताः प्रगृह्याश्च अचि परे नित्यं प्रकृत्या स्युः।

(२) पदान्ता इकः असवर्णेऽचि परे प्रकृत्या विकल्पेन स्युः। इकः ह्रस्वश्च विकल्पेन भवति। प्रकृतिभावाभावे यण् भवति। समासे प्रकृतिभावः ह्रस्वो वा न भवति। तत्र यण् भवति।

(३) पदान्ते विद्यमानानाम् अ आ इ ई उ ऊ ऋ ॠ वर्णानाम् ऋकारे परे प्रकृतिभावो विकल्पेन भवति। प्रकृतिभावपक्षे दीर्घस्य ह्रस्वो भवति। समासे अपि अयं प्रकृतिभावः भवति।

(४) पदान्ते विद्यमानानाम् इक्वर्णानाम् सिति परे प्रकृतिभावः वा न भवति। अर्थात् विकल्पेन भवति।

उदाहरणम् -

एहि कृष्ण३ + अत्र गोप्यस्ति = एहि कृष्ण३ + अत्र गोप्यस्ति। अत्र प्लुत-अकारस्य तथा ह्रस्य-अकारस्य च मध्ये सवर्णदीर्घस्य निमित्तमस्ति। तथापि प्रकृतिभावः भवति। प्लुतप्रकृतिभावस्य उदाहरणम्

गुरू + इमौ = गुरू इमौ। अत्र ऊकार-इकारयोः मध्ये यणः निमित्ते सत्यपि प्रकृतिभावः भवति। प्रगृह्यप्रकृतिभावस्य उदाहरणम्।

चक्री + अत्र = चक्रि अत्र- इति ईकारस्य ह्रस्वः भवति। प्रकृतिभावस्य रूपम्। प्रकृतिभावाभावे चक्र्यत्र इति इको यणचि (६.१.८७) इति सूत्रेण यण्।

गुरु + ऋणम् = गुरु ऋणम् इति प्रकृतिभावस्य रूपम्, समासेऽपि एवमेव रूपम्। वसन्तर्तुः - गुणे कृते रूपम्।

स्त्री + ऋणम् = स्त्रि ऋणम्। ईकारस्य ह्रस्वः प्रकृतिभावे समासे च रूपम्। स्त्र्यर्णम्- यणः रूपम्।

## ४.५.२ प्लुतप्रगृह्यानां सूत्राणि -

अस्मिन् पाठे प्रधानतया प्लुताः प्रगृह्याश्च सञ्ज्ञाः सन्ति। अतः तासां सञ्ज्ञानां सूत्राणि एकत्रीक्रियन्ते।

**प्लुतसञ्ज्ञाविधायकसूत्राणि -**

(१) वाक्यस्य टेः प्लुत उदात्तः (८-२-८२)

(२) प्रत्यभिवादेऽशूद्रे

(३) दूराद्धूते च (८-२-८४)

(४) हैहेप्रयोगे हैहयोः (८-२-८५)

(५) गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् (८-२-८६)

(६) अप्लुतवदुपस्थिते (६-१-१२९)

(७) ई३ चाक्रवर्मणस्य (६-१-१३०)

**विकल्पेन प्लुतसञ्ज्ञाविधायकं वार्त्तिकम् -**

(१) भोराजन्यविशां वेति वाच्यम् (वा)

**प्लुतसञ्ज्ञानिषेधवार्त्तिकम् -**

(१) स्त्रियां न (वा)

**प्रगृह्यसञ्ज्ञाविधायकसूत्राणि -**

(१) ईदूदेद्द्विवचनं प्रगृह्यम् (१-१-११)

(२) अदसो मात् (१-१-१२)

(३) शे (१-१-१३)

(४) निपात एकाजनाङ् (१-१-१४)

(५) ओत् (१-१-१५)

(६) संबुद्धौ शाकल्यस्येतावनार्षे (१-१-१६)

(७) उञः (१-१-१७)

(८) ऊँ (१-१-१८)

(९) ईदूतौ च सप्तम्यर्थे (१-१-१९)

**।। इति अच्सन्धौ प्रकृतिभावप्रकरणम् ।।**

# ।। अथ पञ्चमखण्डः हल्सन्धिप्रकरणम् ।।

**संरचना**

५.० प्रस्तावना।
५.१ लक्षिताधिगमविशेषाः।
५.२.० श्चुत्वसन्धिः।
५.३.० ष्टुत्वसन्धिः।
५.४. जश्त्वसन्धिः।
५.५ अनुनासिकसन्धिः।
५.६ परसवर्णसन्धिः।
५.७ पूर्वसवर्णसन्धिः।
५.८ छत्वसन्धिः।
५.९ चर्त्वसन्धिः।
५.१० छत्वसन्धिः।
५.११ अनुस्वारसन्धिः।
५.१२ परसवर्णसन्धिः।
५.१३ कुगागमसन्धिः टुगागमसन्धिश्च।
५.१४ धुडागमसन्धिः।
५.१५ तुगागमसन्धिः।
५.१६ ङमुडागमसन्धिः।
५.१७ तुगागमसन्धिः।
५.१८ व्यञ्जनसन्धिसारः।

## ५.० प्रस्तावना -

एतावत्पर्यन्तम् अस्माभिः स्वरसन्धिप्रकरणं तथा प्रकृतिभावप्रकरणं च पठितम्। इदं हल्सन्धिप्रकरणं भवति। स्वरवर्णयोः मध्ये स्वरसन्धिः भवति। हल्सन्धिस्तु- हल्वर्णयोर्मध्ये तथा हल्वर्णस्वरवर्णयोर्मध्ये च भवति। अच्सन्धौ सर्वत्र कः वर्णः पूर्वं भवेत् कः वर्णः परं भवेत् इति निर्देशः आसीत्। अत्र हल्सन्धौ तावत् यत्र योगे इति पदमुपयुज्यते तत्र सः वर्णः पूर्वं भवेत्, परं वा भवेत्। पूर्वं भवति चेत् पूर्वस्य आदेशः भवति। परं भवति चेत् परस्य आदेशः भवति। अत्रापि (१) श्चुत्वसन्धिः (२) ष्टुत्वसन्धिः (३) जश्त्वसन्धिः (४) चर्त्वसन्धिः (५) अनुनासिकसन्धिः (६) अनुस्वारसन्धिः (७) परसवर्णसन्धिः (८) ङमुडागमसन्धिः (९) पूर्वसवर्णसन्धिः (१०) तुगागमसन्धिः इत्येते सन्धयः भवन्तिः। अत्र भट्टोजिदीक्षितमहाशयेन प्रक्रियासौलभ्यार्थं केचन सन्धयः स्थलद्वये उक्ताः। क्रमेण तान् सन्धीन् विचारयामः।

## ५.१ लक्षिताधिगमविशेषाः -

एनं पाठं पठित्वा भवन्तः

- हल्सन्धिविषये ज्ञातुं प्रभवन्ति।
- हल्सन्धिः कुत्र भवति इति ज्ञातुं प्रभवन्ति।
- हल्सन्धौ कीदृशं परिवर्तनं भवति इति ज्ञातुं प्रभवन्ति।
- कस्य वर्णस्य कः वर्णः ओदेशो भवति इत्यपि ज्ञास्यन्ति।
- कुत्र सन्धिः विकल्पो भवति, कुत्र नित्यं भवति इति ज्ञास्यन्ति।

## ५.२.० श्चुत्वसन्धिः -

### ५.२.१ श्चुत्वविधायकसूत्रम् -

**(१११) स्तोः श्चुना श्चुः (८-४-४०)** स् च तुः च स्तुः, श् च चुः च श्चुः। सूत्रार्थः - सकारतवर्गयोः शकारचवर्गाभ्यां योगे सकारतवर्गयोः स्थाने शकारचवर्गौ स्तः - इति। स-त-थ-द-ध-न इत्येतेषां वर्णानां श-च-छ-ज-झ-ञ इति वर्णेषु अन्यतमवर्णेन सह योगः भवितुमर्हति। परन्तु सकारस्य शकारः, तकारस्य चकारः, थकारस्य छकारः, दकारस्य जकारः, धकारस्य झकारः, नकारस्य ञकारः इति आदेशः क्रमेण भवति।

उदाहरणम्- हरिस्+शेते = हरिश्शेते। सकारस्य शकारेण सह योगे शकारः। रामस्+चिनोति = रामश्चिनोति। सकारस्य चकारेण सह योगे शकारः। सत्+चित् = सच्चित्। तकारस्य चकारेण सह योगे चकारः। शार्ङ्गिन्+जय = शार्ङ्गिञ्जय। नकारस्य जकारेण सह योगे ञकारः।

### ५.२.१ श्चुत्वनिषेधसूत्रम् -

**(११२) शात् (८-४-४४)** सूत्रार्थः - शात्परस्य तवर्गस्य श्चुत्वं न स्यात्- इति।

उदाहरणम् - विश्+न = विश्नः। शकारात् परस्य तवर्गस्य नकारः अस्ति। नकारस्य शकारेण सह योगः तु अस्ति। अनेन सूत्रेण निषेधात् नकारस्य ञकारः न भवति। प्रश्+न = प्रश्नः। विश्नः इति रूपवत् अत्रापि नकारस्य ञकारः न भवति।

**स्वावलोकनप्रश्नाः -**

(१) श्चुत्वविधायकं सूत्रं किम् ?

(२) श्चुत्वस्य निषेधसूत्रं किम् ?

(३) शकारचवर्गस्य सकारतवर्गे परे श्चुत्वं भवति उत न ?

## ५.३.० ष्टुत्वसन्धिः -

### ५.३.१ ष्टुत्वविधायकसूत्रम् -

**(११३) ष्टुना ष्टुः (८-४-४१)** ष् च टुः च ष्टुः। सूत्रार्थः - सकारतवर्गयोः शकारचवर्गाभ्यां योगे सकारतवर्गयोः स्थाने षकारटवर्गौ स्तः- इति। स-त-थ-द-ध-न इत्येतेषां वर्णानां ष-ट-ठ-ड-ढ-ण इति वर्णेषु अन्यतमवर्णेन सह योगः भवितुमर्हति। परन्तु सकारस्य षकारः, तकारस्य टकारः, थकारस्य ठकारः, दकारस्य डकारः, धकारस्य ढकारः, नकारस्य णकारः इति आदेशः क्रमेण भवति।

उदाहरणम्- रामस्+षष्ठः = रामष्षष्ठः। सकारस्य षकारेण सह योगे षकारः। रामस्+टीकते = रामष्टीकते। सकारस्य टकारेण सह योगे षकारः। पेष्+ता = पेष्टा। तकारस्य

षकारेण सह योगे षकारः। तत्+टीका = तट्टीका। तकारस्य टकारेण सह योगे टकारः। चक्रिन्+ढौकसे = चक्रिण्ढौकसे । नकारस्य ढकारेण सह योगे णकारः।

### ५.३.२ ष्टुत्वनिषेधसूत्रम् -

**(११४) न पदान्ताट्टोरनाम् (८-४-४२)** सूत्रार्थः - पदान्तात् टवर्गात् परस्य अनामः = नाम्वर्जितस्य सकारतवर्गस्य ष्टुत्वं न भवति- इति। अर्थात् टवर्गात् परस्य नाम् इत्यस्य तु ष्टुत्वं भवति इत्यर्थः।

उदाहरणम् - षट् सन्तः। अत्र पदान्ते टकारः अस्ति, तत्परं सकारः अस्ति। अतः अनेन सूत्रेण ष्टुत्वनिषेधः। षट् ते। अत्र पदान्ते टकारः अस्ति, तत्परं तकारः अस्ति अतः अनेन सूत्रेण ष्टुत्वनिषेधः।

### ५.३.३ ष्टुत्वनिषेधस्य निषेधवार्त्तिकम् -

**अनाम्नवतिनगरीणामिति वाच्यम् (वा)**। अनेन वार्त्तिकेन ष्टुत्वनिषेधस्य निषेधः क्रियते, न तु ष्टुत्वं विधीयते। वार्त्तिकार्थः - नाम्, नवति, नगरी इत्येतानि विहाय अन्यत्र ष्टुत्वं न भवति- इति परिगणनं कर्तव्यम्- इति। अर्थात् टवर्गात् परं नाम्, नवति, नगरी इत्येतेषु परेषु ष्टुत्वं भवति- इत्यर्थः। षण्+नाम् = षण्णाम्। अत्र टवर्गात् परस्य नाम् इत्यस्य नकारस्य णकारः। षण्+नवतिः = षण्णवतिः। अत्र टवर्गात् परस्य नवतिः इत्यस्य नकारस्य णकारः। षण्+नगर्यः = षण्णगर्यः। अत्रापि टवर्गात् परस्य नगर्यः इत्यस्य नकारस्य णकारः।

### ५.३.४ ष्टुत्वनिषेधसूत्रम् -

**(११५) तोः षि (८-४-४३)** सूत्रार्थः - तवर्गस्य षकारे परे ष्टुत्वं न भवति - इति।

उदाहरणम् - सन्+षष्ठः = सन्षष्ठः। अत्र तवर्गात् षकारे परे ष्टुत्वनिषेधः।

**स्वावलोकनप्रश्नाः -**

(१) ष्टुत्वविधायकं सूत्रं किम् ?

(२) ष्टुत्वस्य निषेधसूत्रे के ?

(३) अनाम्नवतिनगरीणामिति वाच्यम् (वा) इति वार्त्तिकेन ------------------------------ ---------------------- क्रियते। ( ष्टुत्वविधानम्, ष्टुत्वनिषेधः, ष्टुत्वनिषेधस्य निषेधः )

(४) तोः षि (८.४.४३) इति सूत्रेण कदा ष्टुत्वनिषेधः क्रियते ?

## ५.४. जश्त्वसन्धिः -

### ५.४.१ जश्त्वविधायकसूत्रम् -

**झलां जशोऽन्ते (८.२.३९)** इदं सूत्रं प्रकरणवशात् अच्सन्धिप्रकरणे प्राक् व्याख्यातम्। इदानीं हल्सन्धिप्रकरणस्थं सूत्रमिति हेतोः पुनः प्रस्तूयते। सूत्रार्थः - पदान्ते झलां जशः स्युः। झलां स्थाने वर्गतृतीयवर्णाः आदेशाः भवन्ति।

उदाहरणम् - वाक्+ईशः = वागीशः। ककारः पदान्ते विद्यमानः झल् भवति। तस्य जश् आदेशः गकारः। चित्+रूपम् = चिद्रूपम्। तकारः पदान्ते विद्यमानः झल् भवति। तस्य जश् आदेशः = दकारः।

**स्वावलोकनप्रश्नाः -**
(१) झलां जशोऽन्ते (८.२.३९) इति सूत्रम् इतः प्राक् कुत्र उपन्यस्तम् ?

(२) झलां जशोऽन्ते (८.२.३९) इति सूत्रेण कः सन्धिः विधीयते ?

(३) झलां जशोऽन्ते (८.२.३९) इति सूत्रस्य उदाहरणं किम् ?

## ५.५ अनुनासिकसन्धिः -

### ५.५.१ अनुनासिकविधायकसूत्रम् -

**(११६) यरोऽनुनासिकेऽनुनासिको वा** (८-४-४५) सूत्रार्थः - पदान्ते विद्यमानानां यर्वर्णानाम् अनुनासिके परे अनुनासिको वा स्यात्- इति।

उदाहरणम् - एतद्+मुरारिः = एतन्मुरारिः। दकारः यर्प्रत्याहारे अन्तर्भवति। मकारः अनुनासिकवर्णः। दकारस्य मकारपरकत्वात् विकल्पेन अनुनासिको भवति। स्थानसाम्यात् दकारस्य नकारः। एतन्मुरारिः। अस्य अनुनासिकस्य वैकल्पिकत्वात् एतद्मुरारिः इति च रूपम्।

**प्रत्यये भाषायां नित्यम् (वा)** वार्त्तिकार्थः - लौकिके प्रयोगे प्रत्ययस्य अनुनासिके परे पूर्वस्य नित्यम् अनुनासिकः भवति।

उदाहरणम् - तत्+मात्रम् = तन्मात्रम्। अत्र मात्रच्प्रत्ययस्य अनुनासिकः मकारः। तस्मिन् परे पूर्वस्य तकारस्य नित्यम् अनुनासिकः। चित्+मयम् = चिन्मयम्। अत्र मयट्प्रत्ययस्य अनुनासिकः मकारः। तस्मिन् परे पूर्वस्य तकारस्य नित्यम् अनुनासिकः।

**स्वावलोकनप्रश्नौ -**
(१) एतन्मुरारिः, एतद्मुरारिः इति रूपद्वयं कथं भवति ?

(२) लौकिके प्रयोगे प्रत्ययस्य अनुनासिके परे पूर्वस्य नित्यम् अनुनासिकः भवति उत विकल्पेन ?

## ५.६ परसवर्णसन्धिः -

परवर्णस्य सदृशः वर्णः पूर्ववर्णस्य स्थाने भवति।

### ५.६.१ परसवर्णविधायकसूत्रम् -

**(११७) तोर्लि** (८-४-६०) सूत्रार्थः - तवर्गस्य लकारे परे परसवर्णः स्यात्- इति।

उदाहरणम् - तत्+लयः = तल्लयः। अत्र तकारस्य परसवर्णः = लकारः जातः।

विद्वान्+लिखति = विद्वाल्ँलिखति। अत्र नकारस्य परसवर्णः। नकारस्य अनुनासिकत्वात् अनुनासिको लकारः।

**स्वावलोकनप्रश्नौ -**
(१) परसवर्णविधायकं सूत्रं किम् ?

(२) विद्वाल्ँलिखति इत्यत्र अनुनासिकलकारः कथमागतः ?

## ५.७ पूर्वसवर्णसन्धिः -

पूर्ववर्णस्य सदृशः वर्णः परवर्णस्य स्थाने भवति।

### ५.७.१ पूर्वसवर्णविधायकसूत्रम् -

**(११८) उदः स्थास्तम्भोः पूर्वस्य (८-४-६१)** सूत्रार्थः - उत् इत्यस्मात् परस्य स्थाधातोः, स्तम्भुधातोः च आद्यवयवस्य सकारस्य पूर्वसवर्णः भवति- इति।

उदाहरणम् - उत्+स्थानम् इत्यवस्थायाम्- सकारः अघोषः महाप्राणः इति हेतोः तादृश एव वर्णः धकार पूर्वसवर्णः भवति। उत्+थ्+थानम् इति स्थिते **झरो झरि सवर्णे (८-४-६५)** इत्यनेन प्रथमथकारस्य लोपः। उत्थानम् इति रूपम्। थकारस्य लोपाभावपक्षे उत्थ्थानम् इति रूपम्।

उत्+स्तम्भनम् इत्यवस्थायाम्- सकारः अघोषः महाप्राणः इति हेतोः तादृश एव वर्णः थकारः पूर्वसवर्णः भवति। उत्+थ्+तम्भनम् इति स्थिते **झरो झरि सवर्णे (८-४-६५)** इत्यनेन थकारस्य लोपः उत्तम्भनम् इति रूपम्। थकारस्य लोपाभावपक्षे उत्थ्तम्भनम् इति रूपम्।

**(११९) झयो होऽन्यतरस्याम् (८-४-६२)** सूत्रार्थः - झय्वर्णस्य परं विद्यमानस्य हकारस्य पूर्वसवर्णो वा स्यात्- इति।

वाग्+हरिः = वाग्घरिः। बाह्यप्रयत्नेन घोषवतः नादवतः महाप्राणस्य संवृतकण्ठस्य हकारस्य स्थाने तादृशः एव वर्गचतुर्थवर्णः एव आदेशः भवति। पूर्वं गकारः अस्ति। तस्य साम्यात् घकारादेशः। वाग्घरिः इति रूपम्। पूर्वसवर्णाभावे वाग्हरिः इति रूपम्।

**स्वावलोकनप्रश्नौ -**
(१) पूर्वसवर्णविधायकं सूत्रद्वयं किम् ?

(२) उत् + स्तम्भनम् इत्यस्य रूपद्वयं किम् ?

(३) झयो होऽन्यतरस्याम् (८-४-६२) सूत्रस्य उदाहरणं किम् ?

## ५.८ छत्वसन्धिः -

### ५.८.१ छत्वविधायकसूत्रम् -

**(१२०) शश्छोऽटि (८-४-६३)** सूत्रार्थः - पदान्तात् झयः परस्य शकारस्य अटि परे छकारः विकल्पेन भवति।

उदाहरणम् - तच्+शिवः इत्यवस्थायाम् अनेन सूत्रेण शकारस्य छकारः। तच्छिवः इति रूपम्। छत्वाभावे तच्शिवः इति रूपम्।

**स्वावलोकनप्रश्नौ -**

(१) छत्वं विकल्पेन भवति उत नित्यम् ?

(२) शकारानन्तरं कः वर्णः अस्ति चेत् शकारस्य छत्वं भवति ?

## ५.९ चर्त्वसन्धिः -

पूर्वसूत्रस्य उदाहरणे तच्+शिवः इति विग्रहः प्रदर्शितः। तद्शब्दस्य चकारः कथमागतः इति ज्ञास्यामः। तद्+शिवः इति स्थिते **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन दकारस्य जकारः भवति। तज्+शिवः इत्यवस्थायाम् जकारस्य चर्त्वेन चकारः विधीयते -

### ५.९.१ चर्त्वविधायकसूत्रम् -

**(१२१) खरि च (८-४-५५)** सूत्रार्थः - झल्वर्णस्य खर्वर्णे परे झल्स्थाने चर्वर्णाः भवन्ति- इति।

उदाहरणम् - तज्+शिवः इत्यवस्थायाम् जकारस्य चर्त्वेन चकारः भवति। **शश्छोऽटि (८-४-६३)** इत्यनेन शकारस्य छकारादेशे तच्+छिवः = तच्छिवः इति रूपम्। शकारस्य छत्वाभावे तच्+शिवः = तच्शिवः इति रूपम्।

**स्वावलोकनप्रश्नौ -**

(१) तज्+शिवः इत्यवस्थायां जकारस्य चकारः केन सूत्रेण ?

(२) चर्वर्णाः के ?

## ५.१० छत्वसन्धिः -

### ५.१०.१ छत्वविधायकवार्त्तिकम् -

इदानीं छत्वविधायकं वार्त्तिकं पठामः -

**छत्वममीति वाच्यम् (वा)**। वार्त्तिकार्थः - पदान्तात् झयः परस्य शकारस्य अमि परे छकारः विकल्पेन भवति- इति। **शश्छोऽटि (८-४-६३)** इति सूत्रे अटि परे इत्युक्तम्। अस्मिन् वार्त्तिके अमि परे इत्युक्तम्।

उदाहरणम् - तच्+श्लोकेन = तच्छ्लोकेन इति रूपम्। शकारोत्तर-लकारः अटि नान्तर्भवति। अमि अन्तर्भवति। अतः "अमि" इति उक्तम्। अतः छकारः। छत्वाभावे तच्श्लोकेन इति रूपम्।

**स्वावलोकनप्रश्नौ -**

(१) छत्वममीति वाच्यम् (वा) इति वार्त्तिकेन नूतनतया किमुक्तम् ?

(२) अमीति कथनेन को लाभः ?

## ५.११ अनुस्वारसन्धिः -

### ५.११.१ अनुस्वारविधायकसूत्रम् -

**(१२२) मोऽनुस्वारः (८-३-२३)** सूत्रार्थः - मकारान्तस्य पदस्य हलि परे अनुस्वारः स्यात्- इति।

उदाहरणम् - हरिम्+वन्दे = हरिं वन्दे। हरिम् इत्यत्र मकारः पदान्ते अस्ति। वन्दे इत्यत्र वकारः हलि अन्तर्भवति। अतः मकारस्य अनुस्वारः।

**(१२३) नश्चापदान्तस्य झलि (८-४-२४)** सूत्रार्थः - पदमध्ये विद्यमानस्य नकारस्य अथ वा मकारस्य झलि परे अनुस्वारः भवति- इति।

उदाहरणम् - यशान्+सि = यशांसि। पदमध्ये नकारः अस्ति। सकारः झल् भवति। अतः नकारस्य अनुस्वारः।

आक्रम्+स्यते = आक्रंस्यते। पदमध्ये मकारः अस्ति। सकारः झल् भवति। अतः मकारस्य अनुस्वारः।

**स्वावलोकनप्रश्नौ -**

(१) मोऽनुस्वारः (८-३-२३) इति सूत्रेण कुत्र विद्यमानस्य मकारस्य अनुस्वारः भवति ?

(२) नश्चापदान्तस्य झलि (८-४-२४) इति सूत्रेण कुत्र विद्यमानयोः नकारमकारयो अनुस्वार भवति ?

## ५.१२ परसवर्णसन्धिः -

### ५.१२.१ परसवर्णविधायकसूत्रम् -

**(१२४) अनुस्वारस्य ययि परसवर्णः (८-४-५८)** सूत्रार्थः - यय्वर्णे परे अनुस्वारस्य परस्य सवर्णः भवति। पदमध्ये भवति।

उदाहरणम् - अं+कितः = अङ्कितः। अं+चितः = अञ्चितः। कुं+ठितः = कुण्ठितः। शां+तः = शान्तः। गुं+फितः = गुम्फितः। अत्र उदाहरणेषु परस्य वर्णस्य स्थानसाम्यात् क्रमशः ङ-ञ-ण-न-मवर्णाः सवर्णत्वेन आगताः।

**(१२५) वा पदान्तस्य (८-४-५९)** सूत्रार्थः - पदान्तस्य अनुस्वारस्य ययि परे परसवर्णो वा स्यात्- इति।

उदाहरणम् - त्वं+करोषि = त्वङ्करोषि। अनुस्वारस्य परसवर्णपक्षे रूपम्। त्वं करोषि। परसवर्णाभावे रूपम्।

सं+यन्ता = सँय्यन्ता। अनुस्वारस्य परसवर्णपक्षे सानुनासिकयकारस्य रूपम्। परसवर्णाभावे संयन्ता इति रूपम्।

सं+वत्सरः = सँव्वत्सरः। अनुस्वारस्य परसवर्णपक्षे सानुनासिकवकारस्य रूपम्। परसवर्णाभावे संवत्सरः इति रूपम्।

यं+लोकम् = यँल्लोकम्। अनुस्वारस्य परसवर्णपक्षे सानुनासिकलकारस्य रूपम्। परसवर्णाभावे यंलोकम् इति रूपम्।

**स्वावलोकनप्रश्नौ -**

(१) पदमध्ये केन सूत्रेण अनुस्वारस्य परसवर्णः भवति ?

(२) पदान्ते केन सूत्रेण अनुस्वारस्य परसवर्णः भवति ?

(३) अनुस्वारस्य यवलपरे कीदृशः परसवर्णः भवति ?

### ५.१२.२ मकारस्थानिक-आदेशः -

**(१२६) मो राजि समः क्वौ (८-२-३५)** सूत्रार्थः - क्विप्प्रत्ययान्ते राजधातौ परे समो मस्य म एव स्यात्- इति।

उदाहरणम् - सम् +राट् = सम्राट्। राजधातोः किप्प्रत्ययः कृतः।

**(१२७) हे मपरे वा (८-३-२६)** सूत्रार्थः - मपरे हकारे परे मस्य म एव विकल्पेन भवति- इति। मपरे हकारे इत्युक्ते हकारस्य मकारपरकत्वं स्यात् = ह्म एवं स्यात्।

उदाहरणम् - किम्+ह्मलयति = किम् ह्मलयति। ह्म इत्यत्र मपरे हकारः अस्ति। अतः मकारस्य मकारः एव भवति। अस्य वैकल्पिकत्वात् पक्षे **मोऽनुस्वारः (८.२.२३)** इत्यनेन अनुस्वारः। किं ह्मलयति इति रूपम्।

**यवलपरे यवला वेति वक्तव्यम् (वा)**। वार्तिकार्थः - यकारे परे हकारे, वकारे परे हकारे, लकारे परे हकारे मकारस्य विकल्पेन यवलाः भवन्ति- इति।

यवलपरे हकारे मकारस्य यवलाः भवन्ति इत्युक्ते यकारे परे हकारे परे मकारस्य यकारः भवति उत वकारः भवति उत लकारः भवति इति शङ्कायाम् - प्रकरणवशात् परिभाषामारभते -

### ५.१२.३ समसङ्ख्यानुदेशः -

लोके यथा "शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय" इत्यादिस्थलेषु शत्रुं जय, मित्रं रञ्जय, विपत्तिं भञ्जय इति सुबन्तस्य क्रियापदेन समसङ्ख्यानुदेशः भवति तद्वदत्रापि शास्त्रे समसङ्ख्यानुदेशः भवति। तद्यथा -

**(१२८) यथासङ्ख्यमनुदेशः समानाम् (१-३-१०)** अनुदेशः = विधानम्। सूत्रार्थः - स्थान्यादेशयोः समसङ्ख्याकः यः विधिः सः यथासङ्ख्यं स्यात्- इति। अर्थात् प्रथमस्य स्थानिनः प्रथमः आदेशः, द्वितीयस्य स्थानिनः द्वितीयः आदेशः एवं क्रमेण। अतः यकारे परे हकारे मकारस्य यकारः एव भवति, वकारे परे हकारे मकारस्य वकारः एव भवति, लकारे परे हकारे मकारस्य लकारः एव भवति। मकारस्य स्थानसाम्यात् सानुनासिकाः एव यवलाः भवन्ति।

उदाहरणम् - किम्+ह्यः = कियँ ह्यः। किम्+ह्वलयति = किवँ ह्वलयति। किम्+ह्लादयति = किलँ ह्लादयति। यवलादेशे रूपाणि।

किंह्यः। किंह्वलयति । किंह्लादयति । यवलाभावे पक्षे **मोऽनुस्वारः (८.२.२३)** इत्यनेन अनुस्वारस्य रूपाणि।

### ५.१२.४ विकल्पेन मकारस्थानिक-आदेशः -

**(१२९) न परे नः (८-३-२७)** सूत्रार्थः - नपरे हकारे (ह्+न) मकारस्य नः विकल्पेन भवति- इति।

उदाहरणम् - किम् ह्नुते = किन्ह्नुते। नकारादेशे रूपम्। किंह्नुते। नकाराभावे पक्षे **मोऽनुस्वारः (८.२.२३)** इत्यनेन अनुस्वारस्य रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) कदा समो मकारस्य म एव भवति ?

(२) हे मपरे वा (८-३-२६) इत्यनेन मपरे हकारे परे मस्य म एव विकल्पेन भवति उत नित्यम् ?

(३) यवलपरे यवला वेति वक्तव्यम् (वा) इत्यनेन वार्त्तिकेन यकारे परे हकारे मकारस्य कः आदेशो भवति ?

(४) यथासङ्ख्यमनुदेशः समानाम् (१-३-१०) इति सूत्रं कदा प्रवर्तते ?

(५) किम् ह्नुते इति स्थिते न परे नः (८-३-२७) इति सूत्रस्य अप्रवृत्तौ किं रूपं भवति ?

## ५.१३ कुगागमसन्धिः टुगागमसन्धिश्च -

### ५.१३.१ कुग्टुगागमविधायकसूत्रम् -

**(१३०) ङ्णोः कुक् टुक् शरि (८-३-२८)** सूत्रार्थः - ङकारणकारयोः शर्वर्णे परे ङकारस्य अन्ते कुक् इति आगमः, णकारस्य अन्ते टुक् इति आगमः च विकल्पेन भवति- इति। इत्सञ्ज्ञकवर्णानां लोपानन्तरं कुक् आगमे क् इत्येव अवशिष्यते टुक् आगमे ट् इति अवशिष्यते।

उदाहरणम् - प्राङ्+षष्ठः इति स्थिते अनेन सूत्रेण ङकारस्य अन्ते कुक् आगमे प्राङ्क्+षष्ठः इति भवति। क्+ष =क्ष। अतः प्राङ्क्षष्ठः इति रूपम्। एवमेव सुगण्+ षष्ठः इति स्थिते अनेन सूत्रेण णकारस्य अन्ते टुक् आगमे सुगण्ट् षष्ठः इति रूपम्। कुक्टुकोरभावे प्राङ् षष्ठः, सुगण् षष्ठः इति रूपम्।

अत्र ककारटकारयोः कार्यान्तरं विहितं यथा -

**चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वा)**। पौष्करसादिः इति कश्चित् आचार्यः। वार्त्तिकार्थः - पौष्करसादेः मते वर्गप्रथमवर्णस्य स्थाने वर्गद्वितीयवर्णः भवति- इति।

उदाहरणम् - प्राङ्क्+षष्ठः = प्राङ्ख्षष्ठः। सुगण्ट्+षष्ठः = सुगण्ठ्षष्ठः।

**स्वावलोकनप्रश्नौ -**

(१) ङ्णोः कुक् टुक् शरि (८-३-२८) इत्यनेन कस्य वर्णस्य कः आगमः भवति ? कुत्र भवति ?

(२) प्राङ्क्+षष्ठः इति स्थिते चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वा) वार्त्तिकेन किं रूपं भवति ?

## ५.१४ धुडागमसन्धिः -

### ५.१४.१ धुडागमविधायकसूत्रे -

**(१३१) डः सि धुट् (८-३-२९)** सूत्रार्थः - डकारात् परस्य सकारस्य धुड् इति आगमः वा स्यात्- इति। इत्सञ्ज्ञकवर्णस्य लोपानन्तरं ध् इत्येव अवशिष्यते।

उदाहरणम् - षड्+सन्तः इति स्थिते डात् परं सकारः अस्ति इति हेतोः सकारात् पूर्वं धुट् आगमः। षड्+ध्+सन्तः इति स्थिते सकारं निमित्तीकृत्य धकारस्य **खरि च (८-४-५५)** इत्यनेन चर्त्वं, षड्+त्सन्तः इति जातम्। इदानीं तकारं निमित्तीकृत्य डकारस्य **खरि च (८-४-५५)** इत्यनेन चर्त्वं, षट्त्सन्तः इति रूपम्। धुडागमाभावे षड्+सन्तः इति स्थिते सकारं निमित्तीकृत्य डकारस्य **खरि च (८-४-५५)** इत्यनेन चर्त्वं, षट्सन्तः इति रूपम्।

**(१३२) नश्च (८-३-३०)** सूत्रार्थः - नकारात् परस्य सकारस्य धुड् इति आगमः वा स्यात्- इति। इत्सञ्ज्ञकवर्णस्य लोपानन्तरं ध् इत्येव अवशिष्यते।

उदाहरणम् - सन्+सः इति स्थिते नात् परं सकारः अस्ति इति हेतोः अनेन सूत्रेण सकारात् पूर्वं धुट् आगमः। सन्+ध्+सः इति स्थिते सकारं निमित्तीकृत्य धकारस्य **खरि च (८-४-५५)** इत्यनेन चर्त्वं, सन्त्सः इति रूपम्। धुडागमाभावे सन्सः इति रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) डः सि धुट् (८-३-२९) इत्यनेन धुडागमः डकारस्य उत सकारस्य भवति ?

(२) नश्च (८-३-३०) इत्यनेन कः आगमः विधीयते ?

## ५.१५ तुगागमसन्धिः -

### ५.१५.१ तुगागमविधायकसूत्रम् -

**(१३३) शि तुक् (८-३-३१)** सूत्रार्थः - पदान्तस्य नस्य शकारे परे तुक् इति आगमः विकल्पेन भवति- इति। तुक् इत्यत्र त् इत्येव अवशिष्यते।

### ५.१५.२ सञ्छम्भुः इत्यत्र रूपचतुष्टयम् -

ञछौ ञचछा ञचशा ञशाविति चतुष्टयम् ।
रूपाणामिह तुक्छत्वचलोपानां विकल्पनात् ।। इति।

ञछौ = ञकारछकारयोः एकं रूपम्। ञचछाः = ञकारचकारछकाराणाम् एकं रूपम्। ञचशाः = ञकारचकारशकाराणाम् एकं रूपम्। ञशौ = ञकारशकारयोः एकं रूपम्। इति क्रमेण रूपचतुष्टयं भवति। तुक्, छत्व, चलोप-इत्यतेषां विकल्पनात् रूपचतुष्टयं भवति।

(१) ञकारछकारयोः रूपम् - सन्+शम्भुः इति स्थिते **शि तुक् (८.३.३१)** इत्यनेन तुक् आगमः। सन्त्+शम्भुः इति भवति। **शश्छोऽटि (८.४.६३)** इत्यनेन शकारस्य छादेशः। सन्त्+छम्भुः इति भवति। **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन तकारस्य चकारः। सन्च्+छम्भुः इति भवति। **झरो झरि सवर्णे (८.४.६५)** इत्यनेन चकारस्य लोपे सन्+छम्भुः इति स्थिते **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन नकारस्य ञकारे सञ्छम्भुः इति रूपम्।

(२) ञचछानां रूपम् - सन्+शम्भुः इति स्थिते **शि तुक् (८.३.३१)** इत्यनेन तुक् आगमः। सन्त्+शम्भुः इति भवति। **शश्छोऽटि (८.४.६३)** इत्यनेन शकारस्य छादेशः। सन्त्+छम्भुः इति भवति। **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन तकारस्य चकारः। सन्च्+छम्भुः इति भवति। **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन नकारस्य ञकारे सञ्च्छम्भुः इति रूपम्।

(३) ञचशानां रूपम् - सन्+शम्भुः इति स्थिते **शि तुक् (८.३.३१)** इत्यनेन तुक् आगमः। सन्त्+शम्भुः इति भवति। **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन तकारस्य चकारः। सन्च्+शम्भुः इति स्थिते पुनः **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन नकारस्य ञकारः। सञ्च्शम्भु इति रूपम्।

(४) ञशयोः रूपम् - सन्+शम्भुः इति स्थिते **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन नकारस्य ञकारः। सञ्शम्भुः इति रूपम्।

एवं सञ्छम्भुः इत्यस्य चत्वारि रूपाणि।

**स्वावलोकनप्रश्नौ -**

(१) सञ्छम्भुः इत्यत्र केन सूत्रेण तुगागमः भवति ?

(२) सञ्छम्भुः इत्यस्य कति रूपाणि भवन्ति ?

## ५.१६ ङमुडागमसन्धिः -

### ५.१६.१ ङमुडागमविधायकसूत्रम् -

**(१३४) ङमो ह्रस्वादचि ङमुण्नित्यम्** (८-३-३२) सूत्रार्थः - ह्रस्वात्परो यो ङम् भवति, तदन्तं = ङमन्तं यत्पदं भवति ततः अज्वर्णः स्यात्। अर्थात् ङमन्तं पदं स्यात्, तत्पूर्वम् अकारः स्यात्। ततः परं यः अज्भवति तस्य अचः प्राक् ङमुट् आगमः भवति- इति। ङमुट् इत्युक्ते ङुट्, णुट्,

नुट् इति आगमाः भवन्ति। ते च क्रमशः ङ ण न वर्णानाम् एव भवन्ति।

प्रत्यङ्+आत्मा इति स्थिते, अकारात् परं ङकारः अस्ति। ततः परं = ङकारात् परम् अच् अस्ति। अतः ङकारात् परं विद्यमानस्य अचः प्राक् ङुट् भवति। प्रत्यङ्+ङ्+आत्मा = प्रत्यङ्ङात्मा इति रूपं भवति।

सुगण्+ईशः इति स्थिते अकारात् परं णकारः अस्ति। ततः परं = णकारात् परम् अच् अस्ति। अतः णकारात् परं विद्यमानस्य अचः प्राक् णुट् भवति। सुगण्+ण्+ईशः = सुगण्णीशः इति रूपं भवति।

सन्+अच्युतः इति स्थिते अकारात् परं नकारः अस्ति। ततः परं = नकारात् परम् अच् अस्ति। अतः नकारात् परं विद्यमानस्य अचः प्राक् नुट् भवति। सन्+न्+अच्युतः = सन्नच्युतः इति रूपं भवति।

**स्वावलोकनप्रश्नौ -**

(१) ङमुट् इत्युक्ते के आगमाः भवन्ति ?

(२) ङमो ह्रस्वादचि ङमुण्नित्यम् (८-३-३२) इत्यनेन केषां वर्णानां के आगमाः भवन्ति ?

## ५.१६.२ संस्कर्ता इति शब्दस्य अष्टोत्तरशतं रूपाणि -

सम् उपसर्गपूर्वककृधातोः तृचि **सम्परिभ्यां करोतौ भूषणे (६.१.१३७)** इति सूत्रेण भूषणार्थे सुट् आगमः भवति। तदा सम्+स्कर्ता इति स्थिते -

**(१३५) समः सुटि (८-३-५)** सूत्रार्थः - सम् इत्यस्य मकारस्य सुटि परे रु- इति आदेशो भवति- इति। स्कर्ता इत्यत्र सुट् प्रत्ययस्य सकारः अस्ति इति हेतोः समः मकारस्य रुत्वम्। सर्+स्कर्ता इति स्थिते -

**(१३६) अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** सूत्रार्थः - अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् - इति। सर्+ स्कर्ता इत्यत्र रोः पूर्वं सकारोत्तर-अकारः अस्ति। सः अकारः विकल्पेन अनुनासिको भवति। सँर्+स्कर्ता इति स्थिते-

**(१३७) अनुनासिकात्परोऽनुस्वारः (८-३-४)** सूत्रार्थः - अनुनासिकं विहाय रोः पूर्वस्मात् परः अनुस्वारागमः स्यात्- इति। अर्थात् रोः पूर्वं यदा अनुनासिकः न भवति तदा अनुस्वारः भवति - इति। **अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** इति सूत्रस्य वैकल्पिकत्वात् अनुनासिकाभावे तस्य अकारस्य समनन्तरम् अनुस्वारः भवति। तदा संस्+स्कर्ता इति स्थिते **खरवसानयोर्विसर्जनीयः (८.३.१५)** इत्यनेन रोः विसर्गः। सं :+ स्कर्ता इति स्थिते

**(१३८) विसर्जनीयस्य सः (८-३-३४)** सूत्रार्थः - खरि परे विसर्जनीयस्य सः स्यात्- इति। सकारः खरि अन्तर्भवति। अतः विसर्गस्य सकारः।

विसर्गस्य **विसर्जनीयस्य सः** (८-३-३४) इत्यनेन सकारे प्राप्ते तदपवादभूतेन **वा शरि** (८.३.३६) इत्यनेन विसर्गस्य विसर्गः एव प्राप्नोति। तदा -

**संपुंकानां सो वक्तव्यः (वा)**। वार्त्तिकार्थः - सम्, पुम्, किम्- इत्येतेषां विसर्गस्य सकारो भवति- इति। अतः **वा शरि** (८.३.३६) इत्यनेन विधीयमानः विसर्गः न भवति। अतः संस्+स्कर्ता = संस्स्कर्ता इति अनुनासिकाभावपक्षे रूपम्। अनुनासिकपक्षे तु सँस्स्कर्ता इति रूपम्।

**समो वा लोपमेके** इति भाष्यम्। अनेन भाष्यवाक्येन सम् इत्यस्य मकारस्य लोपः भवति। तदा एकसकारः भवति।

**शरः खयः (वा)** इति वार्त्तिकार्थः - शर्वर्णात् परं विद्यमानस्य खय्वर्णस्य द्वित्वं भवति- इति। अनेन वार्त्तिकेन सकारात् परं विद्यमानस्य ककरास्य द्वित्वं भवति।

**अत्रेदमवधेयम् -**

यत्र यत्र एकसकारश्रवणं भवति तत्र तत्र **समो वा लोपमेके** इति भाष्यवाक्येन समो मकारस्य लोपात् एकसकार इति मन्तव्यम्। यत्र यत्र त्रिसकारश्रवणं यत्र यत्र द्व्यनुस्वारश्रवणं च तत्र तत्र **अनचि च** (८.४.४७) इति सूत्रेण द्वित्वमिति अवधेयम्। **शरः खयः (वा)** इति वार्त्तिकेन शर्वर्णात् परस्य खर्वर्णस्य द्वित्वं भवति। अतः यत्र यत्र द्विककारश्रवणं तत्र तत्र **शरः खयः (वा)** इति वार्त्तिकेन द्वित्वम् इति मन्तव्यम्। **अचो रहाभ्यां द्वे** (८.४.४६) इत्यनेन तकारस्य द्वित्वमिति ज्ञेयम्। **यणो मयो द्वे वाच्ये (वा)** इति वार्त्तिकेन पुनः तकारस्य द्वित्वे त्रितकारमिति ज्ञेयम्। **अणोऽप्रगृह्यस्यानुनासिकः** (८.४.५७) इति सूत्रेण तकारोत्तरस्य आकारस्य विकल्पेन अनुनासिकत्वमिति मन्तव्यम्।

**अष्टोत्तरशतं रूपाणि -**

| | | |
|---|---|---|
| १. | सँस्स्ककर्ता | अनुनासिक - द्विस - क - त - सहितं रूपम्। |
| २. | संस्स्कर्ता | अनुस्वार - द्विस - क - त - सहितं रूपम्। |
| ३. | सँस्कर्ता | अनुनासिक - स - क - त - सहितं रूपम्। |
| ४. | संस्कर्ता | अनुस्वार - स - क - त - सहितं रूपम्। |
| ५. | सँस्स्स्कर्ता | अनुनासिक - त्रिस - क - त - सहितं रूपम्। |
| ६. | संस्स्स्कर्ता | अनुस्वार - त्रिस - क - त - सहितं रूपम्। |
| ७. | सँस्क्कर्ता | अनुनासिक - स - द्विक - त - सहितं रूपम्। |
| ८. | सँस्स्क्कर्ता | अनुनासिक - द्विस - द्विक - त - सहितं रूपम्। |
| ९. | सँस्स्स्क्कर्ता | अनुनासिक - त्रिस - द्विक - त - सहितं रूपम्। |
| १०. | संंस्कर्ता | द्व्यनुस्वार - स - क - त - सहितं रूपम्। |
| ११. | संंस्स्कर्ता | द्व्यनुस्वार - द्विस - क - त - सहितं रूपम्। |
| १२. | संंस्स्स्कर्ता | द्व्यनुस्वार - त्रिस - क - त - सहितं रूपम्। |
| १३. | संस्क्कर्ता | अनुस्वार - स - द्विक - त - सहितं रूपम्। |

| | | |
|---|---|---|
| १४. | संस्स्क्कर्ता | अनुस्वार - द्विस - द्विक - त - सहितं रूपम्। |
| १५. | संस्स्स्क्कर्ता | अनुस्वार - त्रिस - द्विक - त - सहितं रूपम्। |
| १६. | सँस्क्कर्ता | द्व्यनुस्वार - स - द्विक - त - सहितं रूपम्। |
| १७. | सँस्स्क्कर्ता | द्व्यनुस्वार - द्विस - द्विक - त - सहितं रूपम्। |
| १८. | सँस्स्स्क्कर्ता | द्व्यनुस्वार - त्रिस - द्विक - त - सहितं रूपम्। |
| १९. | सँस्कर्त्ता | अनुनासिक - स - क - द्वित - सहितं रूपम्। |
| २०. | सँस्स्कर्त्ता | अनुनासिक - द्विस - क - द्वित - सहितं रूपम्। |
| २१. | सँस्स्स्कर्त्ता | अनुनासिक - त्रिस - क - द्वित - सहितं रूपम्। |
| २२. | सँस्क्कर्त्ता | अनुनासिक - स - द्विक - द्वित - सहितं रूपम्। |
| २३. | सँस्स्क्कर्त्ता | अनुनासिक - द्विस - द्विक - द्वित - सहितं रूपम्। |
| २४. | सँस्स्स्क्कर्त्ता | अनुनासिक - त्रिस - द्विक - द्वित - सहितं रूपम्। |
| २५. | संस्कर्त्ता | अनुस्वार - स - क - द्वित - सहितं रूपम्। |
| २६. | संस्स्कर्त्ता | अनुस्वार - द्विस - क - द्वित - सहितं रूपम्। |
| २७. | संस्स्स्कर्त्ता | अनुस्वार - त्रिस - क - द्वित - सहितं रूपम्। |
| २८. | सँस्कर्त्ता | द्व्यनुस्वार - स - क - द्वित - सहितं रूपम्। |
| २९. | सँस्स्कर्त्ता | द्व्यनुस्वार - द्विस - क - द्वित - सहितं रूपम्। |
| ३०. | सँस्स्स्कर्त्ता | द्व्यनुस्वार - त्रिस - क - द्वित - सहितं रूपम्। |
| ३१. | संस्क्कर्त्ता | अनुस्वार - स - द्विक - द्वित - सहितं रूपम्। |
| ३२. | संस्स्क्कर्त्ता | अनुस्वार - द्विस - द्विक - द्वित - सहितं रूपम्। |
| ३३. | संस्स्स्क्कर्त्ता | अनुस्वार - त्रिस - द्विक - द्वित - सहितं रूपम्। |
| ३४. | सँस्क्कर्त्ता | द्व्यनुस्वार - स - द्विक - द्वित - सहितं रूपम्। |
| ३५. | सँस्स्क्कर्त्ता | द्व्यनुस्वार - द्विस - द्विक - द्वित - सहितं रूपम्। |
| ३६. | सँस्स्स्क्कर्त्ता | द्व्यनुस्वार - त्रिस - द्विक - द्वित - सहितं रूपम्। |
| ३७. | सँस्कर्त्त्ता | अनुनासिक - स - क - त्रित - सहितं रूपम्। |
| ३८. | सँस्स्कर्त्त्ता | अनुनासिक - द्विस - क - त्रित - सहितं रूपम्। |
| ३९. | सँस्स्स्कर्त्त्ता | अनुनासिक - त्रिस - क - त्रित - सहितं रूपम्। |
| ४०. | सँस्क्कर्त्त्ता | अनुनासिक - स - द्विक - त्रित - सहितं रूपम्। |
| ४१. | सँस्स्क्कर्त्त्ता | अनुनासिक - द्विस - द्विक - त्रित - सहितं रूपम्। |
| ४२. | सँस्स्स्क्कर्त्त्ता | अनुनासिक - त्रिस - द्विक - त्रित - सहितं रूपम्। |
| ४३. | संस्कर्त्त्ता | अनुस्वार - स - क - त्रित - सहितं रूपम्। |
| ४४. | संस्स्कर्त्त्ता | अनुस्वार - द्विस - क - त्रित - सहितं रूपम्। |
| ४५. | संस्स्स्कर्त्त्ता | अनुस्वार - त्रिस - क - त्रित - सहितं रूपम्। |

| | | |
|---|---|---|
| ४६. | स̈स्कर्त्ता | द्व्यनुस्वार - स - क - त्रित - सहितं रूपम्। |
| ४७. | स̈स्स्कर्त्ता | द्व्यनुस्वार - द्विस - क - त्रित - सहितं रूपम्। |
| ४८. | स̈स्स्स्कर्त्ता | द्व्यनुस्वार - त्रिस - क - त्रित - सहितं रूपम्। |
| ४९. | संस्क्कर्त्ता | अनुस्वार - स - द्विक - त्रित - सहितं रूपम्। |
| ५०. | संस्स्क्कर्त्ता | अनुस्वार - द्विस - द्विक - त्रित - सहितं रूपम्। |
| ५१. | संस्स्स्क्कर्त्ता | अनुस्वार - त्रिस - द्विक - त्रित - सहितं रूपम्। |
| ५२. | स̈स्क्कर्त्ता | द्व्यनुस्वार - स - द्विक - त्रित - सहितं रूपम्। |
| ५३. | स̈स्स्क्कर्त्ता | द्व्यनुस्वार - द्विस - द्विक - त्रित - सहितं रूपम्। |
| ५४. | स̈स्स्स्क्कर्त्ता | द्व्यनुस्वार - त्रिस - द्विक - त्रित - सहितं रूपम्। |
| ५५. | सँस्ककर्ताँ | अनुनासिक - द्विस - क - त - अनुनासिक-सहितं रूपम्। |
| ५६. | संस्स्कर्ताँ | अनुस्वार - द्विस - क - त - अनुनासिक-सहितं रूपम्। |
| ५७. | सँस्कर्ताँ | अनुनासिक - स - क - त - अनुनासिक-सहितं रूपम्। |
| ५८. | संस्कर्ताँ | अनुस्वार - स - क - त - अनुनासिक-सहितं रूपम्। |
| ५९. | सँस्स्स्कर्ताँ | अनुनासिक - त्रिस - क - त - अनुनासिक-सहितं रूपम्। |
| ६०. | संस्स्स्कर्ताँ | अनुस्वार - त्रिस - क - त - अनुनासिक-सहितं रूपम्। |
| ६१. | सँस्क्कर्ताँ | अनुनासिक - स - द्विक - त - अनुनासिक-सहितं रूपम्। |
| ६२. | सँस्स्क्कर्ताँ | अनुनासिक - द्विस - द्विक - त - अनुनासिक-सहितं रूपम्। |
| ६३. | सँस्स्स्क्कर्ताँ | अनुनासिक - त्रिस - द्विक - त - अनुनासिक-सहितं रूपम्। |
| ६४. | स̈स्कर्ताँ | द्व्यनुस्वार - स - क - त - अनुनासिक-सहितं रूपम्। |
| ६५. | स̈स्स्कर्ताँ | द्व्यनुस्वार - द्विस - क - त - अनुनासिक-सहितं रूपम्। |
| ६६. | स̈स्स्स्कर्ताँ | द्व्यनुस्वार - त्रिस - क - त - अनुनासिक-सहितं रूपम्। |
| ६७. | संस्क्कर्ताँ | अनुस्वार - स - द्विक - त - अनुनासिक-सहितं रूपम्। |
| ६८. | संस्स्क्कर्ताँ | अनुस्वार - द्विस - द्विक - त - अनुनासिक-सहितं रूपम्। |
| ६९. | संस्स्स्क्कर्ताँ | अनुस्वार - त्रिस - द्विक - त - अनुनासिक-सहितं रूपम्। |
| ७०. | स̈स्क्कर्ताँ | द्व्यनुस्वार - स - द्विक - त - अनुनासिक-सहितं रूपम्। |
| ७१. | स̈स्स्क्कर्ताँ | द्व्यनुस्वार - द्विस - द्विक - त - अनुनासिक-सहितं रूपम्। |
| ७२. | स̈स्स्स्क्कर्ताँ | द्व्यनुस्वार - त्रिस - द्विक - त - अनुनासिक-सहितं रूपम्। |
| ७३. | सँस्कर्त्ताँ | अनुनासिक - स - क - द्वित - अनुनासिक-सहितं रूपम्। |
| ७४. | सँस्स्कर्त्ताँ | अनुनासिक - द्विस - क - द्वित - अनुनासिक-सहितं रूपम्। |
| ७५. | सँस्स्स्कर्त्ताँ | अनुनासिक - त्रिस - क - द्वित - अनुनासिक-सहितं रूपम्। |
| ७६. | सँस्क्कर्त्ताँ | अनुनासिक - स - द्विक - द्वित - अनुनासिक-सहितं रूपम्। |
| ७७. | सँस्स्क्कर्त्ताँ | अनुनासिक - द्विस - द्विक - द्वित - अनुनासिक-सहितं रूपम्। |

| | | |
|---|---|---|
| ७८. | सँस्स्स्क्कर्त्ताँ | अनुनासिक - त्रिस - द्विक - द्वित - अनुनासिक-सहितं रूपम्। |
| ७९. | संस्कर्त्ताँ | अनुस्वार - स - क - द्वित - अनुनासिक-सहितं रूपम्। |
| ८०. | संस्स्कर्त्ताँ | अनुस्वार - द्विस - क - द्वित - अनुनासिक-सहितं रूपम्। |
| ८१. | संस्स्स्कर्त्ताँ | अनुस्वार - त्रिस - क - द्वित - अनुनासिक-सहितं रूपम्। |
| ८२. | संस्कर्त्ताँ | द्व्यनुस्वार - स - क - द्वित - अनुनासिक-सहितं रूपम्। |
| ८३. | संस्स्कर्त्ताँ | द्व्यनुस्वार - द्विस - क - द्वित - अनुनासिक-सहितं रूपम्। |
| ८४. | संस्स्स्कर्त्ताँ | द्व्यनुस्वार - त्रिस - क - द्वित - अनुनासिक-सहितं रूपम्। |
| ८५. | संस्क्कर्त्ताँ | अनुस्वार - स - द्विक - द्वित - अनुनासिक-सहितं रूपम्। |
| ८६. | संस्स्क्कर्त्ताँ | अनुस्वार - द्विस - द्विक - द्वित - अनुनासिक-सहितं रूपम्। |
| ८७. | संस्स्स्क्कर्त्ताँ | अनुस्वार - त्रिस - द्विक - द्वित - अनुनासिक-सहितं रूपम्। |
| ८८. | संस्क्कर्त्ताँ | द्व्यनुस्वार - स - द्विक - द्वित - अनुनासिक-सहितं रूपम्। |
| ८९. | संस्स्क्कर्त्ताँ | द्व्यनुस्वार - द्विस - द्विक - द्वित - अनुनासिक-सहितं रूपम्। |
| ९०. | संस्स्स्क्कर्त्ताँ | द्व्यनुस्वार - त्रिस - द्विक - द्वित - अनुनासिक-सहितं रूपम्। |
| ९१. | सँस्कर्त्त्ताँ | अनुनासिक - स - क - त्रित - अनुनासिक-सहितं रूपम्। |
| ९२. | सँस्स्कर्त्त्ताँ | अनुनासिक - द्विस - क - त्रित - अनुनासिक-सहितं रूपम्। |
| ९३. | सँस्स्स्कर्त्त्ताँ | अनुनासिक - त्रिस - क - त्रित - अनुनासिक-सहितं रूपम्। |
| ९४. | सँस्क्कर्त्त्ताँ | अनुनासिक - स - द्विक - त्रित - अनुनासिक-सहितं रूपम्। |
| ९५. | सँस्स्क्कर्त्त्ताँ | अनुनासिक - द्विस - द्विक - त्रित - अनुनासिक-सहितं रूपम्। |
| ९६. | सँस्स्स्क्कर्त्त्ताँ | अनुनासिक - त्रिस - द्विक - त्रित - अनुनासिक-सहितं रूपम्। |
| ९७. | संस्कर्त्त्ताँ | अनुस्वार - स - क - त्रित - अनुनासिक-सहितं रूपम्। |
| ९८. | संस्स्कर्त्त्ताँ | अनुस्वार - द्विस - क - त्रित - अनुनासिक-सहितं रूपम्। |
| ९९. | संस्स्स्कर्त्त्ताँ | अनुस्वार - त्रिस - क - त्रित - अनुनासिक-सहितं रूपम्। |
| १००. | संस्कर्त्त्ताँ | द्व्यनुस्वार - स - क - त्रित - अनुनासिक-सहितं रूपम्। |
| १०१. | संस्स्कर्त्त्ताँ | द्व्यनुस्वार - द्विस - क - त्रित - अनुनासिक-सहितं रूपम्। |
| १०२. | संस्स्स्कर्त्त्ताँ | द्व्यनुस्वार - त्रिस - क - त्रित - अनुनासिक-सहितं रूपम्। |
| १०३. | संस्क्कर्त्त्ताँ | अनुस्वार - स - द्विक - त्रित - अनुनासिक-सहितं रूपम्। |
| १०४. | संस्स्क्कर्त्त्ताँ | अनुस्वार - द्विस - द्विक - त्रित - अनुनासिक-सहितं रूपम्। |
| १०५. | संस्स्स्क्कर्त्त्ताँ | अनुस्वार - त्रिस - द्विक - त्रित - अनुनासिक-सहितं रूपम्। |
| १०६. | संस्क्कर्त्त्ताँ | द्व्यनुस्वार - स - द्विक - त्रित - अनुनासिक-सहितं रूपम्। |
| १०७. | संस्स्क्कर्त्त्ताँ | द्व्यनुस्वार - द्विस - द्विक - त्रित - अनुनासिक-सहितं रूपम्। |
| १०८. | संस्स्स्क्कर्त्त्ताँ | द्व्यनुस्वार - त्रिस - द्विक - त्रित - अनुनासिक-सहितं रूपम्। |

एवं संस्कर्ता इति शब्दस्य अष्टोत्तरशतं रूपाणि। लक्ष्ये लक्षणं सकृदेव प्रवर्तते इति

न्यायात् द्व्यनुस्वारस्थले पुनः अनुस्वारस्य, त्रिसकारस्थले पुनः सकारस्य, द्विककारस्थले पुनः ककारस्य, त्रितकारस्थले पुनः तकारस्य च द्वित्वं न भवति।

**स्वावलोकनप्रश्नौ -**

(१) संस्कर्ता इत्यत्र समः मकारस्य लोपः कथं भवति ?

(२) तकारोत्तर-आकारः केन सूत्रेण अनुनासिकः भवति ? कतिषु रूपेषु तत्सूत्रं प्रवर्तते ?

### ५.१६.३ मकारस्थानिक-आदेशः -

**(१३९) पुमः खय्यम्परे (८-३-६)** सूत्रार्थः - अम्परे खयि (प्रथमं खय् वर्णः स्यात्, ततः अम् वर्णः भवेत्) पुम्शब्दस्य मकारस्य रुः स्यात्- इति।

उदाहरणम् - पुम्+कोकिलः इति स्थिते अनेन सूत्रेण मकारस्य रुत्वे पुर्+कोकिलः इति भवति। तदा **अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** इत्यनेन पकारोत्तर-उकारः विकल्पेन अनुनासिकः भवति। पुँर्+कोकिलः इति स्थिते सम्पुङ्कानां सो वक्तव्यः (वा) इति वार्त्तिकेन रुत्वस्य सकारः। पुँस्+कोकिलः = पुँस्कोकिलः इति रूपम्। **अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** इति सूत्रस्य अप्रवृत्तौ **अनुनासिकात्परोऽनुस्वारः (८-३-४)** इत्यनेन उकारात् परम् अनुस्वारागमः भवति। पुंर्+कोकिलः इति भवति। तदा **सम्पुङ्कानां सो वक्तव्यः (वा)** इति वार्त्तिकेन रुत्वस्य सकारः। पुंस्+कोकिलः = पुंस्कोकिलः इति रूपम्।

एवमेव- पुम्+पुत्रः इति स्थिते अनेन सूत्रेण मकारस्य रुत्वे पुर्+पुत्रः इति भवति। तदा **अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** इत्यनेन पकारोत्तर-उकारः विकल्पेन अनुनासिकः भवति। पुँर्+पुत्र इति स्थिते **सम्पुङ्कानां सो वक्तव्यः (वा)** इति वार्त्तिकेन रुत्वस्य सकारः। पुँस्+पुत्रः = पुँस्पुत्रः इति रूपम्। **अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** इति सूत्रस्य अप्रवृत्तौ **अनुनासिकात्परोऽनुस्वारः (८-३-४)** इत्यनेन उकारात् परम् अनुस्वारागमः भवति। पुंर्+पुत्रः इति भवति। तदा **सम्पुङ्कानां सो वक्तव्यः (वा)** इति वार्त्तिकेन रोः स्थाने सकारः। पुंस्+पुत्रः = पुंस्पुत्रः इति रूपम्।

**ख्याञादेशे न (वा)। वार्त्तिकार्थः -** ख्याञादेशे परे पुमो मस्य रुत्वं न भवति- इति।

उदाहरणम् - पुंख्यानम् इति। पुम्+ख्यानम् इति स्थिते **मोऽनुस्वारः (८-३-२३)** इत्यनेन मकारस्य अनुस्वारः। पुंख्यानम् इति रूपम्। **वा पदान्तस्य (८-४-५९)** इत्यनेन विकल्पेन अनुस्वारस्य परसवर्णः। अनुस्वारस्य स्थाने ङकारः। पुङ्ख्यानम् इति रूपम्।

**स्वावलोकनप्रश्नौ -**

(१) पुम्शब्दस्य मकारस्य केन सूत्रेण कदा रुत्वं भवति ?

(२) पुम्शब्दस्य मकारस्य कदा रुत्वं न भवति ?

### ५.१६.४ नकारस्थानिक-आदेशः -

(१४०) **नश्छव्यप्रशान्** (८-३-७) सूत्रार्थः - अम्परे छवि (प्रथमं छव् वर्णः स्यात्, ततः अम् वर्णः भवेत्) नकारान्तस्य पदस्य रुः स्यात्। परं प्रशान्शब्दस्य नकारस्य न भवति- इति। नकारस्य रुत्वं भवति। अनेन सूत्रेण नकारस्य स्वाभाविकछकारे परे एव रुत्वं भवति। न तु प्रकारान्तेरेणागते छकारे परे।

उदाहरणम् - शार्ङ्गिन्+छिन्धि इति स्थिते नकारस्य अनेन सूत्रेण रुत्वम्। शार्ङ्गिस्+छिन्धि इति भवति। ततः **अत्रानुनासिकः पूर्वस्य तु वा** (८-३-२) इत्यनेन रुत्वात् पूर्वं विद्यमानस्य इकारस्य अनुनासिक-इकारः। ततः शार्ङ्गिँर्+छिन्धि इति स्थिते **खरवसानयोर्विसर्जनीयः** (८-३-१५) इत्यनेन रुत्वस्य विसर्गः। ततः शार्ङ्गिँः+छिन्धि इति स्थिते **विसर्जनीयस्य सः** (८-३-३४) इत्यनेन विसर्गस्य सकारः। ततः शार्ङ्गिँस्+छिन्धि इति स्थिते **स्तोः श्चुना श्चुः** (८-४-४०) इत्यनेन सकारस्य शकारः। शार्ङ्गिँश्छिन्धि इति रूपम्।

शार्ङ्गिन्+छिन्दि इति स्थिते नकारस्य अनेन सूत्रेण रुत्वम्। शार्ङ्गिर्+छिन्दि इति भवति। अस्यामवस्थायाम् **अत्रानुनासिकः पूर्वस्य तु वा** (८-३-२) इत्यस्य वैकल्पिकत्वात् पक्षे **अनुनासिकात्परोऽनुस्वारः** (८-३-४) इत्यनेन रुत्वात् प्राग्विद्यमानस्य इकारस्य परम् अनुस्वारः आदेशो भवति। ततः शार्ङ्गिंर्+छिन्दि इति स्थिते **खरवसानयोर्विसर्जनीयः** (८-३-१५) इत्यनेन रुत्वस्य विसर्गः। ततः शार्ङ्गिंः+छिन्दि इति स्थिते **विसर्जनीयस्य सः** (८-३-३४) इत्यनेन विसर्गस्य सकारः। ततः शार्ङ्गिंस्+छिन्दि इति स्थिते **स्तोः श्चुना श्चुः** (८-४-४०) इत्यनेन सकारस्य शकारः। शार्ङ्गिंश्छिन्दि इति रूपम्।

चक्रिन्+त्रायस्व इति स्थिते नकारस्य अनेन सूत्रेण रुत्वम्। चक्रिर्+त्रायस्व इति भवति। ततः **अत्रानुनासिकः पूर्वस्य तु वा** (८-३-२) इत्यनेन रुत्वात् पूर्वं विद्यमानस्य इकारस्य अनुनासिक-इकारः। ततः चक्रिँर्+त्रायस्व इति स्थिते **खरवसानयोर्विसर्जनीयः (८-३-१५)** इत्यनेन रुत्वस्य विसर्गः। ततः चक्रिँः+त्रायस्व इति स्थिते **विसर्जनीयस्य सः** (८-३-३४) इत्यनेन विसर्गस्य सकारः। ततः चक्रिँस्+त्रायस्व = चक्रिँस्त्रायस्व इति रूपम्।

चक्रिन्+त्रायस्व इति स्थिते नकारस्य अनेन सूत्रेण रुत्वम्। चक्रिर्+त्रायस्व इति भवति। अस्यामवस्थायाम् **अत्रानुनासिकः पूर्वस्य तु वा** (८-३-२) इत्यस्य वैकल्पिकत्वात् पक्षे **अनुनासिकात्परोऽनुस्वारः** (८-३-४) इत्यनेन रुत्वात् प्राग्विद्यमानस्य इकारस्य परम् अनुस्वारः आदेशो भवति। ततः चक्रिंर्+त्रायस्व इति स्थिते **खरवसानयोर्विसर्जनीयः** (८-३-१५) इत्यनेन रुत्वस्य विसर्गः। ततः चक्रिंः+त्रायस्व इति स्थिते **विसर्जनीयस्य सः** (८-३-३४) इत्यनेन विसर्गस्य सकारः। ततः चक्रिंस्+त्रायस्व = चक्रिंस्त्रायस्व इति रूपम्।

### ५.१६.५ नॄन्पाहि इत्यस्य रूपपञ्चकम् -

(१४१) **नॄन्पे** (८-३-१०) सूत्रार्थः - नॄन् इत्यस्य अन्त्यनकारस्य विकल्पेन रुः स्यात् पकारे परे- इति। नॄर्+पाहि इति भवति।

**(१४२) कुप्वो≍क≍पौ च (८-३-३७)** सूत्रार्थः - विसर्जनीयस्य कवर्गे परे जिह्वामूलीयः, पवर्गे परे उपध्मानीयः च भवति- इति। विसर्गस्य विसर्गोऽपि भवति।

(१) नॄँःपाहि - नृन्+पाहि इति स्थिते **नॄन्पे (८-३-१०)** इत्यनेन अन्त्यनकारस्य रुत्वं भवति। ततः नृर्+पाहि इति स्थिते **अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** इत्यनेन रुत्वात् पूर्वं विद्यमानस्य ऋकारस्य अनुनासिक-ऋकारः। ततः नॄँर्+पाहि इति स्थिते **खरवसानयोर्विसर्जनीयः (८-३-१५)** इत्यनेन रुत्वस्य विसर्गः। ततः नॄँ :+पाहि इति स्थिते **कुप्वो ≍ क ≍ पौ च (८-३-३७)** इत्यनेन विसर्गस्य जिह्वामूलीयः भवति। नॄँ≍पाहि इति रूपम्।

(२) नृंःपाहि - नृन्+पाहि इति स्थिते **नॄन्पे (८-३-१०)** इत्यनेन अन्त्यनकारस्य रुत्वं भवति। ततः नृर्+पाहि इति स्थिते अस्यामवस्थायाम् **अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** इत्यस्य वैकल्पिकत्वात् पक्षे **अनुनासिकात्परोऽनुस्वारः (८-३-४)** इत्यनेन रुत्वात् प्राग्विद्यमानस्य ऋकारस्य परम् अनुस्वारः आदेशो भवति। ततः नृंर्+पाहि इति स्थिते **खरवसानयोर्विसर्जनीयः (८-३-१५)** इत्यनेन रुत्वस्य विसर्गः। ततः नृं :+पाहि इति स्थिते **कुप्वो≍क≍पौ च (८-३-३७)** इत्यनेन विसर्गस्य जिह्वामूलीयः भवति। नृं ≍पाहि इति रूपम्।

(३) नॄँःपाहि - नृन्+पाहि इति स्थिते **नॄन्पे (८-३-१०)** इत्यनेन अन्त्यनकारस्य रुत्वं भवति। ततः नृर्+पाहि इति स्थिते **अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** इत्यनेन रुत्वात् पूर्वं विद्यमानस्य ऋकारस्य अनुनासिक-ऋकारः। ततः नॄँर्+पाहि इति स्थिते **खरवसानयोर्विसर्जनीयः (८-३-१५)** इत्यनेन रुत्वस्य विसर्गः। ततः नॄँ :+पाहि इति स्थिते **कुप्वो ≍ क ≍ पौ च (८-३-३७)** इत्यनेन विसर्गस्य विकल्पेन विसर्गः एव भवति। नॄँःपाहि इति रूपम्।

(४) नृंःपाहि - नृन्+पाहि इति स्थिते **नॄन्पे (८-३-१०)** इत्यनेन अन्त्यनकारस्य रुत्वं भवति। ततः नृर्+पाहि इति स्थिते अस्यामवस्थायाम् **अत्रानुनासिकः पूर्वस्य तु वा (८-३-२)** इत्यस्य वैकल्पिकत्वात् पक्षे **अनुनासिकात्परोऽनुस्वारः (८-३-४)** इत्यनेन रुत्वात् प्राग्विद्यमानस्य ऋकारस्य परम् अनुस्वारः आदेशो भवति। ततः नृंर्+पाहि इति स्थिते **खरवसानयोर्विसर्जनीयः (८-३-१५)** इत्यनेन रुत्वस्य विसर्गः। ततः नृं :+पाहि इति स्थिते **कुप्वो≍क≍पौ च (८-३-३७)** इत्यनेन विसर्गस्य विकल्पेन विसर्गः एव भवति। नृंःपाहि इति रूपम्।

(५) नृन्+ पाहि = नृन्पाहि इति रूपम्।

इत्थं नृन्पाहि इत्यस्य पञ्च रूपाणि भवन्ति।

**स्वावलोकनप्रश्नौ -**

(१) नश्छव्यप्रशान् (८-३-७) इति सूत्रेण कस्य शब्दस्य नकारस्य रुत्वं न भवति ?

(२) नृन् इत्यस्य अन्त्यनकारस्य कदा रुत्वं भवति ?

### ५.१६.६ नकारस्थानिक-आदेशः -

**(१४३) कानाम्रेडिते** (८-३-१२) सूत्रार्थः - कान् इत्यस्य नकारस्य रुः स्यात् आम्रेडिते परे- इति। अर्थात् कान् इत्यस्य शब्दस्य कान् इति शबदे परे इत्यर्थः।

उदाहरणम् - कान्+कान् इति स्थिते अनेन सूत्रेण प्रथमकान्शब्दस्य नकारस्य रुत्वे कार्+कान् इति स्थिते **अत्रानुनासिकः पूर्वस्य तु वा** (८-३-२) इत्यनेन रुत्वात् पूर्वं विद्यमानस्य आकारस्य अनुनासिक-आकारः। ततः काँर्+कान् इति जाते **खरवसानयोर्विसर्जनीयः** (८-३-१५) इत्यनेन रुत्वस्य विसर्गः। काँः+कान् इति स्थिते **सम्पुकानां सो वक्तव्यः (वा)** इति वार्त्तिकेन विसर्गस्य सकारः काँस्+कान् = काँस्कान् इति रूपम्। अथवा काँः+कान् इत्यवस्थायां विसर्गस्य सकारं प्रकारान्तरेणाह -

**(१४४) कस्कादिषु च** (८-३-४८) सूत्रार्थः - कस्कादिगणपठितेषु शबदेषु इणः उत्तरस्य विसर्गस्य षः स्यात्। अन्यत्र = इण्भिन्नस्य उत्तरस्य सकारः भवति - इति।

काँः+ कान् इत्यत्र ककारात् परम् आकारः अस्ति। तदुत्तरं विसर्गः अस्ति। अत विसर्गस्य सकारः। काँस्+कान् = काँस्कान्। कार्+कान् इति स्थिते अस्यामवस्थायाम् **अत्रानुनासिकः पूर्वस्य तु वा** (८-३-२) इत्यस्य वैकल्पिकत्वात् पक्षे **अनुनासिकात्परोऽनुस्वारः** (८-३-४) इत्यनेन रुत्वात् प्राग्विद्यमानस्य आकारस्य परम् अनुस्वारः आदेशो भवति। अत कांर्+कान् इति जाते **खरवसानयोर्विसर्जनीयः** (८-३-१५) इत्यनेन रुत्वस्य विसर्गः। कांः+कान् इति स्थिते **सम्पुकानां सो वक्तव्यः (वा)** इति वार्त्तिकेन अथवा **कस्कादिषु च** (८-३-४८) **इति सूत्रेण** विसर्गस्य सकारः कांस्+कान् = कांस्कान् इति रूपम्।

कस्कादिगणे पठिताः केचन शब्दाः - कः+कः = कस्कः। कुतः+कुतः आदिवृद्धिः = कौतस्कुतः। सर्पिः+कुण्डिका इत्यत्र इणः उत्तरस्य विसर्गः इति हेतोः विसर्गस्य षकारः = सर्पिष्कुण्डिका। एवमेव धनुः+कपालम् = धनुष्कपालम्। आकृतिगणोऽयम् = अस्मिन् गणे एतादृशः शब्दाः अन्तर्भावयितुं शक्यन्ते इत्यर्थः।

| **स्वावलोकनप्रश्नौ -** |
|---|
| (१) कान् इत्यस्य नकारस्य कदा रुत्वं भवति ? |
| (२) कस्कादिगणपठितानां शब्दानां विसर्गस्य कदा सकारः भवति ? |

**(१४५) संहितायाम्** (८-१-७२) सूत्रार्थः - अधिकारसूत्रमिदम्। संहितायाम् इत्यधिकृत्य।

## ५.१७ तुगागमसन्धिः -

### ५.१७.१ तुगागमविधायकसूत्राणि -

**(१४६) छे च** (६-१-७३) सूत्रार्थः - ह्रस्वस्य छे परे तुगागमः स्यात्, सन्धिं कर्तुं यदा इच्छति तदा- इति।

उदाहरणम् - स्व+छाया इति स्थिते वकारोत्तरह्रस्व-अकारस्य छकारपरकत्वात् अनेन सूत्रेण तुगागमे स्व+त्+छाया इति भवति। तदा **झलां जशोऽन्ते (८.२.३९)** इत्यनेन तकारस्य दकारः भवति। तदा स्व+द्+छाया इति स्थिते **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन दकारस्य जकारः। तदा स्व+ज्+छाया इति स्थिते **खरि च (८.४.५५)** इत्यनेन जकारस्य चकारः। स्वच्छाया रूपं भवति।

**(१४७) आङ्माङोश्च (६-१-७४)** सूत्रार्थः - आङः माङः छे परे तुक् स्यात्- इति।

उदाहरणम् - आ+छादयति इति स्थिते आङः छकारपरकत्वात् अनेन सूत्रेण तुगागमे आ+त्+छादायति इति भवति। तदा **झलां जशोऽन्ते (८.२.३९)** इत्यनेन तकारस्य दकारः भवति। तदा आ+द्+छादयति इति स्थिते **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन दकारस्य जकारः। तदा आ+ज्+छादयति इति स्थिते **खरि च (८.४.५५)** इत्यनेन जकारस्य चकारः। आच्छादयति रूपं भवति।

मा+छिदत् इति स्थिते माङः छकारपरकत्वात् अनेन सूत्रेण तुगागमे मा+त्+छिदत् इति भवति। तदा **झलां जशोऽन्ते (८.२.३९)** इत्यनेन तकारस्य दकारः भवति। तदा मा+द्+छिदत् इति स्थिते **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन दकारस्य जकारः। तदा मा+ज्+छिदत् इति स्थिते **खरि च (८.४.५५)** इत्यनेन जकारस्य चकारः। माच्छिदत् रूपं भवति।

**(१४८) दीर्घात् (६-१-७५)** सूत्रार्थः - दीर्घात् छे परे तुक्स्यात्- इति।

उदाहरणम् - चे+छिद्यते इति स्थिते एकारः दीर्घः इति कारणेन तस्य छकारपरकत्वात् अनेन सूत्रेण तुगागमे चे+त्+छिद्यते इति भवति। **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन तकारस्य चकारः। चेच्छिद्यते इति रूपं भवति।

**(१४९) पदान्ताद्वा (६-१-७६)** सूत्रार्थः - दीर्घात्पदान्ताच्छे परे तुग्वा स्यात्- इति। **दीर्घात् (६-१-७५)** इति सूत्रेण पदमध्ये नित्यं तुगागमः भवति। अनेन सूत्रेण पदान्ते विकल्पेन तुगागमः भवति।

उदाहरणम् - लक्ष्मी+छाया इति स्थिते अनेन सूत्रेण तुगागमे लक्ष्मी+त्+छाया इति भवति। तदा **झलां जशोऽन्ते (८.२.३९)** इत्यनेन तकारस्य दकारः भवति। तदा लक्ष्मी+द्+छाया इति स्थिते **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन दकारस्य जकारः। तदा लक्ष्मी+ज्+छाया इति स्थिते **खरि च (८.४.५५)** इत्यनेन जकारस्य चकारः। लक्ष्मीच्छाया इति रूपं भवति। तुगागमस्य वैकल्पिकत्वात् लक्ष्मीछाया इत्यपि रूपम्।

**स्वावलोकनप्रश्नाः -**

(१) छे च (६-१-७३) इति सूत्रेण कदा तुगागमः भवति ?

(२) आङ्माङोश्च (६-१-७४) इत्यनेन सूत्रेण कस्मिन् वर्णे परे तुगागमः भवति ?

(३) दीर्घात् (६-१-७५) इति सूत्रं नित्यं कुत्र प्रवर्तते ?

(४) पदान्ते विकल्पेन तुगागमविधायकं सूत्रं किम् ?

## ५.१८. व्यञ्जनसन्धिसारः -

कुत्र कः सन्धिः भवति इति ज्ञानार्थं सरलतया सन्धिः अत्र निरूप्यते।

### ५.१८.१ श्चुत्वसन्धिः -

**श्चुत्वविधायकसूत्रम् -**

(१) स्तोः श्चुना श्चुः (८.४.४०)

**श्चुत्वनिषेधसूत्रम् -**

(१) शात् (८-४-४४)

**श्चुत्वस्थानम् -**

शकारचवर्गाभ्यां योगे सकारस्य शकारः, शकारचवर्गाभ्यां योगे तवर्गस्य चवर्गः क्रमात् ओदेशो भवति। अत्र योगः इत्युक्ते सम्बान्धः। सम्बान्धः पूर्वत्र स्थिते अपि भवति परत्र स्थिते अपि भवति। अतः शकारात् सकारे परे सकारस्य शकारो भवति। तथैव चवर्गात् तवर्गे परे तवर्गस्य क्रमशः चवर्गः भवति। शात् इति निषेधसत्त्वात् शकारात् तवर्गे परे तु तवर्गस्य स्थाने चवर्गः न भवति।

स्+शकारः, चवर्गः = सकारस्य शकारः।

त्+शकारः, चवर्गः = तकारस्य चकारः।

थ्+शकारः, चवर्गः = थकारस्य छकारः।

द्+शकारः, चवर्गः = दकारस्य जकारः।

ध्+शकारः, चवर्गः = धकारस्य झकारः।

न्+शकारः, चवर्गः = नकारस्य ञकारः।

श्+स = सकारस्य शकारः।

चवर्गः+तकारः = तकारस्य चकारः

चवर्गः+थकारः = थकारस्य छकारः

चवर्गः+दकारः = दकारस्य जकारः

चवर्गः+धकारः = धकारस्य झकारः

चवर्गः+नकारः = नकारस्य ञकारः

उदाहरणम् –

शिशुस्+शेते, शिशु+श्+शेते = शिशुश्शेते। सकारस्य शकारः।

मनस्+चञ्चलम्, मन+श्+चञ्चलम् = मनश्चञ्चलम्। सकारस्य शकारः।

भगवत्+शक्तिः, भगव+च्+शक्तिः = भगवच्शक्तिः। तकारस्य चकारः।

सत्+चित्, स+च्+चित् = सच्चित्। तकारस्य चकारः।

यज्+नः, यज्+ञ्+अः यज्ञः। नकारस्य ञकारः।

## ५.१८.२ ष्टुत्वसन्धिः -

### ष्टुत्वविधायकसूत्रम् -

(१) ष्टुना ष्टुः (८.४.८१)

### ष्टुत्वनिषेधसूत्रे -

(१) न पदान्ताट्टोरनाम् (८-४-४२)

(२) तोः षि (८-४-४३)

### ष्टुत्वनिषेधस्य निषेधवार्तिकम् -

(१) अनाम्नवतिनगरीणामिति वाच्यम् (वा)

**ष्टुत्वस्थानम् -**

पूर्वं विद्यमानस्य सकरस्य षकारटवर्गाभ्यां योगे सकारस्य षकारः, पूर्वं विद्यमानस्य तवर्गस्य टवर्गेण योगे
तवर्गस्य क्रमात् टवर्गः आदेशो भवति। पूर्वं विद्यमानेन षकारेण सह परं विद्यमानस्य सकारस्य योगे सकारस्य षकारः पूर्वं विद्यमानेन षकारेण सह परं विद्यमानस्य तवर्गस्य योगे तवर्गस्य क्रमात् टवर्गः आदेशो भवति। पदान्ते विद्यमानेन टवर्गेण सह नाम्, नवति, नगरी इत्येतेषां योगे नाम्नवतिनगरीणाम् नकारस्य णकारः भवति।

स्+षकारः, टवर्गः = सकारस्य षकारः

त्+टवर्गः = तकारस्य टकारः

थ्+टवर्गः = थकारस्य ठकारः

द्+टवर्गः = दकारस्य डकारः

ध्+टवर्गः = धकारस्य ढकारः

न्+टवर्गः = नकारस्य णकारः

ष्+स = सकारस्य षकारः

ष्+त = तकारस्य टकारः

ष्+थ = थकारस्य ठकारः

ष्+द = दकारस्य डकारः

ष्+ध = धकारस्य ढकारः

ष्+न = नकारस्य णकारः

उदाहरणम् -

बाालस्+षष्ठः, बााल+ष्+षष्ठः = बाालष्षष्ठः। सकारस्य षकारः।

धनुस्+ टङ्कारः, धनु+ष्+टङ्कारः = धनुष्टङ्कारः। सकारस्य षकारः।

तत्+टीका, त+ट्+टीका = तट्टीका। तकारस्य टकारः।

तद्+डमरुः, त+ड्+डमरुः = तड्डमरुः। दकारस्य डकारः।

चक्रिन्+ढौकसे, चक्रि+ण्+ढौकसे = चक्रिण्ढौकसे। नकारस्य णकारः।

आकृष्+तः, आकृष्+ट्+अः = आकृष्टः। तकारस्य टकारः।

इष्+तः, इष्+ट्+अः = इष्टः। तकारस्य टकारः।

षण्+नाम्, षण्+ण्+आम् = षण्णाम्। नामः नकारस्य णकारः।

षण्+नवतिः, षण्+ण+वतिः = षण्णवतिः। नवतिशब्दस्य नकारस्य णकारः।

षण्+नगर्यः, षण्+ण्+गर्यः = षण्णगर्यः। नगरीशब्दस्य बाहुवचने नगर्यः इति रूपम्। तस्य नकारस्य णकारः।

### ५.१८.३ जश्त्वसन्धिः -

### जश्त्वविधायकसूत्रम् -

(१) झलां जशोऽन्ते (८.२.३९)

**जश्त्वस्थानम्**

पदान्ते विद्यमानानां झल्वर्णानां तत्तद्वर्गीयतृतीयवर्णाः आदेशाः भवन्ति। अत्र झल्वर्णेषु ञमङणनानाम् जश्त्वम् = वर्गतृतीयवर्णः आदेशः न भवति। एवमेव शसह-वर्णानामपि जश्त्वं न भवति। अवशिष्टाः वर्णाः = वर्गप्रथमद्वितीयतृतीयचतुर्थवर्णाः तथा षकारः। षकारस्य डकारः भवति। येषां वर्णानां जश्त्वं भवति तेषाम् अवसाने परे तु **वाऽवसाने (८-४-५६)** तृतीयवर्णः प्रथमवर्णश्च विकल्पेन भवतः। षकारस्य डकारः टकारश्च।

क ख ग घ = गकारः, अवसाने ककारोऽपि।

च छ ज झ = जकारः, अवसाने चकारोऽपि।

ट ठ ड ढ = डकारः, अवसाने टकारोऽपि।

त थ द ध = दकारः, अवसाने दकारोऽपि।

प फ बा भ = बाकारः, अवसाने पकारोऽपि।

ष = डकारः, अवसाने टकारोऽपि।

उदाहरणम् -

वाक्+ईशः, वा+ग्+ईशः = वागीशः। ककारस्य गकारः।

अच्+अन्तः, अ+ज्+अन्तः = अजन्तः। चकारस्य जकारः।

मधुलिट्+अस्ति, मधिलि+ड्+अस्ति = मधुलिडस्ति। टकारस्य डकारः।

महत्+यशः, मह+द्+यशः = महद्यशः। तकारस्य दकारः।

सुप्+अन्तम्, सु+बा्+अन्तम् = सुबान्तम्। पकारस्य बाकारः।

अवसाने तु कवर्गस्य वाक् / वाग्।

अवसाने तु चवर्गस्य अच् / अज्।

अवसाने तु टवर्गस्य मधुलिट् / मधुलिड्।

अवसाने तु तवर्गस्य महत् / महद्।

अवसाने तु पवर्गस्य ककुप् / ककुब्

## ५.१८.४ अनुनासिकसन्धिः -

## अनुनासिकविधायकसूत्रम् -

(१) यरोऽनुनासिकेऽनुनासिको वा (८-४-४५)

## अनुनासिकविधायकवार्तिकम् -

(१) प्रत्यये भाषायां नित्यम् (वा)

**अनुनासिकस्थानम् -**

(१) अनुनासिकवर्णेषु परेषु पदान्ते स्थितानां कचटतपवर्गस्थव्यञ्जनानां तत्तद्वर्गीयपञ्चमवर्णः विकल्पेन आदेशो भवति।

(२) लौकिके प्रयोगे प्रत्ययस्य अनुनासिके परे पूर्ववर्णानां = कचटतपवर्गस्थव्यञ्जनानां नित्यम् अनुनासिकः भवति।

कखगघङ+ङञणनम = ङ

चछजझञ+ङञणनम = ञ

टठडढण+ङञणनम = ण

तथदधन+ङञणनम = न

पफबाभम+ङञणनम = म

उदाहरणम् –

वाग्+मूलम्, वा+ङ्+मूलम् = वाङ्मूलम्। अनुनासिकाभावे वाग्मूलम्।

षड्+मयूराः, ष+ण्+मयूराः = षण्मयूराः। अनुनासिकाभावे षड्मयूराः।

तद्+नयति, त+न्+नयति = तन्नयति। अनुनासिकाभावे तद्नयति।

चिद्+मयम्, चि+न्+मयम् = चिन्मयम्।

तद्+मात्रम् त+न्+मात्रम् = तन्मात्रम्।

चिन्मयम्, तन्मात्रम् इति उभयत्र प्रत्यये भाषायां नित्यम् (वा) इति वार्तिकेन नित्यम् अनुनासिकः।

## ५.१८.५ परसवर्णसन्धिः -

## परसवर्णविधायकसूत्राणि -

(१) अनुस्वारस्य ययि परसवर्णः (८-४-५८)

(२) वा पदान्तस्य (८-४-५९)

(३) तोर्लि (८-४-६०)

**परसवर्णस्थानम् -**

(१) अनुस्वारस्य कचटतपवर्गेषु परेषु तत्तद्वर्गस्य पञ्चमवर्णः आदेशो भवति। अनुस्वारस्य यवले परे तु यँ वँ लँ इति क्रमेण आदेशाः भवन्ति।

(२) पदान्ते स्थितस्य अनुस्वारस्य तु कचटतपवर्गेषु परेषु तत्तद्वर्गस्य पञ्चमवर्णः विकल्पेन आदेशो भवति।

(३) तवर्गस्य लकारे परे लकारादेशो भवति। तत्र नकारस्य अनुनासिकलँकारो भवति।

०+कवर्गः = ङकारः।

०+चवर्गः = ञकारः।

०+टवर्गः = णकारः।

०+तवर्गः = नकारः।

०+पवर्गः = मकारः।

०+य = यँ्

०+व = वँ्

०+ल = लँ्

उदाहरणम् -

अं+कितः, अ+ङ्+कितः = अङ्कितः।

मुं+चति, मु+ञ्+चति = मुञ्चति।

मुं+डनम्, मु+ण्+डनम् = मुण्डनम्।

नं+दति, न+न्+दति = नन्दति।

कं+पते, क+म्+पते = कम्पते।

त्वं+करोषि, त्व+ङ्+करोषि = त्वङ्करोषि। परसवर्णाभावे त्वं करोषि।

सं+पृक्तौ, स+म्+पृक्तौ = सम्पृक्तौ। परसवर्णाभावे सं पृक्तौ।

सं+यमः, स+यँ्+यमः = सँय्यमः। परसवर्णाभावे संय्यमः।

सं+वत्सरः, स+वँ्+त्सरः = सँव्वत्सरः। परसवर्णाभावे संव्वत्सरः।

सं+लापः, स+लँ्+लापः = सँल्लापः। परसवर्णाभावे संल्लापः।

तद्+लयः, त+ल्+लयः = तल्लयः।

पठन्+लिखति, पठ+लँ्+लिखति = पठल्लिखति।

## ५.१८.६ पूर्वसवर्णसन्धिः

### पूर्वसवर्णविधायकसूत्रम् -

(१) उदः स्थास्तम्भोः पूर्वस्य (८-४-६१)

(११९) झयो होऽन्यतरस्याम् (८-४-६२)

**पूर्वसवर्णस्थानम् -**

(१) उत्-उपसर्गात् परस्य स्थाधातोः तथा स्तम्भधातोः च आदौ स्थितस्य सकारस्य थकारादेशो भवति।

(२) कखगघ - इत्येतेषां परं विद्यमानस्य हकारस्य घ-आदेशो भवति। चछजझ- इत्येतेषां परं

विद्यमानस्य हकारस्य झ-आदेशो भवति। टठडढ - इत्येतेषां परं विद्यमानस्य हकारस्य ढ-आदेशो भवति। तथदध - इत्येतेषां परं विद्यमानस्य हकारस्य ध-आदेशो भवति। पफबभ - इत्येतेषां परं विद्यमानस्य हकारस्य भ-आदेशो भवति। परन्तु बाहुल्येन उदाहरणं जगडदवर्णानां परस्य हकारस्य एव दृश्यते। तदा प्रागुक्तरीत्या तत्तद्वर्गीयचतुर्थवर्णादेशः भवति।

कखगघ+ह = घ

चछजझ+ह = झ

टठडढ+ह = ढ

तथदध+ह = ध

पफबभ+ह = भ

उदाहरणम् -

उत्+स्थानम्, उत्+थ+थानम् = उत्थ्थानम्। **झरो झरि सवर्णे (८-४-६५)** इत्यनेन प्रथम थकारस्य लोपः उत्थानम् इति रूपम्।

उत्+स्तम्भनम्, उत्+थ+स्तम्भनम् = उत्थ्तम्भनम्। **झरो झरि सवर्णे (८-४-६५)** इत्यनेन थकारस्य लोपः उत्तम्भनम् इति रूपम्।

वणिग्+हसति, वणिग्+घ्+असति = वणिग्घसति। पूर्वसवर्णाभावे वणिग्हसति।

अज्+हलौ, अज्+झ्+अलौ = अज्झलौ। पूर्वसवर्णाभावे अज्हलौ।

षड्+हयाः, षड्+ढ्+अयाः = षड्ढयाः। पूर्वसवर्णाभावे षड्हयाः।

तद्+हितम्, तद्+ध्+इतम् = तद्धितम्। पूर्वसवर्णाभावे तद्हितम्।

अब्+ह्रास, अब्+भ्+रासः = अब्भ्रासः। पूर्वसवर्णाभावे अब्ह्रासः।

### ५.१८.७ छत्वसन्धिः -

**छत्वविधायकसूत्रम् -**

(१) शश्छोऽटि (८-४-६३)

**छत्वविधायकवार्त्तिकम् -**

(१) छत्वममीति वाच्यम् (वा)

**छत्वस्थानम् -**

पदान्ते विद्यमानानां वर्गीय-आद्यचतुर्थवर्णानां परं विद्यमानस्य शकारस्य छ-आदेशो विकल्पेन भवति। परं शकारात् परं स्वरवर्णाः अथवा हयवरलञमङणनवर्णाः भवेयुः।

परन्तु बााहुल्येन उदाहरणं वर्गस्य प्रथमवर्णात् परं विद्यमानस्य शकारस्य एव दृश्यते। तदा प्रागुक्तरीत्या छकारादेशो विकल्पेन भवति।

क ख ग घ च छ ज झ ट ठ ड ढ त थ द ध प फ बा भ + श = छ

उदाहरणम्

वाक्+शरः, वाक्+छ्+अरः = वाक्छरः। छत्वाभावे वाक्शरः।

तच्+शिवः, तच्+छ्+इवः = तच्छिवः। छत्वाभावे तच्शिवः।

मृच्+शकटिकम्, मृच्+छ्+अकटिकम् = मृच्छकटिकम्। छत्वाभावे मृच्शकटिकम्

मधुलिट्+शेते, मधुलिट्+छ्+एते = मधुलिट्छेते। छत्वाभावे मधुलिट्शेते।

तच्+श्लोकेन, तच्+छ्+लोकेन = तच्छ्लोकेन। छत्वाभावे तच्श्लोकेन।

तच्+श्मश्रु, तच्+छ्+मश्रु = तच्छ्मश्रु। छत्वाभावे तच्श्मश्रु।

तच्+श्नाप्रत्ययः, तच्+छ्+नाप्रत्ययः = तच्छ्नाप्रत्ययः। छत्वाभावे तच्श्नाप्रत्ययः।

## ५.१८.८ चर्त्वसन्धिः -

**चर्त्वविधायकसूत्रम् -**

(१२१) खरि च (८-४-५५)

**चर्त्वस्थानम् -**

वर्गस्थप्रथमद्वितीयवर्णे परे तथा शषसहवर्णेषु परेषु वर्गस्थ-आद्यचतुर्वणानां स्थाने वर्गस्थ-आद्यवर्णाः आदेशाः भवन्ति।

क ख ग घ + क ख श ष स ह = क

च छ ज झ + च छ श ष स ह = च

ट ठ ड ढ + ट ठ श ष स ह = ट

त थ द ध + त थ श ष स ह = त

प फ बा भ + प फ श ष स ह = प

उदाहरणम् –

दिश्+पालः, दि+क्+पालः = दिक्पालः।

तज्+शिवः, त+च्+शिवः = तच्शिवः।

विराड्+पुरुषः, विरा+ट्+पुरुषः = विराट्पुरुषः।

विपद्+कालः, विप+त्+कालः = विपत्कालः।

अनुष्टुभ्+छन्दः, अनुष्टु+प्+छन्दः = अनुष्टुप्छन्दः।

परिव्राड्+सङ्गः, परिव्रा+ट्+सङ्गः = परिव्राट्सङ्गः।

## ५.१८.९ अनुस्वारसन्धिः -

**अनुस्वारविधायकसूत्रम् -**

(१) मोऽनुस्वारः (८-३-२३)

(२) नश्चापदान्तस्य झलि (८-४-२४)

**अनुस्वारस्थानम्**

(१) पदान्ते विद्यमानस्य मकारस्य हलि परे अनुस्वारः भवति।

(२) पदमध्ये विद्यमानस्य नकारस्य अथ वा मकारस्य झलि परे अनुस्वारः भवति।

म + व्यञ्जनवर्णाः = ० (अनुस्वारः)

म + झ भ घ ढ ध ज बा ग ड द ख फ छ ठ थ क प च ट त श ष स ह = ० (अनुस्वारः)

न + झ भ घ ढ ध ज बा ग ड द ख फ छ ठ थ क प च ट त श ष स ह = ० (अनुस्वारः)

उदाहरणम् -

रामम्+वन्दे, राम+०+वन्दे = रामं वन्दे।

यशान्+सि, यशा+०+सि = यशांसि।

आक्रम्+स्यते, आक्र+०+स्यते = आक्रंस्यते।

## ५.१८.१० कुगागमसन्धिः टुगागमसन्धिश्च -

## कुग्टुगागमविधायकसूत्रम् -

(१) ङ्णोः कुक् टुक् शरि (८-३-२८)

**कुगागमस्थानम् -**

ङकारस्य शर्वर्णे परे ङकारस्य अन्ते कुक् इति आगमः भवति।

**टुगागमस्थानम् -**

णकारस्य शर्वर्णे परे णकारस्य अन्ते टुक् इति आगमः भवति।

ङ+श ष स = ङक्

ण+श ष स = णट्

उदाहरणम् -

प्राङ्+षष्ठः, प्राङ् क् षष्ठः प्राङ्क्षष्ठः। **चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वा)**। इत्यनेन ककारस्य द्वितीयादेशे प्राङ्ख्षष्ठः।

सुगण्+षष्ठः, सुगण्+ट्+षष्ठः सुगण्ट्षष्ठः। **चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वा)**। इत्यनेन टकारस्य द्वितीयादेशे सुगण्ठ्षष्ठः।

## ५.१८.११ धुडागमसन्धिः -

## धुडागमविधायकसूत्रे -

(१) डः सि धुट् (८-३-२९)

(२) नश्च (८-३-३०)

**धुडागमस्थानम् -**

(१) डकारात् परस्य सकारस्य धुड् आगमः भवति।

(२) नकारात् परस्य सकारस्य धुड् आगमः भवति।

सकारात् पूर्वं धुड् आगमः भवति। तत्र ध् इत्येव अवशिष्यते। उकार-टकारयोः अनुबान्धलोपः। तस्य धकारस्य **खरि च (८-४-५५)** इत्यनेन चर्त्वेन त् इति भवति। डकारस्य तु **खरि च (८-४-५५)** इत्यनेन चर्त्वेन टकारः भवति।

ड्+स = ध् = त्

न्+स = ध् = त्

उदाहरणम् -

षड्+सन्तः, षड्+ध्+सन्तः, षड्+त्+सन्तः, षट्+त्+सन्तः = षट्त्सन्तः।

सन्+सः, सन्+ध्+सः, सन्+त्+सः = सन्त्सः।

**५.१८.१२ तुगागमसन्धिः -**

**तुगागमविधायकसूत्राणि -**

(१) छे च (६-१-७३)

(२) आङ्माङोश्च (६-१-७४)

(३) दीर्घात् (६-१-७५)

(४) पदान्ताद्वा (६-१-७६)

(५) शि तुक् (८-३-३१)

**तुगागमस्थानम् -**

(१) ह्रस्वात् छकारे परे ह्रस्वस्य अवयवत्वेन ह्रस्वात् परं तुगागमः भवति।

(२) आङः माङः छकारे परे आङः माङः अवयवत्वेन आङः माङः परं तुगागमः भवति।

(३) दीर्घात् छकारे परे दीर्घस्य अवयवत्वेन दीर्घात् परं तुगागमः भवति।

(४) पदान्ते यदा दीर्घः भवति तदा तस्य छकारे परे पदान्ते विद्यमानस्य दीर्घस्य तस्य अवयवत्वेन तुगागमः विकल्पेन भवति।

(५) पदान्ते विद्यमानस्य नकारस्य शकारे परे नकारात् परं नकारस्य अवयवत्वेन तुगागमः विकल्पेन भवति।

एषु सर्वत्र पदमध्ये यदा तुगागमः तदा तस्य तकारस्य **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन चकारः भवति। पदान्ते तु यदा तुगागमः तदा तस्य तकारस्य **झलां जशोऽन्ते (८.२.३९)** इत्यनेन दकारः भवति। तस्य दकारस्य **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन जकारः भवति। तस्य जकारस्य **खरि च (८.४.५५)** इत्यनेन चकारः भवति। अतः पदान्ते विद्यमानस्य अथ वा पदमध्ये विद्यमानस्य तकारस्य चकारः भवति। नकारस्य तावत्

**स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन ञकारः भवति।

ह्रस्वः+छ = त् = च्

आ+छ = त् = च्

मा+छ = त् = च्

दीर्घस्वरः+छ = त् = च्

पदान्तदीर्घस्वरः+छ = त् = च् (विकल्पेन तुगागमः)

न+छ = त् = च् (विकल्पेन तुगागमः)

उदाहरणम् -

वृक्ष+छाया, वृक्ष+त्+छाया, वृक्ष+च्+छाया = वृक्षच्छाया।

आ+छादयति, आ+त्+छादयति, आ+च्+छादयति = आच्छादयति।

मा+छिदत्, मा+त्+छिदत्, मा+च्+छिदत् = माच्छिदत्।

चे+छिद्यते, चे+त्+छिद्यते, चे+च्+छिद्यते = चेच्छिद्यते।

लक्ष्मी+छाया, लक्ष्मी+त्+छाया, लक्ष्मी+च्+छाया = लक्ष्मीच्छाया। तुगागमाभावे लक्ष्मीछाया।

सन्+शम्भुः, सन्+त्+शम्भुः, सन्+च्+शम्भु, सञ्+च्+शम्भुः = सञ्च्शम्भुः। तुगागमाभावे सञ्शम्भुः।

## ५.१८.१३ ङमुडागमसन्धिः -

## ङमुडागमविधायकसूत्रम् -

(१३४) ङमो ह्रस्वादचि ङमुण्नित्यम् (८-३-३२)

**ङमुडागमस्थानम् -**

ह्रस्वपूर्वकङान्तात्, ह्रस्वपूर्वकणान्तात्, ह्रस्वपूर्वकनान्तात् च पदात् अचि परे अचः पूर्वं ङकारस्य ङकारः, णकारस्य णकारः, नकारस्य नकारः आदेशो भवति। अर्थात् - पदान्ते अच्वर्णः स्यात्, ततः परं ङकारो णकारो नकारो वा स्यात्। ततः परम् अच्वर्णः स्यात्। तदा परं विद्यमानात् अच्वर्णात् पूर्वं ङकारस्य ङकारः, णकारस्य णकारः, नकारस्य नकारः आदेशो भवति इत्यर्थः।

ह्रस्वाः+ङ+अच्वर्णाः = ङ

ह्रस्वाः+ण+अच्वर्णाः = ण

ह्रस्वाः+न+अच्वर्णाः = न

उदाहरणम् -

प्रत्यङ्+आत्मा, प्रत्यङ्+ङ्+आत्मा = प्रत्यङ्ङात्मा।

सुगण्+ईशः, सुगण्+ण्+ईशः = सुगण्णीशः।

पचन्+अस्ति, पचन्+न्+अस्ति = पचन्नस्ति।

एतावता सन्धिसारः निरूपितः। यत्र उदाहरणानि विरलानि तेषां विषये सन्धिसारे नियमः न उक्तः। अतः सन्धिसारोक्तस्थानाभावेऽपि कुत्रचित् सन्धिः दृष्टः चेत् तेषां ज्ञानार्थं सन्धिप्रकरणे सूत्राणि एव द्रष्टव्यानि।

**।। इति हल्सन्धिप्रकरणम् ।।**

# ।। षष्ठखण्डः विसर्गसन्धिप्रकरणम् ।।

**संरचना**

६.० प्रस्तावना।
६.१ लक्षिताधिगमविशेषाः।
६.२ विसर्गस्य सकारादेशविधायकं सूत्रम्।
६.३ विसर्गस्य विसर्गविधायकं सूत्रम्।
६.४ विसर्गस्य लोपविधायकं वार्त्तिकम्।
६.५ विसर्गस्य जिह्वामूलीयोपध्मानीयविसर्गविधायकं सूत्रम्।
६.६ विसर्गस्य सकारादेशः।
६.७ विसर्गस्य षकारादेशविधायकं सूत्रम्।
६.८ विसर्गस्य सकारादेशविधायकं सूत्रम्।
६.९ विसर्गस्य षकारादेशविधायकं सूत्रम्।
६.१० विसर्गस्य सकारादेशविधायकं सूत्रम्।
६.११ विसर्गस्य षकारादेशविधायकानि सूत्राणि।
६.१२ विसर्गस्य सकारादेशविधायके सूत्रे।
६.१३ विसर्गसन्धिसारः।

## ६.० प्रस्तावना -

सन्धिप्रकरणे एतावत्पर्यन्तं वयम् अच्सन्धिविषये प्रकृतिभावविषये हल्सन्धिविषये च ज्ञातवन्तः। इदानीं विसर्गसन्धिविषये ज्ञास्यामः। 'अकुहविसर्जनीयानां कण्ठः' इति वाक्येन विसर्गस्य उत्पत्तिस्थानं कण्ठः इति इतः प्राक् सञ्ज्ञाप्रकरणे **तुस्यास्यप्रयत्नं सवर्णम् (१.१.९)** इत्यत्र अधीतम् अस्माभिः। तस्य विसर्गस्य कानि परिवर्तनानि भवन्ति इति अस्मिन् प्रकरणे ज्ञास्यामः।

## ६.१ लक्षिताधिगमविशेषाः -

एनं पाठं पठित्वा भवन्तः -

- विसर्गसन्धिविषये ज्ञातुं शक्नुवन्ति।
- विसर्गस्य स्थाने किं किं भवति इति ज्ञास्यन्ति।
- विसर्गसन्धिसूत्राणि तेषाम् अर्थं च ज्ञास्यन्ति।

## ६.२ विसर्गस्य सकारादेशविधायकं सूत्रम् -

**विसर्जनीयस्य सः (८.३.३४)** सूत्रार्थः - खर्वर्णे परे विसर्जनीयस्य सकारः स्यात्- इति।

उदाहरणम्- विष्णुः त्राता इति स्थिते विसर्गस्य अनेन सूत्रेण सकारे विष्णुस् + त्राता = विष्णुस्ताता इति रूपम्।

## ६.३ विसर्गस्य विसर्गविधायकं सूत्रम् -

**(१५०) शर्परे विसर्जनीयः (८.३.३५)** सूत्रार्थः - शर्परे खरि परे विसर्गस्य विसर्ग एव भवति अन्यत् किमपि न भवति- इति। शर्परे खरि इत्युक्ते- खर्वर्णसमनन्तरं शर्वर्णः भवेत्। उदाहरणम्- कः त्सरुः। घनाघनः क्षोभणः इति। अत्र स्थलद्वये अपि विसर्गानन्तरं खर्वर्णः, तत्समनन्तरं शर्वर्णः अस्ति। अतः विसर्गस्य विसर्ग एव भवति।

**(१५१) वा शरि (८.३.३६)** सूत्रार्थः - विसर्गस्य शर्वर्णे परे विसर्ग एव विकल्पेन भवति- इति।

उदाहरणम्- हरिः शेते इति। शर्वर्णपरकत्वात् विसर्गस्य विसर्ग एव। विसर्गस्य वैकल्पिकत्वात् **विसर्जनीयस्य सः (८.३.३४)** इत्यनेन विसर्गस्य सकारे हरिस् + शेते इति स्थिते **स्तोः श्चुना श्चुः (८.४.४०)** इत्यनेन सकारस्य शकारे हरिश् + शेते = हरिश्शेते इति द्वितीयं रूपम्।

**स्वावलोकनप्रश्नौ -**

(१) विसर्गस्य विसर्गः कदा भवति ?

(२) विसर्गस्य विकल्पेन विसर्गः कदा भवति ?

इदानीं राम स्थाता, रामः स्थाता, रामस्स्थाता इति रूपत्रयम् उदाह्रियते-

## ६.४ विसर्गस्य लोपविधायकं वार्त्तिकम् -

**खर्परे शरि वा विसर्गलोपो वक्तव्यः (वा)** वार्त्तिकार्थः - खर्परे शरि विसर्गस्य विकल्पेन लोपो भवति- इति। खर्परे शरि = प्रथमं शर्वर्णः स्यात्, तत्समनन्तरं खर्वर्णः स्यात्।

उदाहरणण् -

(१) राम स्थाता इति। रामः स्थाता इत्यत्र अनेन वार्त्तिकेन लोपे रूपम्।

(२) रामः स्थाता इति। अनेन वार्त्तिकेन विसर्गस्य लोपाभावे **वा शरि(८.३.३६)** इत्यनेन वैकल्पिकविसर्गे रूपम्।

(३) रामस्स्थाता इति। विसर्गलोपस्य, विसर्गस्य च वैकल्पिकत्वेन **विसर्जनीयस्य सः (८.३.३४)** इत्यनेन विसर्गस्य सकारे रूपम्।

## ६.५ विसर्गस्य जिह्वामूलीयोपध्मानीयविसर्गविधायकं सूत्रम् -

**कुप्वोः क पौ च (८.३.१७)** सूत्रमिदं प्रकरणवशात् प्राक् हल्सन्धिप्रकरणे उक्तम्। इदानीं विसर्गस्य प्रकरणात् पुनः उच्यते। सूत्रार्थः - कवर्गे परे विसर्गस्य जिह्वामूलीयः, पवर्गे परे विसर्गस्य उपध्मानीयः भवति, कवर्गे पवर्गे च परे पक्षे विसर्गस्य विसर्गः अपि भवति- इति।

उदाहरणानि -

(१) क ᳵकरोति, कः करोति इति। अनेनैव सूत्रेण एकवारं जिह्वामूलीयः, एकवारं विसर्गश्च।

(२) क ᳵखनति, कः खनति इति। अनेनैव सूत्रेण एकवारं जिह्वामूलीयः, एकवारं विसर्गश्च।

(३) क ᳶपचति, कः पचति इति। अनेनैव सूत्रेण एकवारम् उपध्मानीयः एकवारं विसर्गश्च।

(४) क ᳶफलति, कः फलति इति। अनेनैव सूत्रेण एकवारम् उपध्मानीयः एकवारं विसर्गश्च।

**स्वावलोकनप्रश्नौ -**

(१) विसर्गस्य लोपः कदा भवति ?

(२) कुप्वो ᳵक ᳶपौ च (८.३.१७) इत्यनेन विसर्गस्य विसर्गः भवति उत न ?

## ६.६.० विसर्गस्य सकारादेशः -

### ६.६.१ विसर्गस्य सकारादेशविधायकं सूत्रम् -

**(१५२) सोऽपदादौ** (८.३.३८) सूत्रार्थः - विसर्जनीयस्य अपदाद्योः कवर्गपवर्गयोः परयोः सकारः स्यात्- इति। एतत्सूत्रोक्तप्रकारेण सर्वदा विसर्जनीयस्य अपदाद्योः कवर्गपवर्गयोः परयोः सकारः स्यात्। अतः कदा विसर्गस्य सकारः भवति इति निरूपितम्-

### ६.६.२ विसर्गस्य सकारादेशनियामकं वार्त्तिकम् -

**पाशकल्पककाम्येष्विति वाच्यम् (वा**) वार्त्तिकार्थः - पाशप्-कल्पप्-क-काम्यच्-इत्येतेषु प्रत्ययेषु परेषु विसर्गस्य सत्वं भवति इति वक्तव्यम्- इति।

उदाहरणम्-

पयः+पाशम् = पयस्पाशम् इति। पाशप्रत्ययः।

यशः+कल्पम् = यशस्कल्पम् इति। कल्पप्रत्ययः।

यशः+कम् = यशस्कम् इति। कप्रत्ययः।

यशः+काम्यति = यशस्काम्यति इति। काम्यच्प्रत्ययः। एषु सर्वेषु उदाहरणेषु विसर्जनीयस्य सकारः **सोऽपदादौ** (८.३.३८) इत्यनेन सूत्रेण। अथापि **सोऽपदादौ** (८.३.३८) इत्यनेन सूत्रेण अव्ययानामपि विसर्गस्य सकारः स्यात्। इति शङ्का-

### ६.६.३ विसर्गस्य सकारादेशनिषेधवार्त्तिकम् -

**अनव्ययस्येति वाच्यम् (वा**) वार्त्तिकार्थः - अव्ययविसर्गस्य अपदाद्योः कवर्गपवर्गयोः परयोः = पाशप्-कल्पप्-क-काम्यच्-इत्येतेषु प्रत्ययेषु परेषु सकारः न भवति- इति। अतः अव्ययविसर्गस्य सकारः न भवति- इति समाधानम्।

उदाहरणम्- प्रातःकल्पम्। 'प्रातर्' इति अव्ययस्य विसर्गस्य सकारः न जातः।

### ६.६.४ विसर्गस्य सकारादेशनियामकं वार्त्तिकम् -

**काम्ये रोरेवेति वाच्यम् (वा**) वार्त्तिकार्थः - काम्यच्प्रत्यये परे रुस्थानिकस्यैव विसर्गस्य **सोऽपदादौ** (८.३.३८) इत्यनेन सूत्रेण सकारः भवति- इति। गीः काम्यति इत्यत्र 'गीः'

इत्यस्य प्रातिपदिकस्य रेफस्य विसर्गः श्रूयते न तु रुस्थानिकस्य विसर्गः। अत एव अत्र विसर्गस्य सकारः न भवति।

**स्वावलोकनप्रश्नाः -**

(१) अपदाद्योः कवर्गपवर्गयोः परयोः विसर्गस्य कदा सकारः भवति ?

(२) पाशप्-कल्पप्-क-काम्यच्-इत्येतेषु प्रत्ययेषु परेषु कस्य विसर्गस्य सकारः न भवति ?

(३) रुस्थानिकस्य विसर्गस्य कस्मिन् प्रत्यये परे सकारः भवति ?

## ६.७ विसर्गस्य षकारादेशविधायकं सूत्रम् -

**(१५३) इणः षः (८.३.३९)** सूत्रार्थः - इणः परस्य विसर्गस्य पूर्वोक्तविषये षः स्यात् - इति। पूर्वोक्तविषयः इत्युक्ते- (१) अपदाद्योः कवर्गपवर्गयोः परयोः = पाशप्-कल्पप्-क-काम्यच्-इत्येतेषु प्रत्ययेषु परेषु षकारः स्यात्, (२) अव्ययस्य इणः परस्य विसर्गस्य अपदाद्योः कवर्गपवर्गयोः परयोः = पाशप्-कल्पप्-क-काम्यच्-इत्येतेषु प्रत्ययेषु परेषु षकारः न भवति, (३) काम्यच्प्रत्यये परे इणः परस्य रुस्थानिकस्यैव विसर्गस्य षकारः स्यात् - इत्यर्थः।

उदाहरणम्-

सर्पिः+पाशम् = सर्पिष्पाशम् इति। पाशप्प्रत्ययः।

सर्पिः+कल्पम् = सर्पिष्कल्पम् इति। कल्पप्प्रत्ययः।

सर्पिः+कम् = सर्पिष्कम् इति। कप्रत्ययः।

सर्पिः+काम्यति = सर्पिष्काम्यति इति। काम्यच्प्रत्ययः। एषु सर्वेषु उदाहरणेषु विसर्जनीयस्य षकारः **इणः षः (८.३.३९)** इत्यनेन सूत्रेण।

## ६.८ विसर्गस्य सकारादेशविधायकं सूत्रम् -

**(१५४) नमस्पुरसोर्गत्योः (८.३.४०)** सूत्रार्थः - गतिसञ्ज्ञयोः नमस्पुरश्शब्दयोः विसर्गस्य कवर्गे पवर्गे च परे सकारः स्यात्- इति।

उदाहरणम्-

नमः+करोति = नमस्करोति, पुरः+करोति = पुरस्करोति इति। नमः करोति, पुरः करोति इत्यत्र विसर्गस्य सकारः।

नमश्शब्दस्य विकल्पेन गतिसञ्ज्ञा अस्ति। अतः गतिसञ्ज्ञाभावे विसर्गस्य सकारः न भवति। तदा **कुप्वोᳵकᳶपौ च (८.३.१७)** सूत्रेण जिह्वामूलीयः भवति। नमᳵकरोति इति रूपम्। जिह्वामूलीयस्य वैकल्पिकत्वात् विसर्गस्य विसर्ग एव भवति। नमः करोति इति रूपम्। 'पुरस्' इत्यस्य नित्यं गतिसञ्ज्ञा अस्ति। अतः पुरस्करोति इति एकमेव रूपम्।

**स्वावलोकनप्रश्नौ -**

(१) इणः परस्य विसर्गस्य कदा षत्वं भवति ?

(२) नमस्पुरश्शब्दयोः विसर्गस्य कवर्गे पवर्गे च परे का सञ्ज्ञा अस्ति चेत् सकारः भवति ?

## ६.९ विसर्गस्य षकारादेशविधायकं सूत्रम् -

**(१५५) इदुदुपधस्य चाप्रत्ययस्य (८.३.४१)** सूत्रार्थः - उपधाभूतात् इकारात् उकारात् परस्य प्रत्ययावयवभिन्नस्य विसर्गस्य कुप्वोः = कवर्गपवर्गयोः परयोः षकारः स्यात्- इति।

उदाहरणम् -

निः + प्रत्यूहम् = निष्प्रत्यूहम्, आविः + कृतम् = आविष्कृतम् इति। अत्र उदाहरणयोः उपधा इकारः अस्ति। ततः परस्य विसर्गस्य षकारः जातः। दुः + कृतम् = दुष्कृतम् इति। अत्र उदाहरणे उपधा उकारः अस्ति। ततः परस्य विसर्गस्य षकारः जातः।

## ६.१० विसर्गस्य सकारादेशविधायकं सूत्रम् -

**(१५६) तिरसोऽन्यतरस्याम् (८.३.४२)** सूत्रार्थः - 'तिरस्' इत्यस्य विसर्गस्य कुप्वोः परयोः विकल्पेन सकारः भवति- इति।

उदाहरणम्-

तिरः+कर्ता = तिरस्कर्ता इति। विसर्गस्य सकारः अनेन सूत्रेण। अस्य सूत्रस्य वैकल्पिकत्वात् विसर्गस्य सकाराभावे **कुप्वो ≍ क ≍ पौ च (८.३.१७)** इति सूत्रेण विसर्गस्य जिह्वामूलीयः भवति। तिरःकर्ता इति रूपम्। जिह्वामूलीयस्य वैकल्पिकत्वात् विसर्गस्य विसर्ग एव भवति। तिरः करोति इति रूपम्।

**स्वावलोकनप्रश्नौ -**

(१) **इदुदुपधस्य चाप्रत्ययस्य (८.३.४१)** इत्यनेन सूत्रेण प्रत्ययावयवस्य विसर्गस्य षत्वं भवति वा ?

(२) तिरस्-शब्दस्य कदा विसर्गस्य सकारः भवति ?

## ६.११ विसर्गस्य षकारादेशविधायकानि सूत्राणि -

**(१५७) द्विस्त्रिश्चतुरिति कृत्वोऽर्थे (८.३.४३)** सूत्रार्थः - कृत्वोऽर्थे = क्रिया कतिवारं सम्पन्ना इत्यस्य गणना। तस्मिन्नर्थे वर्तमानानां 'द्विः त्रिः चतुः' इत्येतेषां विसर्गस्य कुप्वोः परयोः षकारो वा स्यात्- इति।

उदाहरणम्-

द्विः+करोति = द्विष्करोति इति। अनेन सूत्रेण विसर्गस्य षकारः। अस्य वैकल्पिकत्वात् षकारस्य अभावे **कुप्वो ≍ क ≍ पौ च (८.३.१७)** इति सूत्रेण विसर्गस्य जिह्वामूलीयः भवति।

द्विःकरोति इति रूपम्। जिह्वामूलीयस्य वैकल्पिकत्वात् विसर्गस्य विसर्ग एव भवति। द्विः करोति इति रूपम्। एवं त्रिष्करोति - त्रिःकरोति, त्रिः करोति, चतुष्करोति - चतुःकरोति चतुः करोति इति रूपाणि भवन्ति।

**(१५८) इसुसोः सामर्थ्ये (८.३.४४)** सूत्रार्थः - 'इस् उस्' इत्यनयोः विसर्गस्य कुप्वोः परयोः षकारो वा स्यात्- इति।

उदाहरणम्-

सर्पिः+करोति = सर्पिष्करोति इति। 'इस्' इत्यस्य विसर्गस्य षकारः। अस्य वैकल्पिकत्वात् षकारस्य अभावे **कुप्वो ≍ क ≍ पौ च (८.३.१७)** इति सूत्रेण विसर्गस्य जिह्वामूलीयः भवति। सर्पिःकरोति इति रूपम्। जिह्वामूलीयस्य वैकल्पिकत्वात् विसर्गस्य विसर्ग एव भवति। सर्पिः करोति इति रूपम्। एवम् 'उस्' इत्यस्य उदाहरणम्- धनुः+करोति = धनुष्करोति इति। अत्रापि पूर्ववत् षकारः जिह्वामूलीयः विसर्गश्च।

**(१५९) नित्यं समासेऽनुत्तरपदस्थस्य (८.३.४५)** सूत्रार्थः - समासे अनुत्तरपदस्थस्य इस्-उसोः विसर्गस्य कुप्वोः परयोः नित्यं षकारः स्यात्- इति। अनुत्तरपदम् = प्रथमपदम् = पूर्वपदम् इत्यर्थः।

उदाहरणम्-

सर्पिः+कुण्डिका = सर्पिष्कुण्डिका इति। अस्मिन् उदाहरणे 'सर्पिः' इति पदं समासस्य पूर्वपदम् = प्रथमपदमस्ति। अतः विसर्गस्य षकारः आगतः।

परमसर्पिःकुण्डिका इत्यत्र 'सर्पिः' इति पदं समासस्य पूर्वपदम् = प्रथमपदं न। अतः अत्र विसर्गस्य षकारः नैव भवति। **कुप्वो ≍ क ≍ पौ च (८.३.१७)** इति सूत्रेण विसर्गस्य जिह्वामूलीयः विसर्गश्च भवति।

**स्वावलोकनप्रश्नाः -**

(१) कस्मिन् अर्थे विद्यमानानां 'द्विः त्रिः चतुः' इत्येतेषां विसर्गस्य कुप्वोः परयोः षकारो भवति ?

(२) 'इस् उस्' इत्यनयोः विसर्गस्य कुप्वोः परयोः षकारो विकल्पेन भवति उत नित्यम् ?

(३) समासे 'इस् उस्' इत्यनयोः विसर्गस्य कुप्वोः परयोः कदा नित्यं षकारो भवति ?

## ६.१२ विसर्गस्य सकारादेशविधायके सूत्रे -

**(१६०) अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य (८.३.४६)** सूत्रार्थः - समासे अनव्ययस्य अकारादुत्तरस्य विसर्गस्य कृञ्धातौ परे, कमधातौ परे, कंस-कुम्भ-पात्र-कुशा-कर्णीषु शब्देषु च परेषु नित्यं सकारः भवति- इति। न तु उत्तरपदस्थस्य विसर्गस्य सकारः भवति।

उदाहरणम्-

(१) अयः+कारः = अयस्कारः इति। कृञ्धातौ परे रूपम्। अत्र 'अयः' इति अव्ययं न। अतः अकारादुत्तरस्य विसर्गस्य सकारः सञ्जातः। एवमन्येषु अपि उदाहरणेषु दृष्टव्यम्।

(२) अयः+कामः = अयस्कामः इति। कमधातौ परे रूपम्।

(३) अयः+कंसः = अयस्कंसः इति। कंसशब्दे परे रूपम्।

(४) अयः+कम्भः = अयस्कुम्भः इति। कुम्भशब्दे परे रूपम्।

(५) अयः+पात्रम् = अयस्पात्रम् इति। पात्रशब्दे परे रूपम्।

(६) अयस्सहिता कुशा अयस्कुशा इति। कुशाशब्दे परे रूपम्।

(७) अयः+कर्णी = अयस्कर्णी इति। कर्णीशब्दे परे रूपम्।

**(१६१) अधश्शिरसी पदे (८.३.४७)** सूत्रार्थः - समासे पदशब्दे परे 'अधः, शिरः' इत्येतयोः विसर्गस्य सकारादेशः भवति- इति।

उदाहरणम्-

(१) अधः+पदम् = अधस्पदम् इति। अत्र पदशब्दे परे अधश्शब्दस्य विसर्गस्य सकारः।

(२) शिरः+पदम् = शिरस्पदम् इति। अत्र पदशब्दे परे शिरश्शब्दस्य विसर्गस्य सकारः।

**स्वावलोकनप्रश्नौ -**

(१) अयः + कर्णी इति स्थिते कति रूपाणि भवन्ति ?

(२) समासे पदशब्दे परे 'अधः शिरः' इत्येतयोः विसर्गस्य कः आदेशः भवति ?

## ६.१३.० विसर्गसन्धिसारः -

### ६.१३.१ विसर्गस्य सकारादेशविधानम् -

**विसर्गस्य सकारादेशविधायकानि सूत्राणि -**

(१) विसर्जनीयस्य सः (८.३.३४)

(२) सोऽपदादौ (८.३.३८)

(३) नमस्पुरसोर्गत्योः (८.३.४०)

(४) तिरसोऽन्यतरस्याम् (८.३.४२)

(५) अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य (८.३.४६)

(६) अधश्शिरसी पदे (८.३.४७)

**विसर्गस्य सकारादेशविधायके वार्त्तिके -**

(१) पाशकल्पककाम्येष्विति वाच्यम् (वा)

(२) काम्ये रोरेवेति वाच्यम् (वा)

**विसर्गस्य सकारस्थानम् -**

(१) च छ ट ठ त थ इत्येतेषु वर्णेषु परेषु विसर्गस्य सकारः भवति। शषस-वर्णेषु परेषु विकल्पेन सकारः भवति।

(२) पदादौ अविद्यमानस्य पाशप्रत्ययस्य पकारे परे तथा कल्पप्रत्ययस्य ककारे परे कप्रत्ययस्य ककारे परे विसर्गस्य सकारः भवति। पदादौ अविद्यमानस्य काम्यच्प्रत्ययस्य ककारे परे तु रुस्थाने आगतस्य विसर्गस्य एव सकारो भवति।

(३) गतिसञ्ज्ञयोः नमस्-पुरस्-शब्दयोः विसर्गस्य कवर्गे पवर्गे च परे सकारः भवति।

(४) तिरस्-शब्दस्य विसर्गस्य कवर्गे पवर्गे च परे विकल्पेन सकारः भवति।

(५) समासे अनव्ययस्य अकारादुत्तरस्य विसर्गस्य कृञ्धातौ परे, कमधातौ परे, कंस-कुम्भ-पात्र-कुशा-कर्णीषु शब्देषु च परेषु नित्यं सकारः भवति। परन्तु उत्तरपदस्थस्य विसर्गस्य सकारः न भवति।

(६) समासे पदशब्दे परे 'अधः, शिरः' इत्येतयोः विसर्गस्य सकारादेशः भवति। परन्तु अनुत्तरपदे = उत्तरपदे न भवति।

विसर्गस्य सकारादेशानन्तरं चछश-इत्येतेषु परेषु श्चुत्वसन्धिः, टठष-इत्येतेषु परेषु ष्टुत्वसन्धिश्च भवति।

### ६.१३.२ विसर्गस्य सकारादेशनिषेधः -

### विसर्गस्य सकारादेशनिषेधवार्त्तिकम् -

(१) अनव्ययस्येति वाच्यम् (वा)

**विसर्गस्य सकारादेशनिषेधस्थानम् -**

अव्ययविसर्गस्य अपदाद्योः कवर्गपवर्गयोः परयोः = पाशप्-कल्पप्-क-काम्यच्-इत्येतेषु प्रत्ययेषु परेषु सकारः न भवति।

### ६.१३.३ विसर्गस्य विसर्गविधानम् -

### विसर्गस्य विसर्गविधायके सूत्रे -

(१) शर्परे विसर्जनीयः (८.३.३५)

(२) वा शरि (८.३.३६)

**विसर्गस्य विसर्गस्थानम् -**

(१) विसर्गस्य समनन्तरं खर्वर्णाः भवेयुः, खर्वर्णसमनन्तरं शर्वर्णाः भवेयुः। तथा सति पूर्वं विद्यमानस्य विसर्गस्य विसर्गः एव भवति।

(२) विसर्गस्य शषस-वर्णेषु परेषु विकल्पेन विसर्गः भवति।

### ६.१३.४ विसर्गस्य जिह्वामूलीयोपध्मानीयविसर्गविधानम् -

### विसर्गस्य जिह्वामूलीयोपध्मानीयविसर्गविधायकं सूत्रम् -

(१) कुप्वो ᳲक ᳲपौ च (८.३.१७)

**विसर्गस्य जिह्वामूलीयोपध्मानीयविसर्गस्थानम् -**

विसर्गस्य कवर्गे परे पर्यायेण जिह्वामूलीयः विसर्गश्च भवतः। एवमेव विसर्गस्य पवर्गे परे पर्यायेण उपध्मानीयः विसर्गश्च भवतः।

## ६.१३.५ विसर्गस्य लोपविधानम् -

## विसर्गस्य लोपविधायकं वार्तिकम् -

(१) खर्परे शरि वा विसर्गलोपो वक्तव्यः (वा)

**विसर्गस्य लोपस्थानम् -**

विसर्गस्य समनन्तरं शर्वर्णाः भवेयुः, शर्वर्णसमनन्तरं खर्वर्णाः भवेयुः। तथा सति पूर्वं विद्यमानस्य विसर्गस्य विकल्पेन लोपो भवति।

## ६.१३.६ विसर्गस्य षत्वविधानम् -

## विसर्गस्य षत्वविधायकानि सूत्राणि -

(१) इणः षः (८.३.३९)

(२) इदुदुपधस्य चाप्रत्ययस्य (८.३.४१)

(३) द्विस्त्रिश्चतुरिति कृत्वोऽर्थे (८.३.४३)

(४) इसुसोः सामर्थ्ये (८.३.४४)

(५) नित्यं समासेऽनुत्तरपदस्थस्य (८.३.४५)

**विसर्गस्य षत्वस्थानम् -**

(१) पदादौ अविद्यमानस्य पाशप्प्रत्ययस्य पकारे परे तथा कल्पप्प्रत्ययस्य ककारे परे कप्रत्ययस्य ककारे परे इणः परस्य विसर्गस्य षकारः भवति। पदादौ अविद्यमानस्य काम्यच्प्रत्ययस्य ककारे परे तु रुस्थाने आगतस्य इणः परस्य विसर्गस्य एव षकारो भवति।

(२) उपधाभूतात् विद्यमानात् इकारात् उकारात् परस्य प्रत्ययावयवभिन्नस्य विसर्गस्य कवर्गपवर्गयोः परयोः षकारः भवति।

(३) कृत्वोऽर्थे वर्तमानानां 'द्विः त्रिः चतुः' इत्येतेषां विसर्गस्य कुप्वोः परयोः षकारो विकल्पेन भवति।

(४) 'इस् उस्' इत्यनयोः विसर्गस्य कुप्वोः परयोः षकारो विकल्पेन भवति।

(५) समासे अनुत्तरपदस्थस्य इस्-उसोः विसर्गस्य कुप्वोः परयोः नित्यं षकारः भवति।

अत्र सर्वत्र अनुत्तरपदम् इत्युक्ते प्रथमपदम् = पूर्वपदम् इत्यर्थः।

**।। इति विसर्गसन्धिप्रकरणम् ।।**

# ।। अथ सप्तमखण्डः स्वादिसन्धिप्रकरणम् ।।

## संरचना

७.० प्रस्तावना।

७.१ लक्षिताधिगमविशेषाः।

७.२ सकारस्य सजुष्-शब्दस्य च रुत्वविधायकं सूत्रम्।

७.३ 'रु'स्थाने उकारविधायकं सूत्रम्।

७.४ पूर्वसवर्णदीर्घविधायकं सूत्रम्।

७.५ पूर्वसवर्णदीर्घनिषेधसूत्रम्।

७.६ 'शिवोऽर्च्यः' इत्यस्य प्रक्रिया।

७.७ रुस्थाने उकारविधायकं सूत्रम्।

७.८ 'शिवो वन्द्यः' इत्यस्य प्रक्रिया।

७.९ रुस्थाने यकारविधायकं सूत्रम्।

७.१० देवा इह - देवायिह- इत्यनयोः प्रक्रिया।

७.११ लघूच्चारणयोः वकारयकारयोः विधानम्।

७.१२ यकारस्य लोपविधायकं सूत्रम्।

७.१३ भो अच्युतः - भोयच्युतः इत्यनयोः प्रक्रिया।

७.१४ यकारवकारयोः लोपविधायकं सूत्रम्।

७.१५ स उ एकाग्निः इत्यस्य प्रक्रिया।

७.१६ यकारस्य लोपविधायकं सूत्रम्।

७.१७ नकारस्य रेफविधायकं सूत्रम्।

७.१८ नकारस्य रुत्वविधायकं वार्त्तिकम्।

७.१९ नकारस्य रेफविधायकं वार्त्तिकम्।

७.२० रेफस्य लोपविधायकं सूत्रम्।

७.२१ दीर्घविधायकं सूत्रम्।

७.२२ परसूत्रप्राबल्यं तथा त्रिपाद्यां तु न प्राबल्यमिति निरूपणम्।

७.२३ सुप्रत्ययस्य लोपविधायके सूत्रे।

७.२४.० सन्धिसारः।

## ७.० प्रस्तावना -

सन्धिप्रकरणे एतावत्पर्यन्तं वयम् अच्सन्धिविषये प्रकृतिभावविषये हल्सन्धिविषये तथा विसर्गसन्धिविषये ज्ञातवन्तः। इदानीं स्वादिसन्धिविषये ज्ञास्यामः। स्वादिप्रत्ययानां भिन्नेषु वर्णेषु परेषु ये वर्णविकाराः भवन्ति तान् इदानीं ज्ञास्यामः।

## ७.१ लक्षिताधिगमविशेषाः -

एनं पाठं पठित्वा भवन्तः-

- स्वादिसन्धिविषये ज्ञातुं शक्नुवन्ति।
- स्वादीनां के के विकाराः भवन्ति इति ज्ञास्यन्ति।
- स्वादिसन्धिसूत्राणि तेषाम् अर्थं च ज्ञास्यन्ति।

## ७.२ सकारस्य सजुष्-शब्दस्य च रुत्वविधायकं सूत्रम् -

शिवशब्दात् **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण प्रथमाविभक्ति-एकवचने स्प्रत्यये शि व+स्+ अर्च्यः इति स्थिते **(१६२) ससजुषो रुः (८.२.६६)** सूत्रार्थः - पदान्तस्य सकारस्य तथा 'सजुष्' इति शब्दस्य च रुः स्यात्- इति। अनेन सूत्रेण सकारस्य रुत्वे शिवर् + अर्च्यः इति स्थिते -

## ७.३ 'रु'स्थाने उकारविधायकं सूत्रम् -

(१६३) **अतो रोरप्लुतादप्लुते (६.१.११३)** सूत्रार्थः - अप्लुतात् = प्लुतभिन्नात् अकारात् परस्य रोः = रुत्वस्य उकारः स्यात् अप्लुते = प्लुतभिन्ने अकारे परे- इति। अत्र अप्लुतात् = प्लुतभिन्नात्, अप्लुते = प्लुतभिन्ने इति उभयत्रापि ह्रस्व-अकार एव स्वीकर्तव्यः। रुस्थाने उत्वे कृते शिव+उ + अर्च्यः इति स्थिते-

**स्वावलोकनप्रश्नौ -**

(१) ससजुषो रुः (८.२.६६) इत्यनेन सूत्रेण कयोः रुत्वं भवति ?

(२) अतो रोरप्लुतादप्लुते (६.१.११३) इत्यनेन सूत्रेण कदा रुस्थाने उत्वं भवति ?

## ७.४ पूर्वसवर्णदीर्घविधायकं सूत्रम् -

**(१६४) प्रथमयोः पूर्वसवर्णः (६.१.१०२)** सूत्रार्थः - अक्वर्णानां प्रथमाद्वितीयाविभक्त्योः अचि परे उभयोः वर्णयोः स्थाने पूर्वसवर्णदीर्घ एकादेशः भवति- इति। शिव+उ इत्यत्र प्रथमाविभक्तेः एकवचनस्य प्रत्ययः भवति 'सु' इति। तस्य स्थाने रुत्वमागतम्। रुस्थाने उकारः आगतः। अतः 'शिव' इत्यस्य वकारात् परस्य अकारस्य उकारे परे प्रथमाविभक्तेः अच्परकत्वं जातम्। इदानीम् अनेन सूत्रेण पूर्वसवर्णः आगच्छति। तस्य निषेधसूत्रं कथयति-

## ७.५ पूर्वसवर्णदीर्घनिषेधसूत्रम् -

**(१६५) नादिचि (६.१.१०४)** सूत्रार्थः - अवर्णात् अचि परे पूर्वसवर्णदीर्घः न भवति- इति।

अनेन सूत्रेण **प्रथमयोः पूर्वसवर्णः (६.१.१०२)** इति सूत्रोक्तपूर्वसवर्णदीर्घः बाध्यते। अतः पूर्वसवर्णदीर्घः न भवति। शिवोऽर्च्यः इति उदाहरणम्।

**स्वावलोकनप्रश्नौ -**

(१) शिव+उ इति स्थिते प्रथमयोः पूर्वसवर्णः (६.१.१०२) इत्यस्य सूत्रस्य प्रसक्तिः भवति उत न?

(२) शिव+उ इति स्थिते नादिचि (६.१.१०४) इति सूत्रेण किं क्रियते ?

## ७.६ 'शिवोऽर्च्यः' इत्यस्य प्रक्रिया -

शिव+स् + अर्च्यः इति। **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण शिवशब्दात् सुप्रत्ययः।

शिव+र् + अर्च्यः इति। **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्।

शिव+उ अर्च्यः इति। **अतो रोरप्लुतादप्लुते (६.१.११३)** इति सूत्रेण रुस्थाने उकारः।

शिवो अर्च्यः इति। **आद्गुणः (६.१.८७)** इत्यनेन गुणः।

शिवोऽर्च्यः इति। **एङः पदान्तात् अति (६.१.१०९)** इत्यनेन पूर्वरूपं भवति। शिवोऽर्च्यः इति रूपं सिध्यति।

शिव+र् +वन्द्यः इति स्थिते **अतो रोरप्लुतादप्लुते (६.१.११३)** इति सूत्रे अप्लुते अकारे परे रोः उः स्यात् इत्युक्तत्वात् 'वन्द्यः' इत्यत्र वकारे परे कथं रोः उकारः इति शङ्कायां समाधानमुक्तम्-

## ७.७ रुस्थाने उकारविधायकं सूत्रम् -

**(१६६) हशि च (६-१-११४)** सूत्रार्थः - अप्लुतात् = प्लुतभिन्नात् अकारात् परस्य रोः उः स्यात् हश्वर्णे परे- इति। अतः रोः उत्वं सिध्यति। उदाहरणम्- शिवो वन्द्यः इति।

## ७.८ 'शिवो वन्द्यः' इत्यस्य प्रक्रिया -

शिव+स् + वन्द्यः इति। **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण शिवशब्दात् सुप्रत्ययः। उकारस्य लोपः।

शिव+र् वन्द्यः इति। **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्।

शिव+उ वन्द्यः इति। **हशि च (६-१-११४)** इति सूत्रेण रुस्थाने उकारः।

शिवो वन्द्य इति। **आद्गुणः (६.१.८७)** इत्यनेन गुणः। इत्थं शिवो वन्द्यः इति रूपम् सिध्यति।

## ७.९ रुस्थाने यकारविधायकं सूत्रम् -

**(१६७) भोभगोअघोअपूर्वस्य योऽशि (८.३.१७)** सूत्रार्थः - भोपूर्वकस्य भगोपूर्वकस्य अघोपूर्वकस्य

अकारपूर्वकस्य रोः यकारादेशः स्यात् अश्वर्णे परे- इति। अर्थात् भोर्, भगोर्, अघोर्, अर्, इत्यवस्थायां रोः यकारादेशः स्यात् इत्यर्थः। अत्र अकारपूर्वकस्य उदाहरणम्- देवा इह इति।

## ७.१० देवा इह - देवायिह- इत्यनयोः प्रक्रिया -

देव+अस् + इह इति। **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण देवशब्दात् जस्प्रत्ययः। जकारस्य लोपः।

देवास् इह इति। **प्रथमयोः पूर्वसवर्णः (६.१.१०२)** इति सूत्रेण पूर्वसवर्णदीर्घः

देवार् इह इति। **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्।

देवाय् इह इति। **भोभगोअघोअपूर्वस्य योऽशि (८.३.१७)** इति सूत्रेण रोः यकारादेशः।

देवा इह इति। **लोपः शाकल्यस्य (८.३.१९)** इति सूत्रेण विकल्पेन यलोपः। देवा इह इति सिध्यति।

देवायिह इति। **लोपः शाकल्यस्य (८.३.१९)** इति सूत्रेण यलोपाभावे देवायिह इति सिध्यति।

**स्वावलोकनप्रश्नौ -**

(१) हशि च (६-१-११४) इत्यनेन कदा रुस्थाने उत्वं विधीयते ?

(२) **भोभगोअघोअपूर्वस्य योऽशि (८.३.१७)** इत्यनेन कदा रुस्थाने यत्वं विधीयते ?

## ७.११ लघूच्चारणयोः वकारयकारयोः विधानम् -

**(१६८) व्योर्लघुप्रयत्नतरः शाकटायनस्य (८.३.१८)** सूत्रार्थः - पदान्तयोः वकारयकारयोः लघूच्चाराणौ वकारयकारौ वा स्तः अशि परे- इति। लघूच्चारणम् = वर्णानाम् उच्चारणकाले यदा जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं जायते तदा लघूच्चारणः इति व्यवहारः।

## ७.१२ यकारस्य लोपविधायकं सूत्रम् -

**(१६९) ओतो गार्ग्यस्य (८.३.२०)** सूत्रार्थः - ओकारात् परस्य अलघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात्।

उदाहरणम्- भो अच्युत।

## ७.१३ भो अच्युतः - भोयच्युतः इत्यनयोः प्रक्रिया -

भोस्, भगोस्, अघोस् इति सान्ताः निपाताः। तत्र-

भोर् अच्युतः इति। **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्।

भोय् अच्युतः इति। **भोभगोअघोअपूर्वस्य योऽशि (८.३.१७)** इति सूत्रेण रोः यादेशः।

भो अच्युतः इति। **ओतो गार्ग्यस्य (८.३.२०)** इति सूत्रेण अलघुप्रयत्नस्य यकारस्य लोपः।

भोयच्युतः इति। लघुप्रयत्नपक्षे यकारस्य लोपाभावे भोयच्युतः इति रूपं सिध्यति।

**स्वावलोकनप्रश्नौ -**

(१) लघूच्चारणमित्युक्ते किम् ?

(२) भोय् अच्युतः इति स्थिते केन सूत्रेण यकारस्य लोपः भवति ?

## ७.१४ यकारवकारयोः लोपविधायकं सूत्रम् -

**(१७०) उञि च पदे (८.३.२१)** सूत्रार्थः - पदान्तयोः अवर्णपूर्वयोः यकारवकारयोः उञि परे लोपः भवति- इति। 'उञ्' इति निपातः। ञकारः इत् भवति।

उदाहरणम्- स उ एकाग्निः इति। प्रक्रिया-

## ७.१५ स उ एकाग्निः इत्यस्य प्रक्रिया -

सस् उ एकाग्निः इति। **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङ-सोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण सुप्रत्ययः। उकारस्य लोपः।

सर् उ एकाग्निः इति। **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्।

सय् उ एकाग्निः इति। **भोभगोअघोअपूर्वस्य योऽशि (८.३.१७)** इति सूत्रेण रोः यादेशः।

स उ एकाग्निः इति। **उञि च पदे (८.३.२१)** इति सूत्रेण यलोपे स उ एकाग्निः इति रूपं सिध्यति।

## ७.१६ यकारस्य लोपविधायकं सूत्रम् -

**(१७१) हलि सर्वेषाम् (८.३.२२)** सूत्रार्थः - भोभगोअघोअपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्यात् हलि परे सर्वेषां मतेन।

उदाहरणानि- भो देवाः। भो लक्ष्मि। भो विद्वद्वृन्द। भगो नमस्ते। अघो याहि इति।

एषु सर्वेषु उदाहरणेषु प्रक्रिया-

सान्तानां निपातानां **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्।

**भोभगोअघोअपूर्वस्य योऽशि (८.३.१७)** इति सूत्रेण रोः यादेशः।

**हलि सर्वेषाम् (८.३.२२)** इति सूत्रेण यकारलोपः। अनया रीत्या पूर्वोक्तानि रूपाणि सिध्यन्ति।

अपूर्वस्य उदाहरणे- देवा नम्याः। देवा यान्ति इति। प्रक्रिया-

देव+अस् + नम्याः इति। **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङ-सोसाम्ङ्योस्सुप् (४.१.२)** इति सूत्रेण देवशब्दात् जस्प्रत्ययः। जकारस्य लोपः।

देवास् नम्याः इति। **प्रथमयोः पूर्वसवर्णः (६.१.१०२)** इति सूत्रेण पूर्वसवर्णदीर्घः

देवार् नम्याः इति। **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्।

देवाय् नम्याः इति। **भोभगोअघोअपूर्वस्य योऽशि (८.३.१७)** इति सूत्रेण रोः यकारादेशः।

देवा नम्याः इति। **हलि सर्वेषाम् (८.३.२२)** इति सूत्रेण यकारलोपः। अनया रीत्या इदं रूपं सिध्यति। देवा यान्ति इत्यत्रापि एवमेव प्रक्रिया।

**स्वावलोकनप्रश्नौ -**

(१) उञि च पदे (८.३.२१) इति सूत्रेण कयोः वर्णयोः लोपः भवति ?

(२) हलि सर्वेषाम् (८.३.२२) इत्यनेन कस्य वर्णस्य लोपः भवति ?

## ७.१७ नकारस्य रेफविधायकं सूत्रम् -

**(१७२) रोऽसुपि (८.२.६९)** सूत्रार्थः - अह्नः रेफादेशः स्यात् सुपि परे न भवति इति। नकारस्य रेफादेशे अहर् इति जातम्।

उदाहरणम्- अहरहः- अहन् + अहः इति स्थिते नकारस्य रेफादेशे अहरहः इति रूपम्।

अहर्गणः- अहन् + गणः इति स्थिते नकारस्य रेफादेशे अहर्गणः इति रूपम्।

**रोऽसुपि (८.२.६९)** इति सूत्रेण अहन्शब्दस्य नकारस्य रेफादेशः उक्तः। एवं सति अहोरूपम् इत्यादिस्थलेषु दोषः स्यात्। अतः वार्त्तिकमुक्तम्-

## ७.१८ नकारस्य रुत्वविधायकं वार्तिकम् -

**रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् (वा)** वार्त्तिकार्थः - रूप-रात्रि-रथन्तरशब्देषु परेषु अहन्शब्दस्य नकारस्य रुत्वं भवति- इति।

उदाहरणम् - अहोरूपम्। गतमहो रात्रिरेषा। अहोरात्रः। अहो रथन्तरम्। अत्र सर्वेषु उदाहरणेषु ह + न् इति अनेन वार्त्तिकेन रुत्वे उकारस्य लोपः।

ह + उ इति। **हशि च (६.१.११४)** इति सूत्रेण रुस्थाने उकारः। **आद्गुणः (६.१.८७)** इत्यनेन गुणः। हो इति भवति।

## ७.१९ नकारस्य रेफविधायकं वार्त्तिकम् -

**अहरादीनां पत्यदिषु वा रेफः (वा)** वार्त्तिकार्थः - अहरादिशब्दानां पत्यादिषु शब्देषु परेषु विकल्पेन रेफः भवति- इति।

उदाहरणम्- रेफे सति- अहर्पतिः, गीर्पतिः, धूर्पतिः। रेफाभावे पक्षे **कुप्वोᳵ क ᳵ पौ च (८.३.१७)** इति सूत्रेण जिह्वामूलीयः विसर्गश्च भवति। अहᳵपति। गीᳵपति। धूᳵपति। अहः पति। गीः पति। धूः पति।

**स्वावलोकनप्रश्नाः -**

(१) **रोऽसुपि (८.२.६९)** इत्यनेन कस्य वर्णस्य रेफादेशः भवति ?

(२) अहन्शब्दस्य नकारस्य कदा रुत्वं भवति ?

(३) अहरादिशब्दानां पत्यादिषु शब्देषु परेषु विकल्पेन रेफः भवति उत नित्यम् ?

## ७.२० रेफस्य लोपविधायकं सूत्रम् -

**(१७३) रो रि (८.३.१४)** सूत्रार्थः - रेफस्य रेफे परे लोपः स्यात्- इति।

## ७.२१ दीर्घविधायकं सूत्रम् -

**(१७४) ढ्रलोपे पूर्वस्य दीर्घोऽणः (६.३.१११)** सूत्रार्थः - ढलोपस्य निमित्तं ढः। रेफलोपस्य निमित्तं रेफः। तस्मिन् परे = ढकारे परे रेफे च परे पूर्वस्य अणः दीर्घः स्यात्- इति। पूर्वपदस्य अन्ते ढकारस्य अथ वा रेफस्य यदा लोपः भवति तदा ढकारात् पूर्वं यः अण् तस्य ढलोपनिमित्तके ढकारे परे दीर्घः भवति। एवं रेफात् पूर्वं यः अण् तस्य रेफलोपनिमित्तके रेफे परे दीर्घः भवति इत्यर्थः।

उदाहरणानि- पुनर् रमते, हरिर् रम्यः, शम्भुर् राजते इत्यत्र **रो रि (८.३.१४)** इत्यनेन सूत्रेण रेफस्य लोपः। पुनः रमते, हरी रम्यः, शम्भू राजते इति भवति।**ढ्रलोपे पूर्वस्य दीर्घोऽणः (६.३.१११)** इत्यनेन सूत्रेण तन्निमित्तकस्य एव रेफस्य परत्वात् पूर्वस्य अणः दीर्घः- पुना रमते, हरी रम्यः, शम्भू राजते इति रूपाणि। अत्र अणः = अकारस्य, इकारस्य, उकारस्य प्रत्येकमुदाहरणम्।

**स्वावलोकनप्रश्नौ -**

(१) रेफस्य लोपविधायकं सूत्रं किम् ?

(२) ढ्रलोपे पूर्वस्य दीर्घोऽणः (६.३.१११) इत्यनेन कस्य दीर्घः विधीयते ?

## ७.२२ परसूत्रप्राबल्यं तथा त्रिपाद्यां तु न प्राबल्यमिति निरूपणम् -

**(१७५) विप्रतिषेधे परं कार्यम् (१.४.२)** सूत्रार्थः - तुल्यबलविरोधे सति परं कार्यं स्यात्- इति। द्वयोः सूत्रयोः कुत्रचित् उदाहरणे = लक्ष्ये अवकाशः प्राप्तः स्यात्। तयोरेव एकत्र उदाहरणे = लक्ष्ये युगपत् सम्भवः अस्ति चेत् सः तुल्यबलविरोधः इत्युच्यते। तदा पूर्वकार्यं बाधित्वा परेण सूत्रेण यत् कार्यं भवति तत् कार्यं कर्तव्यमित्यर्थः।

उदाहरणम्- 'मनस्' इति शब्दस्य रथशब्दे परे मनस् + रथः इति स्थिते-

मनर् + रथः इति। **ससजुषो रुः (८.२.६६)** इति सूत्रेण सकारस्य रुत्वम्।

अस्यामवस्थायां रेफस्य **हशि च** (६-१-११४) इति सूत्रेण रुस्थाने उकारः प्राप्तः तथा **रो रि** (८.३.१४) इत्यनेन रेफस्य लोपश्च प्राप्तः। इदानीं **विप्रतिषेधे परं कार्यम्** (१.४.२) इति सूत्रेण व्यवस्था क्रियते तुल्यबलविरोधे परं कार्यमिति। **हशि च** (६.१.११४) इत्यस्य शिवो वन्द्यः इत्यत्र उदाहरणं प्राप्तम्। **रो रि** (८.३.१४) इत्यस्य पुना रमते इत्यत्र उदाहरणं प्राप्तम्। अतः अत्र **रो रि** (८.३.१४) इति सूत्रमेव प्रवर्तते। तदा रेफस्य लोपे कृते इष्टसिद्धिः न भवति। एवं रेफस्य लोपे प्राप्ते **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन त्रिपादीस्थसूत्रस्य **रो रि** (८.३.१४) इत्यस्य असिद्धत्वात् सपादसप्ताध्यायीस्थस्य **हशि च** (६.१.११४) इति सूत्रेण रोः स्थाने उकारादेशे **आद्गुणः** (६.१.८७) इति गुणे च मनोरथः इति सिध्यति।

## ७.२३ सुप्रत्ययस्य लोपविधायके सूत्रे -

**(१७६) एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६.१.१३२)** सूत्रार्थः - ककाररहितस्य एतद्शब्दस्य तद्शब्दस्य च सुप्रत्ययस्य लोपः भवति हलि परे। नञ्समासे न भवति- इति।

उदाहरणम्- एषः विष्णुः = एष विष्णुः। सः शम्भुः = स शम्भुः। अत्र अनेन सूत्रेण एतद्शब्दस्य तद्शब्दस्य च सुप्रत्ययस्य लोपः जातः।

**(१७७) सोऽचि लोपे चेत्पादपूरणम् (६.१.१३४)** सूत्रार्थः - 'सस्' इत्येतस्य सुप्रत्ययस्य लोपकरणेनैव पादः पूर्यते चेत् तस्य सुप्रत्ययस्य लोपः भवति अचि परे- इति।

उदाहरणम्- सैष दाशरथी रामः- इति एकः पादः।

सस् एषः इति स्थिते अनेन सूत्रेण सुप्रत्ययस्य लोपः।

स एषः इत्यवस्थायाम्- **वृद्धिरेचि** (६.१.८८) इत्यनेन वृद्धिः। सैष दाशरथी रामः इति। सुप्रत्ययस्य लोपे कृते वृद्ध्यनन्तरमेव पादः पूर्यते। वृद्ध्यर्थं सुलोपः अपेक्षितः। अत लोपः कृतः।

**स्वावलोकनप्रश्नौ -**

(१) एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६.१.१३२) इति सूत्रेण कयोः शब्दयोः सुप्रत्ययस्य लोपः भवति ?

(२) सोऽचि लोपे चेत्पादपूरणम् (६.१.१३४) इत्यनेन कस्य प्रत्ययस्य लोपः विधीयते ?

## ७.२४.० सन्धिसारः -

### ७.२४.१ रुत्वविधानम् -

**रुत्वविधायकं सूत्रम् -**

(१) ससजुषो रुः (८.२.६६)

**रुत्वविधायकं वार्तिकम् -**

(१) रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् (वा)

**रुत्वविधानस्थानम् -**

(१) पदान्तस्य सकारस्य तथा 'सजुष्' इति शब्दस्य च रुत्वं भवति।

(२) रूप-रात्रि-रथन्तरशब्देषु परेषु अहन्शब्दस्य नकारस्य रुत्वं भवति।

## ७.२४.२ रुस्थाने उत्वविधानम् -

## रुस्थाने उकारविधायके सूत्रे -

(१) अतो रोरप्लुतादप्लुते (६.१.११३)

(२) हशि च (६-१-११४)

**रुस्थाने उत्वविधानस्थानम् -**

(१) अप्लुतात् अकारात् परं विद्यमानस्य रोः अप्लुते अकारे परे उकारः भवति।

(२) अप्लुतात् अकारात् परस्य रोः हश्वर्णे परे उकारः भवति।

## ७.२४.३ रोः यकारविधानम् -

## रुस्थाने यकारविधायकं सूत्रम् -

(१) भोभगोअघोअपूर्वस्य योऽशि (८.३.१७)

**रोः यकारविधानस्थानम् -**

भोपूर्वकस्य भगोपूर्वकस्य अघोपूर्वकस्य अकारपूर्वकस्य रोः अश्वर्णे परे यकारादेशः भवति।

## ७.२४.४ यकारस्य लोपविधानम् -

## यकारस्य लोपविधायके सूत्रे -

(१) ओतो गार्ग्यस्य (८.३.२०)

(२) हलि सर्वेषाम् (८.३.२२)

**यकारस्य लोपविधानस्थानम् -**

(१) ओकारात् परस्य अलघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात्।

(२) भोभगोअघोअपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य हलि परे लोपो भवति।

## ७.२४.५ यकारवकारयोः लोपविधानम् -

## यकारवकारयोः लोपविधायकं सूत्रम् -

(१) उञि च पदे (८.३.२१)

**यकारवकारयोः लोपविधानस्थानम् -**

पदान्तयोः अवर्णपूर्वयोः यकारवकारयोः उञि परे लोपः भवति।

## ७.२४.६ नकारस्य रेफविधानम् -

## नकारस्य रेफविधायकं सूत्रम् -

(१) रोऽसुपि (८.२.६९)

### नकारस्य रेफविधायकं वार्त्तिकम् -

(१) अहरादीनां पत्यदिषु वा रेफः (वा)

**नकारस्य रेफविधानस्थानम् -**

(१) अहन्शब्दस्य नकारस्य रेफादेशः स्यात्। सुपि परे न भवति।

(२) अहरादिशब्दानां पत्यादिषु शब्देषु परेषु विकल्पेन रेफः भवति।

### ७.२४.७ रेफस्य लोपविधानम् -

### रेफस्य लोपविधायकं सूत्रम् -

(१) रो रि (८.३.१४)

**रेफस्य लोपविधानस्थानम् -**

रेफस्य रेफे परे लोपो भवति।

### ७.२४.८ दीर्घविधानम् -

### दीर्घविधायकं सूत्रम् -

(१) ढ्रलोपे पूर्वस्य दीर्घोऽणः (६.३.१११)

**दीर्घविधानस्थानम् -**

पूर्वपदस्य अन्ते ढकारस्य अथ वा रेफस्य यदा लोपः भवति तदा ढकारात् पूर्वं यः अण् तस्य ढलोपनिमित्तके ढकारे परे दीर्घः भवति। एवं रेफात् पूर्वं यः अण् तस्य रेफलोपनिमित्तके रेफे परे दीर्घः भवति इत्यर्थः।

### ७.२४.९ सुप्रत्ययस्य लोपविधानम् -

### सुप्रत्ययस्य लोपविधायके सूत्रे -

(१) एतत्तदोः सुलोपोऽकोरनञ्समासे हलि (६.१.१३२)

(२) सोऽचि लोपे चेत्पादपूरणम् (६.१.१३४)

**सुप्रत्ययस्य लोपविधानस्थानम् -**

(१) ककाररहितस्य एतद्शब्दस्य तद्शब्दस्य च सुप्रत्ययस्य लोपो भवति।

(२) ‘सस्’ इत्येतस्य सुप्रत्ययस्य लोपकरणेनैव पादः पूर्यते चेत् तस्य सुप्रत्ययस्य अचि परे लोपो भवति।

**।। इति स्वादिसन्धिप्रकरणम् ।।**

# ।। अष्टमखण्डः ।।

## शब्दाधिकारे हलन्तपकरणस्य सामान्यकथनपुरस्सरं युष्मद्–अस्मद्शब्दरूपसाधनप्रकारः

### ८.१. प्रस्तावना

संस्कृतभाषायाः संरचने पदानां प्रयोगो विधीयते । तच्च पदं द्विविधम् । सुवन्तं तिङन्तञ्च । सुवन्तपदं प्रातिपदिकात् शब्दाद्वा 'सुप्'प्रत्ययसन्नियोगेन निष्पद्यते । तत्र प्रकृतिः प्रातिपदिकमिति नाम्ना गृह्यते । प्रत्ययश्च सुप् (सु,औ,जस्, अम्,औट्,शस्, टा,भ्याम्, भिस्, ङे,भ्याम्,भ्यस्, ङस्,भ्याम्,भ्यस्, ङसः,ओस्,आम्, ङि,ओस्,सुप्) इति भावेनावगम्यते । इमे प्रत्ययाः विभक्तिभावेन विदिताः भवन्ति । ताश्च पुनः सप्तविभक्तयः प्रथमा–द्वितीया–तृतीया–चतुर्थी–पञ्चमी–षष्ठी–सप्तमीति भावेन । प्रथमाविभक्तेः सम्बोधने प्रयोगो जायते । इदमपरमपि वैचित्र्यं यत् पुँल्लिङ्ग–स्त्रीलिङ्ग–क्लीवलिङ्ग–व्यवस्थामादाय शब्देषु प्रातिपदिकेषु वा विभागकल्पनं क्रियते । एवञ्च शब्दानामन्ते विद्यमानं वर्णमादाय प्रक्रियादशायां तस्य शब्दस्य 'अ'कारान्तशब्द, 'च'कारान्तशब्दः चेति भावेनाभिधानं प्रवर्त्तते । अनेन प्रकारेण सुवन्तपदनिष्पत्त;ये कल्पनद्वयमागतम् । 'अ'कारान्तादिभावेन शब्दानां परिचयसाधनं पुँल्लिङ्ग–स्त्रीलिङ्ग–क्लीवलिङ्गभावेन तत्र लिङ्गाधानम् । तेनैव क्रमेण प्रकारेण च साधनप्रक्रियायां हलन्तप्रातिपदिक–व्यवस्था लोके समायाता परिचयेन समधिगता च । लिङ्गत्रयस्यानुसन्धानेन हलन्तपुँल्लिङ्गम्, हलन्तस्त्रीलिङ्गम्, हलन्तनपुंसकलिङ्गम् इति विभाजनमागच्छति । सिद्धान्तकौमुद्यां तदर्थं त्रीणि प्रकरणानि संघटितानि । हलन्तपुंलिङ्गप्रकरणम्, हलन्तस्त्रीलिङ्गप्रकरणम्, हलन्तनपुंसकलिङ्गप्रकरणम् चेति । प्रक्रियासाधनाय १२२ संख्यकानि पाणिनीयसूत्राणि

[ (हल.पुं.) ११५ + (हल.स्त्री.) ०३ + (हल.नपुं.) ०४ = १२२ ]

प्रकरणेऽस्मिन् अभ्युपगतानि विद्यन्ते । विभाजनक्रमेण इमे सन्ति शब्दाः अनुशासनविधौ प्रतिपन्नाः ।

१. 'च'कारान्ताः शब्दाः प्राञ्च्, प्रत्यञ्च्, उदञ्च्, सम्यञ्च, वाच्–प्रभृतयः ।
२. 'ज'कारान्ताः शब्दाः ऋत्विज्, युज्, सुयुज्, खञ्ज्, राज् प्रभृतयः ।
३. 'त'कारान्ताः शब्दाः महत्, धीमत्, भवत्, ददत्, तुदत्, दीव्यत् प्रभृतयः ।
४. 'द'कारान्ताः शब्दाः सुपाद्, युष्मद्, अस्मद् ।
५. 'न'कारान्ताः शब्दाः राजन्, यज्वन्, ब्रह्मन्, मघवन्, अहन्, युवन् प्रभृतयः ।
६. 'प'कारान्ताः शब्दाः गुप् ।
७. 'र'कारान्ताः शब्दाः गिर्, पुर्, वार् ।
८. 'व'कारान्ताः शब्दाः सुदिव्, दिव् ।
९. 'श'कारान्ताः शब्दाः तादृश्, नश्, दिश्, दृश् ।

१०. 'ष'कारान्ताः शब्दाः दधृष्, रत्नपुष्, पिपठिष्, चिकीर्ष .... ।

११. 'स'कारान्ताः शब्दाः पुमस्, विद्वस्, वेधस्, पयम् ।

१२. 'ह'कारान्ताः शब्दाः लिह्, दुह्, द्रुह्, उपानह्, स्वनडुह् ।

१३. 'सर्वनामशब्दाः' किम्, इदम्, यद्, तद्, अदस् ।

१४. संख्यावाचकाः शब्दाः चतुर्, पञ्चन्, सप्तन्, अष्टन् ।

एतेषु केषाञ्चित् शब्दानां पुंल्लिङ्गे, केषाञ्चित् शब्दानां स्त्रीलिङ्गे, केषाञ्चित् शब्दानां नपुंसकलिङ्गे च प्रयोगः लक्षीक्रियते । लोकप्रयोगविज्ञानं तत्र कृते कारणम् । लोकाश्रयत्वात् लिङ्गविधानव्यवस्था शब्दानां निश्चयीक्रियते । यदस्तु एतेषां शब्दानां प्रथमादिविभक्त्यन्तेन किं रूपं जायते तदेव विचारयामः । यतो हि पदस्यैव प्रयोगे संस्थापनमागच्छति तस्मादेव पदात् अर्थबोधः आशयबोधश्च उपर्य्युक्तशब्दानां पदरूपकल्पने मूलशब्दे संघटितस्य वर्णस्य प्रत्ययस्थितस्य वर्णस्य च विपरिणामः, लोपः कदाचिन्नूतनानां वर्णानामागमः कस्यचिद्वर्णस्य स्थाने वर्णादेशः, गुणकार्य्यम्, वृद्धिकार्य्यम्, णत्व-षत्व-कार्य्यम्, विभक्तेः लुक्कार्य्यम्, सम्पूर्णायाः प्रकृतेः स्थाने नूतनस्यादेशः इत्यनेकविधं प्रक्रियात्मकं कार्य्यम् ।

युष्मद्शब्दः अस्मद्शब्दः वाक्यव्यवहारे कर्त्तृपदभावेन सर्वदा वाक्यं नियमयति । प्रथमादिषु सप्तविभक्तिषु तस्य प्रयोगः विभिन्नेन तात्पर्य्येण समागच्छति । शब्दान्तरापेक्षया तयोः शब्दयोः बहुलतया व्यवहारः प्रतिदिनं प्रवर्त्तते । काव्यनाटकादिषु सर्वत्र शास्त्रे तयोः शब्दयोः प्रयोगः विदितो जायते । स्वादिषु विभक्तिषु तयोः शब्दयोः रूपनिष्पत्तौ विभिन्नता प्रत्येति । अतः हलन्तप्रकरणे 'द'कारान्तशब्दसाधन-विचारापेक्षया पृथक्तया प्रतिपादनमुपस्थापनञ्च कर्त्तुं विचारः ।

## ८.२. उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- हलन्तशब्द इति नामकरणं निर्णेतुं शक्नुवन्ति ।
- प्रकरणानां परिचयं प्राप्स्यन्ति ।
- लिङ्गाधानं ज्ञास्यन्ति ।
- हलन्तपुंल्लिङ्गप्रकरणे रूपसाधनाय प्रोक्तानां शब्दानां परिचयं प्राप्स्यन्ति ।
- हलन्तस्त्रीलिङ्गप्रकरणे रूपसाधनाय प्रोक्तानां शब्दानां परिचयमधिगमिष्यन्ति ।
- हलन्तनपुंसकलिङ्गप्रकरणे रूपसाधनाय प्रोक्तानां शब्दानां परिचयं लप्स्यन्ते ।
- युष्मद्-अस्मद्शब्दयोः शब्दान्तरापेक्षया भिन्नत्वं ज्ञास्यन्ति ।
- सप्तसु विभक्तिषु युष्म्शब्दस्य अस्मद्शब्दस्य च रूपसाधनार्थं पाणिनीयसूत्राण्याकलयिष्यन्ति ।
- सूत्रेषु पारिभाषिकशब्दविषये ज्ञानमाहरिष्यन्ति ।
- सूत्रेषु विभक्तिविषयकं याथार्थ्यमनुगमिष्यन्ति ।
- सूत्रैः युष्मद्स्थाने / युष्मद्शब्दे वा आदेशमाकलयिष्यन्ति ।

- सूत्रैः अस्मद्स्थाने / अस्मद्शब्दे वा आदेशमाकलयिष्यन्ति ।
- सूत्रैः प्रत्ययस्थाने / विभक्तिस्थाने वा आदेशं ज्ञास्यन्ति ।
- सूत्राणामर्थपरिकल्पनं ज्ञास्यन्ति । प्रयोगस्थलं लक्षीकरिष्यन्ति ।
- सूत्रप्रयोगद्वारा युष्मद्-अस्मद्शब्दयोः रूपसाधनं प्राप्स्यन्ति ।
- युष्मद्-अस्मद्शब्दयोः सप्तसु विभक्तिषु रूपलिखनप्रकारमधिगमिष्यन्ति ।
- युष्मद्-अस्मद्शब्दयोः द्वितीया-चतुर्थी-षष्ठीविभक्तिषु त्वा, मा, वाम्, नौ, वः, नः, इति रूपमप्यवगमिष्यन्ति ।

## ८.३. हलन्तशब्द इति नामकरणम्

हल् अन्तो येषां ते हलन्ताः । हलन्ताश्च ते शब्दाः हलन्तशब्दाः । हल् इति प्रत्याहारः, यत्र 'हयवरट्' इति सूत्रादारभ्य 'हल' इति सूत्रं यावत् पठितेषु माहेश्वरसूत्रेषु ये वर्णाः विद्यन्ते त एव ग्राह्याः । ह, य, व, र, ल, ञ, म, ङ, ण, न, झ, भ, घ, ढ़, ध, ज, ब, ग, ड़, द, ख, फ, छ, ठ, थ, च, ट, क, प, श, ष, स इति इमे वर्णाः हल् पदेन बोधनीयाः भवन्ति । तेषु कस्यचिद् वर्णस्य अन्त्यविद्यमानता-मादाय यः शब्दः संघटितो विद्यते स एव हलन्तशब्दः । व्यञ्जनवर्णः यस्य शब्दस्य अन्त्ये विद्यते स शब्दः विज्ञेयः । हल् इति व्यञ्जनस्य पारिभाषिकशब्दः । लिह्, दुह्, अनडुह्, सुदिव्, राजन्, अहन्, परिव्राज्, महत्, प्राञ्च्, वाच्, गुप्, गिर्, तादृश्, दिश्, धनुष्, पयस् प्रभृतयः शब्दाः हलन्तशब्दभावेन विदिताः भवन्ति । व्याकरणे प्रक्रियासाधनदशायां प्रक्रियात्मककार्य्यविचारे वा दद्दिष्टे शब्दे विद्यमानमन्तिमवर्ण-मादाय शब्दानां, प्रकरणानां, प्रक्रियानाञ्च नामकरणं क्रियते । लघुनोपायेन प्रतिपत्तिसाधनं वैयाकरणानामेव भवति पुनरुद्देश्यम् । अतः इयं संघटनव्यवस्था तैः समादृता । शब्दप्रकरणे अजन्तशब्दाः हलन्तशब्दाः सन्धिप्रकरणे अच्सन्धि, हलसन्धि, तत्र पुनः पृथग्वर्णग्रहणमादाय 'ऋ'कारान्त-'ह'कारान्त इत्यादिविवेचनम् । प्रकरणनिर्माणे सूत्रसंघटने च एषो विधिः वैयाकरणैः समाद्रियते । वैयाकरणानां संसारो भवति वर्णः, पदं, वाक्यमिति । तत्र प्राथम्येन वर्णमादाय व्यवहारः प्रारभ्यते । अतः शब्दाधिकारे हलन्तशब्द इति शब्दानामेकं नामकरणम् । शब्दविभाजनमिति विवेकः ।

**स्वावलोकनप्रश्नाः**

१. हलन्तइत्यस्य कः विग्रहः ?

२. हलन्तशब्दः इत्यस्य कः विग्रहः ?

३. हल् इति किम् ?

४. के हलन्तवर्णाः ?

५. 'हल्' इत्यस्य लोकप्रसिद्धः शब्दः कः ?

६. के हलन्तशब्दभावेन विदिताः ?

७. वर्णमादाय कथं शब्दानां व्यवहारः ?

८. वर्णमादाय शब्दव्यवहारः वैयाकरणैः कुत्र क्रियते ?

## ८.४. शब्दाधिकारे हलन्तप्रकरणानां परिचयः

षड्लिङ्गप्रकरणे हलन्तशब्दानां पदसाधनं यदा विचार्य्यते तदा लिङ्गविचारानुसारं त्रीणि प्रकरणानि कल्पितानि जायन्ते । तद्यथा

१. हलन्तपुँल्लिङ्गप्रकरणम्
२. हलन्तस्त्रीलिङ्गप्रकरणम्
३. हलन्तनपुंसकलिङ्गप्रकरणम् ।

लोकव्यवहारानुसारं शब्दानां लिङ्गव्यवस्था इति सिद्धान्तः । त्रिषु लिङ्गेषु हलन्तशब्दानां व्यवहारः दृश्यते । तत्र प्रत्येकं कृते प्रकरणमेकमिति विचारात् त्रीणि प्रकरणानि संघटितानि ।

**हलन्तपुंल्लिङ्गप्रकरणम्**

पुमान् लिङ्गं येषां शब्दानां ते पुँल्लिङ्गाः । व्याकरणे लिङ्गं भवति पदसाधुत्वप्रयोजकः धर्मविशेषः । पुमान् भवति व्याकरणोक्तसंस्कारविशेषनिमित्तभूतः सत्त्वादिगुणानामुपचयरूपः । येषां शब्दानां विवेचनबलात् प्रयोगवशाच्च पुंल्लिङ्गे व्यवहार आगच्छति तेषामनुशासनार्थमिदं प्रकरणं हलन्तपुंल्लिङ्ग-प्रकरणम् । अनुशासनविधानाय सिद्धान्तकौमुद्यां ११५ संख्याकानि पाणिनीयानि सूत्राणि सन्ति ।

**हलन्तस्त्रीलिङ्गप्रकरणम्**

स्त्री लिङ्गं येषां शब्दानां ते स्त्रीलिङ्गा: । येषां शब्दानां स्त्रीलिङ्गे व्यवहार आगच्छति तेषामनुशासनार्थमिदं प्रकरणम्, हलन्तस्त्रीलिङ्गप्रकरणम् । अनुशासनप्रक्रियासाधनाय कौमुद्यां त्रीणि सूत्राणि सन्ति ।

**हलन्तनपुंसकलिङ्गप्रकरणम्**

यस्य शब्दस्य पुँल्लिङ्गे स्त्रीलिङ्गे च व्यवहारपथे विद्यमानता नास्ति तस्य नपुंसकलिङ्गमेव भवति । तदर्थमुद्दिष्टं प्रकरणं हलन्तनपुंसकलिङ्गप्रकरणम् । अनुशासनप्रक्रियासाधनाय कौमुद्यां चत्वारि सूत्राणि सन्ति ।

**स्वावलोकनप्रश्नाः**

१. शब्दाधिकारे हलन्तप्रकरणे रूपसाधनाय कति प्रकरणानि सन्ति कानि च तानि ?

२. हलन्तशब्दरूपसाधनाय केन कारणेन त्रीणि प्रकरणान्युद्दिष्टानि ?

३. व्याकरणे लिङ्गं किं भवति ?

४. हलन्तपुंल्लिङ्गशब्दरूपसाधनाय कति पाणिनीयसूत्राणि सन्ति ?

५. कस्य शब्दस्य नपुंसकलिङ्गे विद्यमानता आगच्छति ?

## ८.५. हलन्तशब्दानां लिङ्गविधानम्

शब्दानां लिङ्गविचारविषये महाभाष्यादिषु अनेके उपाया: प्रदर्शिता: । तेषु सत्त्वरजस्तमसां अपचयापचयस्थितिरेक: अन्यतम: उपायविशेष: । सत्त्वाधिक्ये पुँलिङ्गम्, रजस: आधिक्ये स्त्रीलिङ्गम्, तमस: आधिक्ये नपुंसकलिङ्गम् । पदमात्रोपादानभूतानामुपचयोपचयस्थितयो विद्यन्त एव । सर्वोपरि लोकव्यवहार: सर्वविधप्रमाणमतिशेते । लोके यस्य शब्दस्य यस्मिन् लिङ्गे व्यवहारो विद्यते तस्य शब्दस्य तदेव लिङ्गमिति निर्णय: । महाभाष्ये उक्तं लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य । शब्दशक्तिस्वभावात् कश्चिच्छब्द: एकं लिङ्गं वक्ति कश्चिद्द्वयं कश्चित् त्रयमिति । एतस्य निरूपणं कोशाप्तवाक्याद् भवितुमर्हति । तेनैव क्रमेण कारणेन च हलन्तशब्दानां लिङ्गव्यवस्थाविधानमुपजायते ।

| | |
|---|---|
| 'ह'कारान्त: | लिह्शब्द: पुंल्लिङ्गे । |
| | उपानह्शब्द: स्त्रीलिङ्गे । |
| | स्वनडुह्शब्द: क्लीवलिङ्गे । |
| 'न'कारान्त: | राजन् शब्द: पुंल्लिङ्गे । |
| | अहन् शब्द: नपुंसकलिङ्गे । |
| 'श'कारान्त: | तादृश्, नश् ..... पुं. । |
| | दिश् ...... स्त्री. । |
| | ..........प्रकृतय: । |

**स्वावलोकनप्रश्नाः**

१. शब्दानां कतिलिङ्गानि सन्ति ?

२. सत्त्वाधिक्ये किं लिङ्गं जायते ?

३. रजस: आधिक्ये किं लिङ्गं जायते ?

४. तमस: आधिक्ये किं लिङ्गं जायते ?

५. शब्दानां लिङ्गनिरूपणविषये भाष्यसिद्धान्त: क: ?

६. शब्दानां एकलिङ्गादिनिरूपणविषये किं वाक्यं प्रमाणम् ?

## ८.६. हलन्तपुँल्लिङ्गप्रकरणे रूपसाधनाय प्रोक्ता: शब्दा:

हलन्तपुँल्लिङ्गप्रकरणे स्वादिषु सप्तविभक्तिषु रूपसाधनाय 'ह'कारान्तेन हलन्तशब्दा: कौमुद्यां प्रोक्ता: । माहेश्वरसूत्रेषु वर्णप्रकरणे प्रथमतया 'ह'कार: (हयवरट्) प्रयुक्त इति कारणात् । पुनश्च स्वीकृतेषु अष्टसु वर्णोच्चारणस्थानेषु कण्ठस्यैवाद्यत्वात् ।

१. 'ह'कारान्ता: शब्दा: लिह्, दुह्, द्रुह्, विश्ववाह्, अनुडुह्, तुरसाह् ।

२. 'व'कारान्तशब्दा: सुदिव् ।

| | | |
|---|---|---|
| ३. | ‘न’कारान्तशब्दा: | राजन्, यज्वन्, ब्रह्मन्, वृत्रहन्, मघवन्, श्वन्, युवन्, अर्वन्, पथिन् । |
| ४. | ‘ज’कारान्तशब्दा: | युज्, सुयुज्, खञ्ज्, परिव्राज्, ऋत्विज् । |
| ५. | ‘त’कारान्तशब्दा: | महत्, धीमत्, भवत्, ददत् । |
| ६. | ‘द’कारान्तशब्दा: | सुपाद् । |
| ७. | ‘च’कारान्तशब्दा: | प्राञ्च्, प्रत्यञ्च्, उदञ्च्, तिर्य्यञ्च् । |
| ८. | ‘प’कारान्तशब्दा: | गुप् । |
| ९. | ‘श’कारान्तशब्दा: | तादृश्, नश्, घृतस्पृश् । |
| १०. | ‘ष’कारान्तशब्दा: | दधृष्, पिपठिष् । |
| ११. | ‘स’कारान्तशब्दा: | पुमस्, विद्वस्, उशनस्, वेधस्, अनेहस् । |
| १२. | सर्वनामशब्दा: | किम्, इदम्, तद्, त्यद्, एतद्, अदस् । |
| १३. | संख्यावाचकशब्दा: | पञ्चन्, चतुर्, सप्तन्, अष्टन् ....... । |

**स्वावलोकनप्रश्नाः**

१. हलन्तपुँल्लिङ्गप्रकरणे शब्दरूपसाधनाय ‘ह’कारान्तशब्द: किमर्थं प्रथमं प्रोक्त: ?

२. पञ्चानां ‘न’कारान्तहलन्तशब्दानाम् उदाहरणं देयम् ?

३. पञ्चानां ‘स’कारान्तहलन्तशब्दानाम् उदाहरणं देयम् ?

४. त्रयाणां ‘त’कारान्तहलन्तशब्दानाम् उदाहरणं देयम् ?

५. के संख्यावाचका: हलन्तशब्दा: ?

६. ‘व’कारान्तस्य हलन्तशब्दस्यैकमुदाहरणं देयम् ?

## ८.७. हलन्तस्त्रीलिङ्गप्रकरणे रूपसाधनाय प्रोक्ता: शब्दा:

हलन्तस्त्रीलिङ्गप्रकरणे स्वादिषु सप्तविभक्तिषु रूपसाधनाय हकारान्तेन हलन्तशब्दा: प्रारब्धा:

प्रोक्ताश्च । पूर्ववत् कारणमवधेयं जायते । स्त्रीलिङ्गे रूपसाधनाय त्रीणि सूत्राणि कौमुद्यां वर्त्तन्ते ।

१. 'ह'कारान्तशब्दाः उपानह्, उष्णिह् ।
२. 'व'कारान्तशब्दाः दिव् ।
३. 'च'कारान्तशब्दाः वाच् ।
४. 'श'कारान्तशब्दाः दिश्, दृश् ।
५. 'र'कारान्तशब्दाः गिर्, पुर् ।
६. हलन्तसर्वनामशब्दाः किम्, इदम्, तद्, त्यद् ...... ।
७. संख्यावाचकशब्दाः चतुर् ।

**स्वावलोकनप्रश्नाः**

१. 'ह'कारान्तहलन्तस्त्रीलिङ्गशब्दस्योदाहरणं देयम् ?

२. दिश्-शब्दः कस्मिन् लिङ्गे वर्त्तते ?

३. गिर्-पुर्शब्दयोः कस्मिन् लिङ्गे वर्त्तमानता ?

४. 'व'कारान्तहलन्तस्त्रीलिङ्गशब्दस्योदाहरणं देयम् ?

५. हलन्तस्त्रीलिङ्गशब्दरूपसाधनाय कौमुद्यां कति सूत्राणि सन्ति ?

## ८.८. हलन्तनपुंसकलिङ्गप्रकरणे रूपसाधनाय प्रोक्ताः शब्दाः

हलन्तनपुंसकलिङ्गप्रकरणे रूपसाधनाय स्वादिषु सप्तविभक्तिषु 'ह'कारान्तेन हलन्तशब्दाः प्रारब्धाः प्रोक्ताश्च विद्यन्ते । पूर्ववत् कारणमवधेयम् । एतद्रूपसाधनाय कौमुद्यां पाणिनीयानि चत्वारि सूत्राणि सन्ति ।

१. 'ह'कारान्तशब्दाः स्वनडुह् ।
२. 'न'कारान्तशब्दाः अहन्, दण्डिन्, सुपचिन् ।
३. 'ज'कारान्तशब्दाः ऊर्ज ।
४. 'त'कारान्तशब्दाः सकृत्, ददत्, तुदत्, पचत्, दीव्यत् ।

५. 'र'कारान्तशब्दा: वार् ।

६. 'ष'कारान्तशब्दा: धनुष् ।

७. 'स'कारान्तशब्दा: पयस्, सुपुम्स् ।

८. संख्यावाचकशब्दा: चतुर्, पञ्चन्, सप्तन्, अष्टन् ।

९. हलन्तसर्वनामशब्दा: किम्, इदम्, तद् ....... ।

**स्वावलोकनप्रश्नाः**

१. हकारान्तहलन्तनपुंसकशब्दस्योदाहरणं देयम् ?

२. अहन् शब्द: कस्मिन् लिङ्गे वर्त्तते ?

३. तकारान्तहलन्तशब्दानामुदाहरणं देयम् ?

४. 'पयस्'शब्द: कस्मिन् लिङ्गे वर्त्तते ?

५. हलन्तनपुंसकलिङ्गे वर्त्तमानयो: 'ज'कारान्त-'न'कारान्तशब्दयोरेकैकमुदाहरणं देयम् ?

## ८.९. शब्दाधिकारे हलन्तप्रकरणे युष्मद्-अस्मद्शब्दौ

संस्कृतभाषाया: संरचनकाले वाक्यविनिमयविधाने मध्यमपुरुषकर्त्तृभावेन युष्मद्शब्द: व्यवह्रियते । तथैव अस्मद्शब्द: उत्तमपुरुषकर्त्तृभावेन अस्मद्शब्द: व्यवह्रियते । कर्त्तृवाक्यप्रयोगे कर्मवाक्यप्रयोगे च तयो: शब्दयो: व्यवहार: सर्वथा विचार्य्यते । वाक्यसंघटनप्रकारं नियमयति । वाक्यार्थं संसाधयति संस्थापयति च । त्रिषु लिङ्गेषु तयो: शब्दयोरेकरूपता प्रवर्त्तते । 'द'कारान्तहलन्तशब्दभावेन यद्यपि तयो: स्थानम्, तथापि शब्दान्तरापेक्षया प्रयोगसाधने तयो: गुरुत्वं वर्त्तते । पुरुषविचारे तयो: स्वतन्त्रता, लिङ्गविचारे एकरूपता, वाक्यार्थविचारे प्रधानता च । द्वितीया-चतुर्थी-षष्ठीविभक्तिषु अतीव संक्षिप्तमेकवर्णविशिष्टं रूपं सम्भवति यत् पुनरन्यत्र शब्दानां कृते नैव सम्भवति ।

**स्वावलोकनप्रश्नाः**

१. युष्मद्शब्दः कस्मिन् पुरुषे वर्त्तते ?

२. अस्मद्शब्दः कस्मिन् पुरुषे वर्त्तते ?

३. युष्मद्शब्दः कस्मिन् लिङ्गे प्रवर्त्तते ?

४. अस्मद्शब्दः कस्मिन् लिङ्गे प्रवर्त्तते ?

५. शब्दान्तरापेक्षया युष्मद्-अस्मद्शब्दयोः कथं भिन्नता ?

## ८.१०. युष्मद्-अस्मद्शब्दरूपसाधनोद्दिष्टानि पाणिनीयानि सूत्राणि

सप्तसु विभक्तिषु युष्मद्-अस्मद्शब्दरूपसाधनाय २२ द्वाविंशतिः पाणिनीयानि सूत्राणि सन्ति ।

१. ङे प्रथमयोरम् (पा.सू. ७/१/२८)
२. त्वा हौ सौ (पा.सू. ७/२/९४)
३. शेषे लोपः (पा.सू. ७/२/९०)
४. युवावौ द्विवचने (पा.सू. ७/२/९२)
५. प्रथमायाश्च द्विवचने भाषायाम् (पा.सू. ७/२/८८)
६. यूयवयौ जसि (पा.सू. ७/२/९३)
७. त्वमावेकवचने (पा.सू. ७/२/९७)
८. द्वितीयाया च (पा.सू. ७/२/८७)
९. शसो नः (पा.सू. ७/२/२९)
१०. योऽचि (पा.सू. ७/२/८९)
११. युष्मदस्मदोरनादेशे (पा.सू. ७/२/८६)
१२. तुभ्यमह्यौ ङयि (पा.सू. ७/२/९५)
१३. भ्यसो भ्यम् (पा.सू. ७/१/३०)
१४. एकवचनस्य च (पा.सू. ७/१/३२)

१५. पञ्चम्या अत् (पा.सू. ७/१/३१)
१६. तवममौ ङसि (पा.सू. ७/१/६९)
१७. युष्मदस्मद्भ्यां ङसोऽश् (पा.सू. ७/१/२७)
१८. साम् आकम् (पा.सू. ७/१/३३)
१९. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ (पा.सू. ८/१/२०)
२०. बहुवचनस्य वसनसौ (पा.सू. ८/१/२१)
२१. तेमयावेकवचने (पा.सू. ८/१/२२)
२२. त्वामौ द्वितीयायाः (पा.सू. ८/१/२३)

**स्वावलोकनप्रश्नाः**

१. युष्मद्-अस्मद्शब्दरूपसाधने कति संख्याकानि पाणिनीयानि सूत्राणि सन्ति ?

## ८.११. युष्मद्-अस्मद्शब्दरूपसाधने उद्दिष्टेषु सूत्रेषु पारिभाषिकशब्दाः

युष्मद्-अस्मद्शब्दरूपसाधने द्वाविंशति सूत्राणि उपदिष्टानि विद्यन्ते । सूत्रसंघटननियमानुसारं तत्र पदप्रयोगः कृतः दृश्यते । तेषु प्रयुज्यमानेषु पदेषु पारिभाषिकपदं अन्यतमम् । वृद्धिः गुणः इत्यादिपारिभाषिकशब्दवत् न कश्चन पारिभाषिकशब्दो विदितो जायते । यस्य कृते संज्ञासूत्रं, किमपि आचार्यवचनं पाणिनौ उपकल्पितं वर्त्तते किन्तु विभक्तीनाम् विभक्त्यवबोधकसंकेतानाम् सु-औ-जस् इति स्वरूपाणाम् उपस्थापनं कृतं दृश्यते । ताश्च विभक्तयः एवं भावेन विज्ञेयाः

१. ङे चतुर्थी-एकवचनस्य संकेतः ।
२. सौ सु इति प्रथमैकवचनं तस्य सप्तमी - एकवचने रूपम् ।
३. जसि जस् इति प्रथमाबहुवचनम् - तस्य सप्तम्येकवचने रूपम् ।
४. शसः शस् इति द्वितीयाबहुवचने रूपम् - तस्य षष्ठ्येकवचने रूपम् ।
५. अचि अच् इति प्रत्याहार सप्तम्येकवचने रूपम् ।
६. ङयि ङे इति चतुर्थ्येकवचने तस्य सप्तम्येकवचने ।
७. भ्यसो भ्यस् इति चतुर्थी पञ्चमी बहुवचने - तस्य षष्ठ्येकवचने रूपम् ।
८. ङसि ङस् इति षष्ठी-एकवचनम् तस्य सप्तम्येकवचने ।
९. ङसः षष्ठी-एकवचने ।

**स्वावलोकनप्रश्नाः**

१. ङे इति कस्याः विभक्तेः संकेतः ?

२. सौ इत्यत्र किं प्रातिपदिकम् ?

३. शस् इति कस्यां विभक्तौ विज्ञायते ?

४. 'ङयि' इति पदस्य कः अर्थः ?

५. ङसि इति किं विभक्त्यन्तं पदम् ?

६. ङसः इति कस्याः विभक्तेः रूपम् ?

## ८.१२. उद्दिष्टेषु सूत्रेषु विभक्तिविषयकं याथार्थ्यम्

षडविधेषु सूत्रेषु विधिसूत्राणां संघटने पाणिनीयव्याकरणे पदोपपादनवेलायां कोटित्रयं लक्ष्यते स्थानिकोटिकं निमित्तकोटिकमादेशकोटिश्चेति पदम् । स्थानिकोटौ षष्ठीविभक्तिः, आदेशकोटौ प्रथमाविभक्तिः, निमित्तकोटौ तृतीया–पञ्चमी–सप्तमीविभक्तिरिति । प्रकृतप्रसङ्गे यस्य पदस्य स्थानित्वेन ग्रहणं युष्मद्/अस्मद्शब्दो भवतु अथवा विभक्तिर्भवतु तत्र सर्वत्र षष्ठीविभक्तेः निर्देशः इष्यते । एवं प्रथमादिविभक्तीनां निर्देशविचारः । आदेशकोटौ प्रथमा निमित्तकोटौ सप्तमीविभक्तिः लक्षीक्रियते ।

**स्थानिकोटि**

| | | | | |
|---|---|---|---|---|
| १. | ङे प्रथमयोः | = | स्थानषष्ठी | ङेप्रथमयोरम् । |
| २. | शसो | = | स्थानषष्ठी | शसो नः । |
| ३. | युष्मदस्मदोः | = | स्थानषष्ठी | युष्मदस्मदोः षष्ठीचतुर्थी ... । |
| ४. | भ्यसो | = | स्थानषष्ठी | भ्यसो भ्यम् । |
| ५. | ङसः | = | स्थानषष्ठी | युष्मदस्मद्भ्यां ङसोऽश् । |
| ६. | साम | = | स्थानषष्ठी | साम आकम् । |

**आदेशकोटि प्रथमाविभक्तिः**

| | | | |
|---|---|---|---|
| त्वहौ | त्वा, अह | = | त्वाहौ सौ । |
| युवावौ | युव, आव | = | युवावौ द्विवचने । |
| यूयवयौ | यूय, वय | = | यूयवयौ जसि । |
| त्वमौ | त्व, म | = | त्वमावेकवचने । |
| तुभ्यमह्यौ | तुभ्य, मह्य | = | तुभ्यमह्यौ ङयि । |
| तवममौ | तव, मम | = | तवममौ ङसि । |
| आकम् | आकम् | = | साम आकम् । |

| | | | | |
|---|---|---|---|---|
| | वस्नसौ | वन् नस् | = | बहुवचनस्य वस्नसौ । |
| | त्वामौ | त्वा, मा | = | त्वामौ द्वितीयायाः । |
| **निमित्तकोटि** | **सप्तमीविभक्तिः** | | | |
| | सौ | सु | = | त्वाहौ सौ । |
| | द्विवचने | द्विवचन | = | युवावौ द्विवचने । |
| | भाषायाम् | भाषा | = | प्रथमायाश्च द्विवचने भाषायाम् । |
| | जसि | जस् | = | यूयवयौ जसि । |
| | अचि | अच् | = | योऽचि । |
| | ङयि | ङे | = | तुभ्यमह्यौ ङयि । |
| | ङसि | ङस् | = | तवममौ ङसि । |
| | एकवचने | एकवचन | = | तेमयावेकवचने । |

**स्वावलोकनप्रश्नाः**

१. विधिसूत्रसंघटने स्थानिनि का विभक्तिः विधीयते ?

२. विधिसूत्रसंघटने आदेशे का विभक्तिः विधीयते ?

३. विधिसूत्रेषु निमित्तवाचकपदे काः विभक्तयः दृश्यन्ते ?

४. 'अचि' इत्यत्र का विभक्तिः ?

५. ङयि इत्यत्र विभक्तिः ?

## ८.१३. युष्मद्स्थानीयादेशाः

स्वादिषु सप्तविभक्तिषु युष्मद्शब्दस्य रूपसाधनवेलायां तदर्थमुद्दिष्टैः सूत्रैः युष्मद्शब्दस्थाने युष्मद्शब्दे च आदेशाः विधीयन्ते । ते युष्मदस्थानीयादेशा इति परिचयं प्राप्नुवन्ति । प्रथमादिविभक्ति-क्रमेण तेषां प्रतिपादनं कर्तुं शक्यते

१. त्व प्रथमाविभक्तेरेकवचने ।
२. युव प्रथमा, द्विवचने ।
३. यूय प्रथमा बहुवचने ।
४. त्व द्वितीयैकवचने ।
५. तुभ्य चतुर्थ्येकवचने ।

| | | |
|---|---|---|
| ६. | तव | षष्ठी-एकवचने । |
| ७. | वाम्, वः | द्वितीया, चतुर्थी, षष्ठी । |
| ८. | ते, त्वा | द्वितीया, चतुर्थी, षष्ठी (एकवचने) । |

**स्वावलोकनप्रश्नाः**

१. प्रथमाविभक्तौ युष्मद्स्थाने के आदेशाः विधीयन्ते ?

२. चतुर्थीविभक्तेरेकवचने युष्मद्स्थाने कः आदेशः ?

३. षष्ठीविभक्तेरेवचने युष्मद्स्थाने कः आदेशः ?

४. 'वाम्', 'वः' युष्मद्शब्दस्य कासु विभक्तिषु रूपम् ?

५. 'ते', 'त्वा' युष्मद्शब्दस्य कुत्र रूपम् ?

## ८.१४. अस्मद्स्थानीयादेशाः

स्वादिषु सप्तविभक्तिषु अस्मद्शब्दस्य रूपसाधनवेलायां तदर्थमुद्दिष्टैः सूत्रैः अस्मद्शब्दस्थाने अस्मद्शब्दे च आदेशाः विधीयन्ते । ते अस्मद्स्थानीयादेशा इति परिचयं प्राप्नुवन्ति । प्रथमाविभक्तिक्रमेण तेषां प्रतिपादनं कर्तुं शक्यते

| | | |
|---|---|---|
| १. | अह | प्रथमाविभक्तेरेकवचने । |
| २. | आव | प्रथमाद्विवचने । |
| ३. | वय | प्रथमाबहुवचने । |
| ४. | म | द्वितीयैकवचने । |
| ५. | मह्य | चतुर्थ्यैकवचने । |
| ६. | मम | षष्ठ्येकवचने । |
| ७. | नः, नौ | द्वितीया, चतुर्थी, षष्ठी । |
| ८. | मा, मे | द्वितीया, चतुर्थी, षष्ठी (एकवचने) । |

**बोधप्रश्नाः**

१. प्रथमाविभक्तौ अस्मद्स्थाने के आदेशाः विधीयन्ते ?

२. चतुर्थीविभक्तेरेकवचने अस्मद्स्थाने कः आदेशः ?

३. षष्ठीविभक्तेरेकवचने अस्मद्स्थाने कः आदेशः ?

४. 'नः', 'नौ' अस्मद्शब्दस्य कासु विभक्तिषु रूपम् ?

५. 'मे', 'मा' अस्मद्शब्दस्य कुत्र रूपम् ?

## ८.१५. युष्मद्–अस्मद्शब्दरूपसाधने प्रत्ययादेशाः

सप्तसु स्वादिषु विभक्तिषु रूपसाधनवेलायां विभक्तिस्थाने आदेशाः प्रवर्त्तन्ते ते प्रत्ययादेशाः भवन्ति । तेषां केवलं विवरणमित्थं प्रस्तूयते

| | विभक्तयः | प्रत्ययादेशाः |
|---|---|---|
| १. | सु, औ, जस् | |
| | अम्, औट् | अम् |
| | ङे | |
| २. | शस् | न् |
| ३. | भ्यस् | भ्यम् |
| ४. | भ्यस् | अत् |
| ५. | ङस् | अश् |
| ६. | ङस् | अत् |

**स्वावलोकनप्रश्नाः**

१. अमादेशः कुत्र विभक्तौ जायते ?

२. 'भ्यस्' इति चतुर्थीबहुवचनात्मिकायाः विभक्तेः स्थाने किमादेशो भवति ?

|  |
| --- |
| ३. 'अत्' आदेशः कस्याः विभक्तेः स्थाने जायते ? <br><br> ४. शस्विभक्तिस्थाने किमादेशो जायते ? |

## ८.१६. युष्मद्-अस्मद्शब्दरूपसाधनोद्दिष्टानां सूत्राणामर्थावगमनम्

अल्पाक्षरेण विशिष्टं सूत्रं बह्वर्थप्रतिपादनं करोति । सजातीयकार्य्यप्रकारमादाय सूत्राणां परिधिः निर्मीयते । तदर्थमधिकारसूत्राणां निर्माणं जायते । सर्वत्र तदुद्दिष्टकार्य्यविधायके सूत्रे अधिकारसूत्रमुपतिष्ठते। समानतात्पर्य्यकानां पदानां सूत्रेषु असकृदुच्चारणं न क्रियते । एकत्र सूत्रे तस्य पदस्योपपादनं विधाय सूत्रान्तरेषु अनुवर्त्तनं कृत्वा संस्थापनं जायते । अनुवृत्तिरिति पदेन तदुपपादनं क्रियते । सूत्रे स्थितानां पारिभाषिकपदानां तात्पर्य्यबोधनाय संज्ञासूत्राण्युपतिष्ठन्ते । एवञ्च विधीयमानस्य कार्य्यस्य निरूपणाय परिभाषासूत्रमुपतिष्ठते । कदाचित् अध्यारोपितमार्गेण कार्य्यसाधनाय अतिदेशविधेः कल्पना उपजायते । अनुवर्त्तमानस्य पदस्य विभक्तिविपरिणामः लक्ष्यानुरोधात् कदाचित् स्थले जायते । एभिरुपायैः सूत्राणामर्थावगमनमुपचर्य्यते । युष्मद्शब्दरूपसाधने द्वाविंशतिः सूत्राणि उद्दिष्टानि भवन्ति एतदपेक्षया पूर्वरूपपररूपादिकार्य्यविधानाय आनुषङ्गिकसूत्राणि प्रवर्त्तन्ते । 'अङ्गस्य' (पा.सू. ६/४/१), मपर्य्यन्तस्य (पा.सू. ७/१/९१) इत्यधिकारसूत्रद्वयं, अतो गुणे (पा.सू. ६/१/९७), अमि पूर्वः (पा.सू.६/१/१०७) अकः सवर्णे दीर्घः (६/१/१०१), अलोन्त्यस्य (पा.सू. १/१/५२), अनेकाल्शित्सर्वस्य (पा.सू. १/१/५५), प्रथमयोः पूर्वसवर्णः (६/१/१०२) तेषामर्थावगमनं यथालक्ष्यं यथाविधि उपपद्यते ।

### १. ङे प्रथमयोरम् (पा.सू. ७/१/२८)

युष्मद्-अस्मद्भ्याम् इत्यनुवर्त्तते । अङ्गस्य इत्यधिकारः प्रचलति । ङे इति लुप्तषष्ठ्यन्तं पदम् । प्रथमा च प्रथमा च ते प्रथमे तयोः प्रथमयोः । प्रथमाद्वितीयाविभक्त्योरित्यर्थः । अतः युष्मदस्मद्भ्या-मुत्तरस्य ङे इति चतुर्थीविभक्तेरेकवचनस्य स्थाने प्रथमाद्वितीययोश्च विभक्त्योः स्थाने 'अम्' इत्ययमादेशो भवति । द्वितीयाबहुवचने शम् इति विभक्तेः कृते अयमादेशो न भवति तत्रापवादत्वात् 'शसो नः' इति सूत्रं प्रवर्त्तते । अमादेशः अनेकालादेशः । अतः 'अनेकाल् शित् सर्वस्य' इति सूत्रेण सम्पूर्णायाः विभक्तेः स्थाने भवति । उदा. ङे = तुभ्यम्, मह्यम्

प्रथमाद्वितीययोः त्वं, युवाम्, यूयम् । त्वाम्, युवाम् ।

अहम्, आवाम्, वयम् । माम्, आवाम् ।

### २. त्वा हौ सौ (पा.सू. ७/२/९४)

त्वः च अहः च = त्वाहौ । 'सु' इत्यस्य सप्तम्येकवचने सौ । 'मपर्य्यन्तस्य', 'अङ्गस्य', इत्यधिकारः । 'युस्मदस्मदोः', 'विभक्तौ', 'इत्यनुवृत्तिः' । अतः सौ विभक्तौ परतः युष्मद् शब्दस्य मपर्य्यन्तस्याङ्गस्य 'त्व' इत्यादेशः तथैव अस्मद्शब्दस्य 'अह' इत्यादेशः भवति । उदा. त्वम्,

अतित्वम्, परमत्वम् । अहम्, अत्यहम्, परमाहम् इति प्रयोगाः । 'त्व्'/अह् इति हलन्तादेश इति केषाञ्चिन् मतम् ।

युष्मद् + सु = त्व / त्व् + अद् + सु

अस्मद् + सु = अह / अह् + अद् + सु

**३. शेषे लोपः (पा.सू. ७/२/९०)**

अङ्गस्य इत्यधिकारः । युष्मदस्मदोः, विभक्तौ इत्यनुवृत्तिः । शेषे = उक्तादन्यः पा.सू. ७/२/८६, ८७,८८, ८९ इति याः विभक्तयः उद्दिष्टाः ताभ्यः भिन्नाः याः ताः शेषपदवाच्याः । भिस्, सुप्, आम्, ओट्, शस्, औ, टा, ङि, ओस्, इति विभक्तिभ्यः अन्याः । यत्र विभक्तौ अकारो यकारश्च न विहितः इति तात्पर्य्यम् । तत्र शेषे विभक्तौ युष्मदस्मदोर्लोपो भवति । 'अद्' इति टिलोपः, 'द' इति 'अलोऽन्त्यस्य' इति सूत्रानुसारं 'द' कारस्य वा लोपः ।

उदा. त्वम्, अहम् । यूयम्, वयम् । तुभ्यम्, मह्यम्, युष्मभ्यम्, अस्मभ्यम् । त्वत्, मत् । युष्मत्, अस्मत् । तव, मम । युष्माकम्, अस्माकम् ।

**४. युवावौ द्विवचने (पा.सू. ७/२/९२)**

युवश्च आवश्च = युवावौ । वक्तीति वचनम् । द्वयोरर्थयोः वचने द्विवचने मपर्य्यन्तस्य, अङ्गस्य इत्यधिकारः । युष्मदस्मदोः विभक्तौ इत्यनुवृत्तिः । अतः मपर्य्यन्तस्य इत्यधिकारात् युष्मद् स्थाने युवादेशः अस्मद्स्थाने आवादेशः द्विवचने परतः ।

उदा. युवाम्, आवाम् । युवाभ्याम्, आवाभ्याम्, युवयोः, आवयोः ।

५. प्रथमायाश्च द्विवचने भाषायाम् (७/२/८८)

'अङ्गस्य' इत्यधिकारः । युष्मदस्मदोः, आः विभक्तौ इत्यनुवृत्तिः । द्वितीयायां च विभक्तौ परतः युष्मदस्मदोराकारादेशो भवति ।

उदा. त्वाम्, माम्, युवाम्, आवाम् । युष्मान्, अस्मान् ।

६. यूयवयौ जसि (७/२/९३)

अनु. मपर्य्यन्तस्य, युष्मदस्मदोः, विभक्तौ, अङ्गस्य । जस् विभक्तौ परतः मपर्य्यन्तस्य इत्यधिकारात् युष्मद् स्थाने यूयादेशः, अस्मद्स्थाने वयादेशो भवति । उदा. यूयम्, वयम् ।

७. त्वमावेकवचने (७/२/९७)

अनु. मपर्य्यन्तस्य, युष्मदस्मदोः, विभक्तौ, अङ्गस्य । मपर्य्यन्तस्य, युष्मदस्मदोः, विभक्तौ, अङ्गस्य । मपर्य्यन्तस्याधिकारात् एकवचने युष्मद्स्थाने त्वादेशः, अस्मद्स्थाने 'मा'देशः भवति ।

उदा. त्वाम्, माम् । त्वया, मया, त्वत्, मत् । त्वयि, मयि ।

८. द्वितीयायां च (७/२/८७)

अनु. युष्मदस्मदोः, आः विभक्तौ, अङ्गस्य । द्वितीयायां च विभक्तौ परतः युष्मदस्मदोः आकारादेशो भवति ।

उदा. त्वाम्, माम् । युवाम्, आवाम् । युष्मान्, अस्मान् ।

९. शसो नः (७/२/२९)

अनु. युष्मदस्मद्स्थाम्, अङ्गस्य । युष्मद्शब्दात् परस्य, अस्मद्शब्दात् परस्य 'शस्' विभक्तेः स्थाने 'न्' इत्यादेशो भवति ।

उदा. युष्मान्, अस्मान् । 'न' इत्यत्र अकारः उच्चारणार्थकः । 'न' इत्यादेशो जायते ।

१०. योऽचि (७/२/८९)

अनु. युष्मदस्मदोरनादेशे, विभक्तौ, अङ्गस्य । अजादौ विभक्तौ परतः यस्याः विभक्तेः न कश्चन आदेशो विहितः तत्र युष्मदस्मदोः यकारादेशो भवति ।

उदा. त्वया, मया । त्वयि, मयि । युवयोः, आवयोः ।

११. युष्मदस्मदोरनादेशे (७/२/८६)

अनु. आः विभक्तौ, अङ्गस्य । युष्मद् अस्मद् इत्येतयोः अनादेशे विभक्तौ परत आकारादेशो भवति । उदा. युष्माभिः, अस्माभिः । युष्मासु, अस्मासु ।

१२. तुभ्यमह्यौ ङयि (७/२/९५)

अनु. मपर्य्यन्तस्य, युष्मदस्मदोः, विभक्तौ, अङ्गस्य । युष्मदस्मदोः मपर्य्यन्तस्य 'तुभ्य', 'मह्य' इति क्रमेण आदेशौ भवतः । उदा. तुभ्यम्, मह्यम् ।

१३. भ्यसो भ्यम् (७/१/३०)

अनु. युष्मदस्मद्भ्याम्, अङ्गस्य । युष्मद्स्मद्भ्यामुत्तरस्य भ्यसः स्थाने 'भ्यम्' इत्यादेशो भवति । 'अभ्यम्' इत्यादेशो भवतीति कश्चन पक्षः । उदा. युष्मभ्यम्, अस्मभ्यम् ।

१४. एकवचनस्य च (७/१/३२)

अनु. पञ्चम्या अत्, युष्मदस्मद्भ्याम्, अङ्गस्य । युष्मदस्मद्भ्यामुत्तरस्य पञ्चम्या एकवचनस्य च स्थाने अत् इत्यादेशो भवति । उदा. त्वत्, मत् ।

१५. पञ्चम्या अत् (७/१/३१)

अनु. भ्यसः, युष्मदस्मद्भ्याम्, अङ्गस्य । भ्यसः स्थाने 'अत्' इत्ययमादेशो भवति ।

उदा. युष्मत्, अस्मत् ।

१६. तवममौ ङसि (७/२/९६)

अनु. मपर्य्यन्तस्य, युष्मदस्मदोः, विभक्तौ, अङ्गस्य । मपर्य्यन्तस्याधिकारात् युष्मद्स्थान 'तव' इति अस्मद्स्थाने 'मम' इत्यादेशो भवति ङस्विभक्तौ परतः ।

उदा. तव, मम । अतितव, अतिमम । परमतव, परममम ।

१७. युष्मदस्मद्भ्यां ङसोऽम् (७/१/२९)

अनु. अङ्गस्य । युष्मद् अस्मद् इत्येताभ्यामङ्गाभ्याम् उत्तरस्य ङसः स्थाने अश् इत्यादेशो

भवति । उदा. तव, मम ।

१८. साम् आकम् (७/१/३३)

अनु. युष्मदस्मद्भ्याम्, अङ्गस्य । युष्मदस्मद्भ्यामुत्तरस्य सामः स्थाने 'आकम्' इत्यादेशो भवति । उदा. युष्माकम्, अस्माकम् ।

१९. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ (८/१/२०)

षष्ठ्यन्त-चतुर्थ्यन्त-द्वितीयान्तपदानां युष्मदस्मद्शब्दरूपाणां स्थाने वाम्, नौ इत्यादेशो स्तः ।

| | | युष्मद् | अस्मद् | |
|---|---|---|---|---|
| द्वितीया<br>चतुर्थी<br>षष्ठी | — | वाम् | नौ | द्विवचने |

२०. बहुवचनस्य वस्नसौ (८/१/२१)

| | | युष्मद् | अस्मद् |
|---|---|---|---|
| द्वितीया<br>चतुर्थी<br>षष्ठी | बहुवचने | वः | नः |

२१. तेमयावेकवचने (८/१/२२)

| | | युष्मद् | अस्मद् |
|---|---|---|---|
| चतुर्थी<br>षष्ठी | एकवचने | ते | मे |

२२. त्वामौ द्वितीयायाः (८/१/२३)

| | | युष्मद् | अस्मद् |
|---|---|---|---|
| द्वितीया | एकवचने | त्वा | मा |

**स्वावलोकनप्रश्नाः**

१. 'शेषे लोपः' इति सूत्रेण किं भवति ?

२. 'त्वाहौ सौ' इति सूत्रेण युष्मद्स्थाने क आदेशो भवति ?

३. द्विवचने पारतः युष्मदस्मद्स्थाने कौ आदेशौ भवतः ?

४. यूयादेशः कस्यां विभक्तौ भवति ?

५. 'शसो नः' इति सूत्रस्य कः अर्थः ?

६. 'भ्यसो भ्यम्' इत्यस्य क आशयः ?

७. 'साम्' इत्यनेन किं बोध्यते ?

८. 'वः' 'नः' इत्यनयोः कः अर्थः ?

९. 'मे' इति विधायकं सूत्रं किम् ?

१०. 'त्वा' इति विधायकं सूत्रं किम् ?

## ८.१७. युष्मदस्मद्शब्दयोः रूपसाधनप्रकारः

युष्मद्शब्दस्य प्रथमाविभक्तौ एकवचने = त्वम् ।

युष्मद् + सु

| | |
|---|---|
| = त्व अद् + सु | त्वाहौ सौ (पा.सू. ७/२/९४) मपर्य्यन्तस्य (७/१/९१) |
| = त्व अद् + अम् | ङे प्रथमयोरम् (पा.सू. ७/१/२८) |
| = त्व अ + अम् | शेषे लोपः (पा.सू. ७/२/९०) |
| = त्व + अम् | अतो गुणे (पा.सू. ६/१/९७ ) |
| = त्वम् | अमि पूर्वः (पा.सू. ६/१/१०७) |

**त्वम्**

युष्मद्शब्दात् प्रथमाविभक्तेरेकवचने युष्मद् + सु इति स्थिते मपर्य्यन्तस्य इत्यधिकारात् 'त्वा हौ' इति सूत्रेण त्वादेशे त्व अद् + सु इति । ततश्च 'सु' इति स्थाने 'ङे प्रथमयोरम्' इति सूत्रेण अमादेशे त्व अद् + अम् इति जाते 'शेषे लोपः' इति दकारस्य लोपे त्व अ + अम् इति 'अतो गुणे' इति पररूपे 'त्व + अम्' इति जाते 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य 'अमि पूर्वः' इति पूर्वरूपे त्वम् इति रूपं सिद्ध्यति ।

अस्मद्शब्दस्य प्रथमाविभक्तौ एकवचने = अहम् ।

अस्मद् + सु ।

अह अद् + सु — त्वाहौ ।

अह + अद् + अम् — ङे प्रथमयोरम् ।

अह + अ + अम् — शेषे लोपः ।

अह + अम् — अतो गुणे ।

अहम् — अमि पूर्वः ।

केचन 'त्वाहौ सौ' इति सूत्रेण जायमानः आदेशः हलन्त इति तर्कयन्ति । अतस्तत्पक्षे 'अतो गुणे' इति पररूपस्य आवश्यकता न भवति । केवलं 'अमि पूर्वः' इति पूर्वरूपे त्वम् / अहम् इति प्रयोगः ।

युष्मद् + सु ।

त्व् + अद् + सु — त्वाहौ सौ, मपर्य्यन्तस्य ।

त्व् + अद् + अम् — ङे प्रथमयोरम् ।

त्व् + अ ( ) + अम् — शेषे लोपः ।

त्व् + अम्

त्वम् — अमि पूर्वः ।

एवम्

अस्मद् + सु

अह् + अद् + सु — त्वाहौ सौ, मपर्य्यन्तस्य

अह् + अद् + अम् — ङे प्रथमयोरम् ।

अह् + अ ( ) + अम् — शेषे लोपः ।

अह् + अम्

अहम् — अमि पूर्वः ।

पुनश्च केचन 'शेषे लोप' इति सूत्रेण यः लोपः स 'टि' लोप इति तर्कयन्ति । अतः तद्विचारानुसारं अतो गुणे इति सूत्रस्य आवश्यकता न भवति । 'अमि पूर्व' इति सूत्रेण पूर्वरूपे त्वम्/अहम् इति रूपसिद्धिः ।

युष्मद् + सु

= त्व अद् + सु — त्वाहौ सौ (पा.सू. ७/२/९४) मपर्य्यन्तस्य (७/१/९१)

= त्व अद् + अम् — ङे प्रथमयोरम् (पा.सू. ७/१/२८)

= त्व ( ) + अम् — शेषे लोपः (पा.सू. ७/२/९०)(टि लोपः)

= त्वम् — अमि पूर्वः (पा.सू. ६/१/१०७)

एवम्

अस्मद् + सु ।

अह अद् + सु      त्वाहौ ।
अह + अद् + अम्      ङे प्रथमयोरम् ।
अह + ( ) + अम्      शेषे लोपः । (टि लोपः)
अह् + अम्
अहम्      अमि पूर्वः ।

युवाम्

युष्मद् + औ
**युव** अद् + औ = युवावौ द्विवचने मपर्य्यन्तस्य ।
युव + अद् + अम् = ङे प्रथमयोरम् ।
युव + अ **आ** +अम् = प्रथमायाश्च द्विवचने भाषायाम् ७/२/८८ ।
युव + आ + अम् = अतो गुणे
युवा + अम् = अकः सवर्णे दीर्घः
युवाम् = अमि पूर्वः

आवाम्

आष्मद् + औ
**आव** अद् + औ = युवावौ द्विवचने मपर्य्यन्तस्य ।
आव + अद् + अम् = ङे प्रथमयोरम् ।
आव + अ **आ** +अम् = प्रथमायाश्च द्विवचने भाषायाम् ७/२/८८ ।
आव + आ + अम् = अतो गुणे
आवा + अम् = अकः सवर्णे दीर्घः
आवाम् = अमि पूर्वः

यूयम्

युष्मद् + जस्
यूय अद् + औ = यूयवयौ जसि ।
यूय + अद् + जस् = ङे प्रथमयोरम् ।
यूय + ( ) + अम् = शेषे लोपः ।
यूयम् = अमि पूर्वः

अथवा

यूय अद् + अम्
यूय + अ ( ) + अम् = शेषे लोपः ।
यूय + अम् = अतो गुणे

यूयम् = अमि पूर्वः

वयम्

अष्मद् + जस्

'वय' इत्यादेशः अन्यत् सर्वं यूयमिति रूपसिद्धिवत् ।

त्वाम्

युष्मद् + अम्

त्व अद् + अम् = त्वमावेकवचने ।

त्व + अ (आ) + अम् = द्वितीयायां च ।

त्व + आ + अम् = अतो गुणे

त्वा + अम् = अकः सवर्णे दीर्घः

त्वाम् = अमि पूर्वः

माम्

अष्मद् + अम्

म अद् + अम् = त्वमावेकवचने ।

म + अ (आ) + अम् = द्वितीयायां च ।

म + आ + अम् = अतो गुणे

मा + अम् = अकः सवर्णे दीर्घः

माम् = अमि पूर्वः

युष्मान्

युष्मद् + शस्

युष्म + (आ) + शस् = द्वितीयायां च ।

युष्म आ + न् + स् = शसो न (७/१/२९)

युष्मा + न् + न् + स् = अकः सवर्णे दीर्घः

युष्मा् + न् + ( ) = अमि पूर्वः

युष्मान् ।

अस्मान्

अस्मद् + शस्

अस्म (आ) + शस् = द्वितीयायां च ।

अन्यत् सर्वं युष्मान् इति रूपसिद्धिप्रकारवत् ।

त्वया

त्व अद् + टा = त्वमावेकवचने (७/२/९७) मपर्य्यन्तस्य

त्व + अ + (य्) + टा = योऽचि (७/२/८९

त्व + य् + टा = अतो गुणे (६/१/९४)
त्व + य् + आ = चुटू
त्वया ।

मया

अस्मद् + टा
म + अद् + टा = त्वमावेकवचने (७/२/९७) मपर्य्यन्तस्य
म + अ (य्) + टा = योऽचि (७/२/८९)
म + य् + टा = अतो गुणे (६/१/९४)
म + य् + आ = चुटू
मया ।

युवाभ्याम्

युष्मद् + भ्याम्
**युव** अद् + भ्याम् = युवावौ द्विवचने मपर्य्यन्तस्य ।
युव + अ + आ + अम् = प्रथमायाश्च द्विवचने भाषायाम् ।
युव + आ +भ्याम् = अतो गुणे
युवा + भ्याम् = अक: सवर्णे दीर्घ:
युवाम् ।

आवाभ्याम्

अस्मद् + भ्याम्
आव + अद् + भ्याम् = युवावौ द्विवचने (७/२/९२)
आव + अ + आ + अम् = प्रथमायाश्च द्विवचने भाषायाम् ।
आव + आ +भ्याम् = अतो गुणे
आवा + भ्याम् = अक: सवर्णे दीर्घ:
आवाभ्याम् ।

युष्माभि:

युष्मद् + भिस्
युष्म + आ + भिस् = प्रथमायाश्च द्विवचने भाषायाम्
युष्मा + भिस् = अक: सवर्णे दीर्घ: ।
युष्माभि: ।

अस्माभि:

अस्मद् + भिस्

अस्म + आ + भिस् = प्रथमायाश्च द्विवचने भाषायाम् ।

अस्मा + भिस् = अक: सवर्णे दीर्घ: ।

अस्माभि: ।

तुभ्यम्

युष्मद् + ङे ।

युष्मद् + अम् = ङे प्रथमयोरम्

(तुभ्य) + अद् + अम् = तुभ्यमह्यौ ङयि (७/२/९५)

तुभ्य + अ ( ) + अम् = शेषे लोप:

तुभ्य + अम् = अतो गुणे ।

तुभ्यम् = अमि पूर्व: ।

मह्यम्

अस्मद् + ङे

अस्मद् + अम् = ङे प्रथमयोरम्

मह्य + अद् + अम् = तुभ्यमह्यौ ङयि

मह्य + द् + अम् = अतो गुणे

मह्य + ( ) + अम् = शेषे लोप:

मह्यम् = अमि पूर्व: ।

युष्मभ्यम्, अस्मभ्यम्

युष्मद् + भ्यम्

युष्मद् + भ्यम् = भ्यसो भ्यस् ।

युष्म + भ्यम् = शेषे लोप: ।

युष्मभ्यम् ।

अथवा

युष्मद् + भ्यस्

युष्मद् + अभ्यम् = भ्यसोऽभ्यम् (भ.३०)

युष्म + अद् + अभ्यम्

युष्म + ( ) + अभ्यम् = शेषे लोप: ।

युष्मभ्यम् ।

एवं अस्मद् + भ्यस् = अस्मभ्यम् बोधनीयम् ।

त्वत्

युष्मद् + ङस्

युष्मद् + (अत्) = एकवचनस्य च

त्व + अद् + अत् = त्वमावेकवचने

त्व + ( ) + अत् = शेषे लोपः

त्वत् = अतो गुणे

मत् –

अष्मद् + ङस्

अस्मद् + अत् = एकवचनस्य च

म + अद् + अत् = त्वमावेकवचने

म + ( ) + अत् = शेषे लोपः

त्वत् = अतो गुणे

युष्मत्

युष्मद् + भ्यस्

युष्मद् + अत् = पञ्चम्या अत्

युष्म + अद् + अत्

युष्म + ( ) + अत् = शेषे लोपः

युष्मत् ।

अस्मत्

अस्मद् + भ्यम्

अष्मद् + अत् = पञ्चम्या अत्

अस्म + अद् + अत्

अष्म + ( ) + अत् = शेषे लोपः

अस्मत् ।

तव

युष्मद् + ङस्

तव + अद् + ङस् = तवममौ ङसि

तव + ( ) + ङस् = शेषे लोपः

तव + अश् = युष्मदस्मद्भ्यां ङसोऽश्

तव + अ ( ) = हलन्त्यम्

तव = अतो गुणे

मम –

अष्मद् + ङस्

मम + अद् + ङस् = तवममौ ङसि

मम + ( ) + ङस् = शेषे लोपः

मम + अश् = युष्मदस्मद्भ्यां ङसोऽश्

मम + अ ( ) = हलन्त्यमे्

मम = अतो गुणे

तव + अद् + अश् / मम + अद् + अश् इति दशायां 'शेषे लोपः' इति सूत्रेण केवलस्य दकारस्य लोपे तव + अ + अ/ मम + अ + अ इति स्थिते 'अतो गुणे' इति त्रयाणामकाराणां पररूपे तव / मम इति रूपसिद्धिः ।

युवयोः

युष्मद् + ओस्

युव + अद् + ओस् = युवावौ द्विवचने

युव + अ + य् + ओस् = योऽचि

युव + य् + ओस् = अतो गुणे

युवयोस्

युवयोः ।

आवयोः

युष्मद् + ओस्

आव + अद् + ओस् = युवावौ द्विवचने

आव + अ + य् + ओस् = योऽचि

युव + य् + ओस् = अतो गुणे

आवयोस्

आवयोः ।

युष्माकम्

युष्मद् + आम्

युष्मद् + सुट् + आम्

= अमि सर्ववर्वनाम्नः सुट् ।

युष्मद् + स् + आम्

युष्मद् + साम् ।

युष्मद् + आकम् = साम आकम्

युष्म + अद् + आकम्

युष्म् + ( ) + आकम् = शेषे लोपः

युष्माकम् ।

अस्माकम्

अस्मद् + आम्

अस्मद् + सुट् + आम्

अमि सर्वनाम्नः सुट् ।

अस्मद् + स + आम्

अस्मद् + साम् ।

अस्मद् + आकम् = साम आकम्

अस्म + अद् + आकम्

अस्म् + ( ) + आकम् = शेषे लोपः

युष्माकम् ।

त्वयि

युष्मद् + ङि

त्व + अद् + ङि = त्वमावेकवचने

त्व + द् + ङि = अतो गुणे

त्व + य् + ङि = योऽचि

त्व + य् + इ

त्वयि ।

मयि

अस्मद् ङि

म + अद् + ङि = त्वमावेकवचने

म + द् + ङि = अतो गुणे

म + य + ङि = योऽचि

म + य् + इ

मयि ।

युष्मासु

युष्मद् + सुप्

युष्म + (आ) + सु

= युष्मदस्मदोरमादेशे युष्मासु

अस्मासु

अस्मद् + सुप्

अस्म + (आ) + सु

= युष्मदस्मदोरमादेशे अष्मासु

साधनानुसारं रूपलिखनप्रकारः प्रतिसोपानं यत् यत् सूत्रमुद्दिष्टं तेषामुल्लेखनं विधाय उपस्थापनीयः । 'त्वम्' इति सिद्धिप्रसङ्गे यथा प्रदर्शितं तथा विधेयं बोधनीयञ्च ।

**स्वावलोकनप्रश्नाः**

१. त्वम् इति सिद्धये त्वादेशः केन सूत्रेण भवति ?

२. अहम् इति सिद्धये 'सु' इति स्थाने क आदेशो भवति ?

३. 'युवाम्' इति सिद्धये आकारादेशः केन सूत्रेण भवति ?

४. यूयम् इति रूपं कथं सिध्यति ?

५. युष्मान् इति रूपसिद्धिं प्रदर्शयत ।

६. 'मया' इत्यत्र यकारादेशः केन सूत्रेण भवति ?

७. 'मह्यम्' इति कथं सिध्यति ?

८. आवाभ्याम् इति रूपसिद्धिः प्रदर्शयत ?

९. युष्माकम् इति कथं जायते ?

१०. मयि इति कथं सिध्यति ?

## ८.१८. युष्मद्शब्दस्य अस्मद्शब्दस्य च सप्तसु विभक्तिषु रूपलिखनप्रकारः

**युष्मद्**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम् (त्वा) | युवाम् (वाम्) | युष्मान् (वः) |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम् (ते) | युवाभ्याम् (वाम्) | युष्मभ्यम् (वः) |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव (ते) | युवयोः (वाम्) | युष्माकम् (वः) |
| सप्तमी | त्वयि | युवयोः | युष्मासु । |

**अस्मद्**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम् (मा) | आवाम् (नौ) | अस्मान् (नः) |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम् (मे) | आवाभ्याम् (नौ) | अस्मभ्यम् (नः) |

| | | | |
|---|---|---|---|
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम (मे) | आवयो: (नौ) | अस्माकम् (न:) |
| सप्तमी | मयि | आवयो: | अस्मासु । |

**स्वावलोकनप्रश्नाः**

१. युष्मद्शब्दस्य पञ्चमीविभक्तिबहुवचने किं रूपम् ?

२. अस्मद्शब्दस्य पञ्चमीविभक्तिबहुवचने किं रूपम् ?

३. युष्मद्शब्दस्य द्वितीयाविभक्तौ रूपाणि लिखत ?

४. अस्मद्शब्दस्य चतुर्थीविभक्तौ रूपाणि लिखत ?

५. युष्मद्शब्दस्य सप्तमीविभक्तौ रूपाणि लिखत ?

६. अस्मद्शब्दस्य सप्तमीविभक्तौ रूपाणि लिखत ?

## ८.१९. युष्मदस्मद्शब्दयो: रूपसाधनप्रकारे 'वाम्', 'व:', 'ते', 'त्वा', 'नौ', 'न:', 'मे', 'मा' इति रूपाणि

द्वितीया-चतुर्थी-षष्ठीविभक्तिषु अस्मद्शब्दस्य 'त्वा', 'वाम', 'व:', 'ते' रूपाणि अस्मद्-शब्दस्य 'मा', 'नौ', 'न:', 'मे' इति रूपाणि भवन्ति ।

द्वितीयाविभक्ति:

युष्मद् + अम् = त्वाम् = त्वा अस्मद् + अम् = माम् = मा

युष्मद् + औट् = युवाम् = वाम् अस्मद् + औट् = आवाम् = नौ

युष्मद् + शस् = शुष्मान् = व: अस्मद् + शस् = अस्मान् = न:

चतुर्थीविभक्ति:

युष्मद् + ङे = तुभ्यम् = ते अस्मद् + ङे = मह्यम् = मे

२. युष्मदस्मद्शब्दयो: सप्तसु विभक्तिषु रूपलिखनप्रकारम् उपस्थापयत ।

३. केषाञ्चित् त्रयाणां सूत्राणां व्याख्यानं कुरुत

ङे प्रथमयोरम्, प्रथमायाश्च द्विवचने भाषायाम्, साम् आकम्, पञ्चम्या अत्, शसो न: ।

४. 'न:', 'व:', 'त्वा', 'मा', 'ते', 'मे' इत्येतेषां निष्पत्तिप्रकारंससूत्रमुपपाद्य तेषामाशयं लिखत ।

II. **विश्लेषणात्मका: प्रश्ना:**

१५

१. हलन्तस्त्रीलिङ्गप्रकरणं किम् ? तत्र के शब्दा: साधुत्वविधानाय उपदिष्टा: ?

२. त्वम्, आवाम् इति पदयो: साधनप्रकारमुपपादयत ।

३. मत्, युष्मत् इति पदयो: साधनप्रकारमुपपादयत ।

४. त्वाम्, अस्मान् इति पदयो: साधनप्रकारमुपपादयत ।

५. त्वयि, अस्माकम् इति पदयो: साधनप्रकारमुपपादयत ।

६. तुभ्यम्, मम इति पदयो: साधनप्रकारमुपपादयत ।

७. 'यूयवयौ जसि' इति सूत्रस्य आशयं विलिख्य तदनुसारं प्रयोगं साधयत ।

८. 'युवावौ द्विवचने' इति सूत्रस्य आशयं विलिख्य तदनुसारं प्रयोगं साधयत ।

III. **लघुप्रश्ना:** १०

१. हलन्तशब्द इति नामकरणम् ?

२. हलन्तशब्दानां लिङ्गत्रयम् ?

३. सप्तसु विभक्तिषु युष्मद्स्थानीया: आदेशा: ?

४. सप्तसु विभक्तिषु अस्मद्स्थानीया: आदेशा: ?

५. युस्मदस्मद्शब्दपरत: विभक्तिस्थानीया: आदेशा: ?

६. के हलन्तवर्णा: ?

७. हलन्तपुँल्लिङ्गप्रकरणौ शब्दरूपसाधनाय 'ह'कारान्तशब्द: किमर्थं प्रथमं प्रोक्त: ?

८. शब्दान्तरापेक्षया युष्मदस्मद्शब्दयो: कथं भिन्नता ?

९. 'न:' 'व:' इत्यनयो: क: अर्थ: ? कुत्र च प्रयोग: ?

१०. 'अतो गुणे', 'अमि पूर्व:' इति सूत्रयो: किं कार्य्यम् ?

IV. **एकाङ्कप्रश्ना:**

१. हलन्तप्रकरणे कति पाणिनीयानि सूत्राणि सन्ति ?

२. हलन्तप्रकरणस्थसूत्रेण किम्भूतं पदं निष्पद्यते ?

३. संख्यावाचका: के हलन्तशब्दा: ?

४. 'हल्' इत्यस्य लोकप्रसिद्ध: शब्द: क: ?

५. शब्दानां कति लिङ्गानि सन्ति ?

६. रजस: आधिक्ये किं लिङ्गं जायते ?

७. लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य इति कस्य सिद्धान्त: ?

८. 'व'कारान्तस्य हलन्तशब्दस्यैकुदाहरणं देयम् ?

९. 'दिश्' शब्द: कस्मिन् लिङ्गे वर्त्तते ?

१०. ‘पुर्’ शब्द: कस्मिन् लिङ्गे वर्त्तते ?
११. ‘अहन्’ शब्द: कस्मिन् लिङ्गे वर्त्तते ?
१२. युष्मद्शब्द: कस्मिन् पुरुषे वर्त्तते ?
१३. अस्मद्शब्द: कस्मिन् लिङ्गे वर्त्तते ?
१४. ‘ङयि’ इत्यस्य क: अर्थ: ?
१५. विधिसूत्रसंघटने आदेशे का विभक्ति: ?
१६. ‘अचि’ इत्यत्र का विभक्ति: ?
१७. प्रथमाविभक्तौ युस्मद्स्थाने के आदेशा: विधीयते ?
१८. ‘त्वां’ ‘त्वा’ युष्मद्शब्दस्य कुत्र रूपम् ?
१९. षष्ठीविभक्तेरेकवचने अस्मद्स्थाने क: आदेश: ?
२०. शस्विभक्तिस्थाने किमादेशो जायते ?
२१. ‘भ्यम्’ इत्यादेश: कुत्र विभक्तौ जायते ?
२२. ‘शेषे लोप:’ इति सूत्रेण किं भवति ?
२३. ‘आकम्’ इत्यादेश: कस्मिन् स्थाने जायते ?
२४. ‘अस्मत्’ इत्यत्र विभक्त्यादेश: क: ?
२५. युष्मद्शब्दस्य पञ्चमीविभक्तेरेकवचने किं रूपम् ?
२६. युवाम् कस्यां विभक्तौ निष्पद्यते ?
२७. अमादेश: कुत्र विभक्तौ जायते ?
२८. ‘मा’ इति कस्यां विभक्तौ जायते ?
२९. अस्मद्शब्दस्य कर्त्तृप्रयोगे का पुरुषव्यवस्था भवति ?
३०. युष्मदस्मद्शब्दरूपसाधने कति संख्याकानि पाणिनीयानि सूत्राणि सन्ति ?

## ८.२१. एकाङ्कप्रश्नानामुत्तराणि

१. ११५ २. हलन्तपद ३. चतुर्, चतुर्, पञ्चन्, सप्तन्, अष्टन्, ४. व्यञ्जन ५. त्रीणि ६. स्त्रीलिङ्गम् ७. भाष्यकारस्य ८. दिव् ९. स्त्री १०. स्त्री ११. नपुंसक १२. मध्यम १३. उत्तम १४. चतुर्थ्येकवचने १५. प्रथमा १६. सप्तमी १७. त्व, युव, यूय १८. द्वितीया, चतुर्थी, षष्ठी (एकवचने) १९. मम २०. न् २१. चतुर्थी-बहुवचने २२. लोप २३. साम: २४. अत् २५. त्वत् २६. प्रथमाद्वितीया द्विवचने २७. प्रथमा-द्वितीया, सप्तम्येकवचने २८. द्वितीया एकवचने २९. उत्तमपुरुष ३०. २२

********

# ।। नवमखण्डः ।।

## ‘ह’–‘व’– ‘न’– ‘ज’– कारान्तहलन्तशब्दानां संविज्ञानं साधनप्रकारश्च

### ९.१. प्रस्तावना

व्यवहारानुसारं शब्दानां लिङ्गत्रयं विद्यते । पुँलिङ्ग–स्त्रीलिङ्ग–क्लीवलिङ्गश्चेति भावेन । तदनुसारं शब्दानां विभाजनम् । पुनश्च अन्तिमं वर्णमादाय अपरमपि विभाजनम् । एवं भावेन प्रत्येकं शब्दस्य कृते विभाजनद्वयम् । एतदेवादाय हलन्तशब्दानां पदसंघटनव्यवस्था हलन्तप्रकरणे विचार्य्यते । ‘ह’कारान्तपुँल्लिङ्गशब्दाः, ‘ह’कारान्तस्त्रीलिङ्गशब्दाः, ‘ह’कारान्तक्लीवलिङ्गशब्दाश्चेति भावेन । किन्तु यस्य शब्दस्य यस्मिन् लिङ्गे व्यवहारो न विद्यते, तस्य शब्दस्य तल्लिङ्गता अनुशासनविधौ न दृश्यते। लिह्, दुह्, विश्ववाह्, अनडुह् प्रभृतयः ‘ह’कारान्ताः पुँल्लिङ्गशब्दाः । ‘उपानह’ इति हकारान्तस्त्रीलिङ्ग–शब्दाः । नपुंसकलिङ्गे हकारान्तशब्दाः स्वनडुह्प्रभृतयः ‘ह’कारान्तशब्दानां लिङ्गत्रये विद्यमानता । ‘सुदिव’ इति ‘व’कारान्तशब्दः पुँल्लिङ्गे विद्यते । ‘दिव्’ इति स्त्रीलिङ्गे विद्यते । किन्तु नपुंसकलिङ्गे ‘व’‘ह’कारान्तशब्दाः न सन्ति । एवं ‘न’कारान्त – ‘ज’कारान्तादीनां सर्वेषां शब्दानां कृते व्यवस्था । प्रकृतखण्डे केवलं विभाजनमादाय ‘ह’–‘व’–’न’–‘ज’–कारान्तहलन्तशब्दानां खलु उपपादनं कृतम् ।

१. ‘ह’कारान्तः
- i. पुं — लिह्, दुह्, द्रुह्, मुह्, स्नुह्, विश्ववाह्, अनडुह्, तुरासाह्, इत्येते शब्दाः ।
- ii. स्त्री — उपानह्, उष्णिह् ।
- iii. क्ली — स्वनडुह ।

२. ‘व’कारान्तः
- i. पुं — सुदिव् ।
- ii. स्त्री — दिव् ।
- iii. क्ली

३. ‘न’कारान्तः
- i. पुं — राजन्, यज्वन्, ब्रह्मन्, वृत्रहन्, मघवन्, श्वन्, युवन्, अर्वन्, पथिन् ।
- ii. स्त्री
- iii. क्ली — अहन्, दण्डिन्, सुपथिन् ।

४. ‘ज’कारान्तः
- i. पुं — ऋत्विज्, युज्, सुयुज्, खञ्ज्, राज्, विभ्राज्, परिव्राज्, विश्वराज्, भ्रस्ज् ।
- ii. स्त्री
- iii. क्ली — ऊर्ज ।

एतेषां शब्दानां रूपसाधनाय कौमुद्यां ३९ संख्याकानि पाणिनीयानि सूत्राणि वर्त्तन्ते ।

## ९.२. उद्देश्यम्

प्रियपाठका: ! अस्मिन् खण्डे अधोलिखितान् विन्दून् आलोचयिष्यन्ति

१. हलन्तप्रकरणे 'ह'कारान्तपुँल्लिङ्गस्त्रीलिङ्गक्लीवलिङ्गशब्दान् अवगमिष्याम: ।
२. 'ह'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि प्राप्स्याम: ।
३. सूत्रोक्तपारिभाषिकशब्दान् जानीम: ।
४. सूत्राणामर्थपरिकल्पनं ज्ञास्यान्ति ।
५. सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्म: ।
६. हलन्तप्रकरणे 'व'कारान्तशब्दान् अवगमिष्याम: ।
७. 'व'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि प्राप्स्याम: ।
८. सूत्रोक्तपारिभाषिकशब्दान् जानीम: ।
९. सूत्राणामर्थपरिकल्पनं ज्ञास्यन्ति ।
१०. सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्म: ।
११. हलन्तप्रकरणे 'न'कारान्तशब्दान् जानीम: ।
१२. 'न'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि प्राप्स्याम: ।
१३. सूत्रोक्तपारिभाषिकशब्दान् जानीम: ।
१४. सुत्राणामर्थपरिकल्पनं ज्ञास्यन्ति ।
१५. सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्म: ।
१६. हलन्तप्रकरणे जकारान्तशब्दान् अवगच्छाम: ।
१७. 'ज'कारान्तशब्दरूपसाधनोद्दिष्टानि सूत्राणि प्राप्स्याम: ।
१८. सूत्रोपात्तपारिभाषिकशब्दान् जानीम: ।
१९. सूत्राणामर्थपरिकल्पनं ज्ञास्यन्ति ।
२०. सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्म: ।

## ९.३. हलन्तप्रकरणे 'ह'कारान्तशब्दा:

'ह'कार अन्ते यस्य स हकारान्त: । हकारान्तश्चासौ शब्द: हकारान्तशब्द: । यस्य शब्दस्य अन्त्ये 'ह'कारो विद्यते । यस्य शब्दस्य अन्तिमो वर्ण: 'ह'कार: । अन्तिमवर्णमादाय शब्दपरिचयसाधने प्रक्रियाकार्य्ये लाघवं भविष्यतीति विचार: । पुनश्च वर्णसमाम्नाये 'हयवरट्' इति हल्वर्णोपदेशसाधनाय प्रथमं सूत्रम् । 'ह'कार इति प्रथमो वर्ण: । अत: हलन्तप्रकरणे तेनैव कारेणन 'ह'कारान्तशब्द: आदावुपदिष्ट: । पुँल्लिङ्ग–स्त्रीलिङ्ग–क्लीवलिङ्गभेदेन तस्य शब्दस्य विभाजनत्रयम् । तथाहि

१. 'ह'कारान्त हलन्तपुँल्लिङ्गशब्दा: लिह्, दुह्, द्रुह्, मुह्, स्नुह्, विश्ववाह,

अनडुह, तुरसाह् ।

२. ‘ह’कारान्त हलन्तस्त्रीलिङ्गशब्दाः उपानह्, उष्णिह् ।

३. ‘ह’कारान्तहलन्तनपुंसकलिङ्गशब्दाः स्वनडुह् ।

**स्वावलोकनप्रश्नाः**

१. ‘ह’कारान्तशब्द इत्यस्य किं विग्रहम् ?

२. ‘ह’कारान्तशब्द इति किमर्थं व्यवहारः ?

३. ‘ह’लन्तप्रकरणे ‘ह’कारान्तशब्दः कथमादावुपदिष्टः ?

४. लिङ्गभेदेन हलन्तशब्दानां कति विभाजनम् ?

५. उपानह इति शब्दः कस्मिन् लिङ्गे वर्त्तते ?

६. ‘विश्ववाह’ शब्दस्य कस्मिन् लिङ्गे वर्त्तमानता ?

७. ‘ह’कारान्तहलन्तनपुंसकलिङ्गस्य एकस्य शब्दस्योदाहरणं देयम् ?

## ९.४. ‘ह’कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

सप्तसु स्वादिषु विभक्तिषु ‘ह’कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन १२ (द्वादश) संख्याकानि सूत्राणि कौमुद्यां वर्त्तन्ते । यैः सूत्रैः वर्णविपरिणामः, वर्णलोपः, इत्यादीनि कार्य्याणि साध्यन्ते ।

‘ह’कारान्तपुँल्लिङ्गशब्दस्य कृत्ते सूत्राणि

१. हो ढः (पा.सू. ८/२/३१) ।

२. दादेर्धातोर्घः (पा.सू. ८/२/३२) ।

३. एकाचो वशो भष् झषन्तस्य स्ध्वोः (पा.सू. ८/२/३७)

४. वा द्रुहमुहष्णुहष्णिहाम् (८/२/३३)

५. बाह ऊठ् (पा.सू.६/४/१३२)

६. सम्प्रसारणाच्च (पा.सू. ६/१/१०८)

७. चतुरनडुहोरामुदात्तः (पा.सू. ७/१/९८)

८. सावनडुहः (पा.सू. ७/१/८२)

९. अम् सम्बुद्धौ (पा.सू. ७/१/९९)

१०. वसुस्रंसुध्वं सवनडुहां दः (पा.सू. ८/२/७२)

११. सहे साडः सः (पा.सू. ८/३/५६)

'ह'कारान्तहलन्तस्त्रीलिङ्गशब्दस्य कृते सूत्राणि

१२. न हो धः (पा.सू. ८/२/३४)

**स्वावलोकनप्रश्नाः**

१. 'ह'कारान्तहलन्तशब्दरूपसाधने कति संख्याकानि पाणिनीयानि सूत्राणि वर्त्तन्ते ?

२. ''दादेः ... घः'' इति सूत्रे शून्यस्थानानि पूरयत ?

३. ''......... ऊठ्'' इति सूत्रे शून्यस्थानानि पूरयत ?

४. ''सा ..........डुहः'' इति सूत्रे शून्यस्थानानि पूरयत ?

## ९.५. सूत्रोक्ताः पारिभाषिकशब्दाः / प्रत्याहाराः

'ह'कारान्तहलन्तशब्दरूपसाधनाय १२ (द्वादश) सूत्राणि वर्त्तन्ते । सूत्राणां संघटने विभिन्नं कौशलं सूत्रकारः अवलम्बते । तेषु पारिभाषिकशब्दानां प्रयोगः अन्यतमः कौशलविशेषः । एवञ्च संक्षिप्तानुशीलनोद्देश्येन प्रत्याहारा अपि प्रतिनिर्द्दिष्टाः जायन्ते । सर्वत्र आचार्य्यपाणिनेरिदं कौशलम् ।

### I. पारिभाषिक शब्दाः

१. सम्प्रसारणम्

'इग्यणः सम्प्रसारणम्' (पा.सू. १/१/४५) इति सूत्रेण सम्प्रसारणसंज्ञा क्रियते । यणः स्थाने नाम य, व, र, ल इति स्थाने यः प्रयुज्यमानः इक् (इ, उ, ऋ, ऌ)स् संप्रसारण-संज्ञको भवति । य = इ, व = उ, र = ऋ, ल = ऌ इत्युपायः ।

२. सम्बुद्धि

एकवचनं सम्बुद्धिः (पा.सू. २/३/४९) इति सूत्रेण सम्बुद्धिसंज्ञा क्रियते । सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात् । सम्बोधने प्रथमा विभक्तिः भवति । तत्र एकवचने या विभक्तिः 'सु' इति । तस्याः सम्बुद्धिसंज्ञा भवति ।

३. उदात्तः

उच्चैरुदात्तः (पा.सू. १/२/२९) इति सूत्रेण विहिता संज्ञा । अचः एषा संज्ञा । उदात्तस्वर इति ।

४. सर्वनामस्थानम्

सुडनपुंसकस्य (पा.सू. १/१/४३) इति सूत्रेण सर्वनामस्थानसंज्ञा विधीयते । सु, औ, जस्, अम्, औट् इति पञ्चविभक्तीनां सर्वनामस्थानसंज्ञा जायते । इमाः विभक्तयः यदि नपुंसकलिङ्गे नागच्छति चेत् ।

**II. प्रत्याहाराः**

१. अच् = (अइउण् .......... ऐऔच्) –

(अ, इ, उ, ऋ, ऌ, ए, ऐ, ओ, औ) ।

२. वश् ..... वरट् (हयवरट्) ...... जवगडदश्

(व, र, ल, भ, म, ङ, ज, न, झ, भ, घ, द, ध, ज, व, ग, ड, द)

३. भष् ..... भञ् ...... घढधष्

(भ, ध, ढ, ध)

४. झष् = झभञ् घढधष्

(झ, भ, घ, ढ, ध)

**स्वावलोकनप्रश्नाः**

१. किं नाम सम्प्रसारणम् ?

२. कस्य सम्बुद्धिसंज्ञा जायते ?

३. के सर्वनामस्थानसंज्ञकाः प्रत्ययाः ?

४. उदात्तसंज्ञाविधायकं सूत्रं किम् ?

५. भष् प्रत्याहारे के वर्णाः सन्ति ?

६. 'झष्'प्रत्याहारस्य अन्तिमवर्णो कः ?

## ९.६. सूत्राणामर्थावगमनम्

१. होढः (पा.सू. ८/२/३१)

अनु. झलि, अन्ते च, पदस्य ।

'ह'कारस्य ढकारादेशो भवति, झलि परतः पदान्ते च ।

उदा. लिट्, लिड् ।

२. दादेर्धातोर्घः (पा.सू. ८/२/३२)

दकार आदिर्यस्य स = दादिः तस्य दादेः ।

अनु. हः, झलि, अन्ते च, पदस्य । व्याख्यानात् उपदेश इत्यर्थलाभः । उपदेशे दादेर्धातोः हस्य घः झलि परतः पदान्ते च ।

उदा. दग्धा, दोग्धा ।

३. एकाचो वशो भष् झषन्तस्य स्ध्वोः ( ८/२/३७)

एकोऽच् यस्मिन् स एकाच्, तस्य एकाचः । झष् अन्ते यस्य झषन्तः, तस्य । स च ध्वश्च स्ध्वौ, तयोः । अनु. धातोः, झलि, अन्ते च, पदस्य । धातोरवयवो य एकाच् झषन्तस्तदवयवस्य वशः स्थाने भष् आदेशो भवति झलि सकारे ध्वशब्दे च परतः पदान्ते च ।

उदा. गोधुक् ।

४. वा द्रुहमुहष्णुहष्णिहाम् (पा.सू. ८/२/३३)

अनु. धातोर्घः, हः, झलि, अन्ते च, पदस्य । द्रुह, मुह, ष्णुह, ष्णिह, इत्येतेषां धातूनां 'ह'कारस्य स्थाने विकल्पेन घकारादेशो भवति झलि परतः पदान्ते च ।

उदा. द्रुह, द्रोग्धा, द्रोढा ।

५. वाह ऊठ् (पा.सू. ६/४/१३३)

अनु. सम्प्रसारणम्, भस्य, अङ्गस्य । वाह इत्येवमन्तस्याङ्गस्य भस्य ऊठ् इत्येतत् सम्प्रसारणं भवति ।

उदा. प्रष्ठौहः, प्रष्ठौहा ।

६. सम्प्रसारणाच्च (पा.सू. ६/१/१०८)

अनु. पूर्वः, एकः पूर्वपरयोः, अचि, संहितायाम् ।

अर्थः सम्प्रसारणादचि परतः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति संहितायां विषये । उदा. यज् = इष्टम्, वप् = लप्तम्, ग्रह = गृहीतम् ।

७. चतुरनडुहोरामुदात्तः (पा.सू. ७/१/९२)

अनु. सर्वनामस्थाने, अङ्गस्य ।

अर्थः चतुर्, अनडुह इत्येतयोः सर्वनामस्थाने परत आम् आगमो भवति स

चोदात्त:।

उदा. चत्वार:, अनड्वान् ।

८. सावनडुह: (पा.सू. ७/१/८२)

अनु. नुम्, अङ्गस्य ।

अर्थ: सौ (प्रथमाविभक्ति: एकवचनम्) परतोऽनडुहोऽङ्गस्य नुमागमो भवति ।

उदा. अनडवान् ।

९. अम् सम्बुद्धौ (पा.सू. ७/१/९९)

अनु. चतुरनडुहो:, अङ्गस्य ।

अर्थ: सम्बुद्धौ परतश्चतुरनडुहोरमागमो भवति ।

उदा. हे प्रियचत्व, हे अनड्वन् ।

१०. वसुस्रंसुध्वंस्वनडुहां द: (पा.सू. ८/२/७२)

अनु. पदस्य ।

अर्थ: सकारान्तस्य वस्वन्तस्य पदस्य, स्रंसु, ध्वंसु अनडुह् इत्येतेषां च दकारादेशो भवति ।

उदा. विद्वस् = विद्वद्भ्याम्, स्रंसु = उखास्रद्भ्याम् । अनुडुह् = अनडुद्भ्याम् ।

११. सहे वाड: स: (पा.सू. ८/३/५६)

अनु. अपदान्तस्य मूर्धन्य:, संहितायाम् ।

अर्थ: सहे धातोर्यत् साड्रूपं तस्य तस्य सकारस्य मूर्धन्यादेशो भवति ।

उदा. तुराषाट् ।

१२. न हो ध: (पा.सू. ८/२/३४)

अनु. धातो:, ह:, ढलि, अन्ते च, पदम् ।

अर्थ: न हो हकारस्य स्थाने धकारादेशो भवति झलि परत: पदान्ते च ।

उदा. उपानत् ।

**स्वावलोकनप्रश्ना:**

१. 'हो ढ:' इति सूत्रेण किं भवति ?

२. 'दादेर्धातो:' इत्यस्य क आशय: ?

| |
|---|
| ३. 'सम्प्रसारणाच्च' इति सूत्रेण किं भवति ? |
| ४. 'न हो धः' इति सूत्रेण किं भवति ? |
| ५. अनडुह्शब्दस्य सम्बुद्धौ परतः अमागमः केन सूत्रेण भवति ? |

## ९.७. लक्ष्यसिद्धिः

(हकारान्तशब्दानां रूपसाधनप्रकारः)

हलन्तप्रकरणे हकारान्तपुँल्लिङ्गशब्दानं 'लिह्', 'द्रुह्', 'मुह्', 'स्नुह' इत्येतेषां शब्दानां प्रथमाविभक्तेरेकवचने, सप्तमीविभक्तेः बहुवचने भ्याम्-भिस्-भ्यस्विभक्तौ च रूपसाधने वर्णविपरिणामादिप्रक्रियात्मकं कार्य्यं लक्ष्यते । अन्यत्र सर्वत्र विभक्तौ केवलं विभक्तियोगमादाय रूपसंघटनम् ।

१. लिह् = लेहनकर्त्ता

प्रथमा-एकवचने = लिह् + सु = लिट् / लिड्

लिढ् + सु = हो ढः (पा.सू. ८/२/३१)

लिढ् + ( ) = हल्.....

लिड् = झलां जशोऽन्ते

लिट् = वाऽवसाने । विकल्पेन चर्त्वम् ।

लिट् / लिड् ।

सप्तमी बहुवचने

लिह् + सु = लिट्त्सु / लिट्सु ।

लिढ् + सु = हो ढः

लिड् + धुट् + सु = डः सि धुट् (८/३/२९) विकल्पेन धुट् ।

लिड् + ध् + सु

लिड् + (त्) + सु = खरि च (८/४/५५)

लिट् + त् + सु = खरि च (८/४/५५)

लिट्त्सु ।

'धुट्' इत्यभावपक्षे धुट्सु ।

भ्याम् / भिस् / भ्यस् / विभक्तौ

लिह् + भ्याम् / भिस् / भ्यस्
लिढ् + भ्याम् = हो ढः (८/२/३१)
लिड् + भ्याम् = झलां जशोऽन्ते (८/२/३९)
(स्वादिष्वसर्वनामस्थाने इति सूत्रेण पदत्वम् १/४/१७)
लिड्भ्याम्
लिड्भ्याम्, लिड्भिः, लिड्भ्यः इति ।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | लिट् / लिड् | लिहौ | लिहः |
| द्वितीया | लिहम् | लिहौ | लिहः |
| तृतीया | लिहा | लिड्भ्याम् | लिड्भिः |
| चतुर्थी | लिहे | लिड्भ्याम् | लिड्भ्यः |
| पञ्चमी | लिहः | लिड्भ्याम् | लिड्भ्यः |
| षष्ठी | लिहः | लिहोः | लिहाम् |
| सप्तमी | लिहि | लिहोः | लिट्त्सु / लिट्सु |
| सम्बो. | हे लिट् !/लिड् ! | लिहौ ! | लिहः ! |

२. दुह् दोहनकर्त्ता

प्रथमा एकवचने
दुह् + सु = धुक् / धुग्
दुघ् + सु = दादेर्धातोर्घः (८/२/३२)
दुघ् एकाचो वशो भष् ..... (८/२/३७)
धु ग् = झलां जशोऽन्ते
धु क् = वाऽवसाने । विकल्पेन चर्त्वम् ।
धुग् / धुक् ।

सप्तमीबहुवचने
दुह् + सुप् = धुक्षु ।
दुह् + सु
दुघ् + सु = दादेर्धातोर्घः ।
दुग् + सु = झलां जशोऽन्ते ।
दुक् + सु = खरि च ।
धुक् + सु = एकाचो वशो भष् ..... ।
धुक् + षु = आदेशप्रत्यययोः ।
धुक्षु ।

भ्याम् / भिस् / भ्यस्विभक्तौ

दुह् + भ्याम् / भिस् / भ्यस्

दुघ् + भ्याम्   दादेर्धातोर्घः

दुग् + भ्याम् = झलां जशोऽन्ते

धुग् + भ्याम् = एकाचो वशो भष्

धुग्भ्याम् / धुग्भिः / धुग्भ्यः ।

अन्यत्सर्वं लिड् शब्दवत् रूपसंघटनं बोधनीयं जायते ।

३. द्रुह = दोहनकर्त्ता

द्रुहशब्दवत् सर्वासु विभक्तिषु रूपं प्रचलति । किन्तु पदान्ते झलादौ विभक्तौ च विकल्पेन ''वा द्रुहमुहष्णुहष्णिहाम्'' (८/२/३३) इति सूत्रेण 'ह'कारस्य घत्वं भवति । अतः उभयत्र शज्त्वं चर्त्वञ्च विकल्पेनोपजायते । येन

पदान्ते (सु विभक्तौ) = द्रुह् + सु

= ध्रुक्, ध्रुग् / ध्रुट्, ध्रुड् ।

झलादौ  भ्याम्विभक्तो = ध्रुग्भ्याम् / ध्रुड्भ्याम् ।

भिस्विभक्तौ = ध्रुग्भिः / ध्रुड्भिः ।

भ्यस्विभक्तौ = ध्रुग्भ्यः / ध्रुड्भ्यः ।

सुप्विभक्तौ = ध्रुक्षु / ध्रुट्त्सु / ध्रुट्सु ।

एवं मुह्(मोहनकर्त्ता) स्नुह् (वमनकर्त्ता) इति शब्दशोः रूपं द्रुहशब्दात् बोधनीयं जायते ।

४. विश्ववाह = विश्वं वहतीति । (विश्वम्भरः)

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | विश्ववाह् / विश्ववाड् | विश्ववाहौ | विश्ववाहः |
| द्वितीया | विश्ववाहम् | विश्ववाहौ | विश्वौहः |
| तृतीया | विश्वौहा | विश्ववाड्भ्याम् | विश्ववाड्भिः |
| चतुर्थी | विश्वौहे | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| पञ्चमी | विश्वौहः | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| षष्ठी | विश्वौहः | विश्वौहोः | विश्वौहाम् |
| सप्तमी | विश्वौहि | विश्वौहोः | विश्ववाट्त्सु / विश्ववाट्सु |
| सम्बो. | हे विश्ववाट् ! हे विश्ववाड् ! | विश्ववाहौ | विश्ववाहः |

विश्ववाट् / विश्ववाड्, विश्ववाट्त्सु / विश्ववाट्सु  लिह्शब्दवत् विज्ञेयम्

विश्ववाड्भ्याम्, विश्ववाड्भिः, विश्ववाड्भ्यः (ढत्वम्/जशत्वम्/चर्त्वम्)
ढत्वम्/जशत्वम्

विश्वौहः = विश्ववाह + शस्
= विश्व + ऊठ् + आह + शस् = वाहः ऊठ्
= विश्व + ऊ + आह + अस् =
= विश्व + ऊह + अस् = सम्प्रसाराच्च
= विश्वौह + अस् = एत्येधत्यूठ्सु
= विश्वौहस् = विश्वौहः ।

विश्वौह इति निष्पत्तेरनन्तरं विभक्तियोगात् विश्वौहः, विश्वौहोः, विश्वौहाम् विश्वौहि इति रूपसिद्धिः ।

५. तुरासाह् = (इन्द्रः) अस्य रूपं लिहशब्दात् भवितुमर्हति, केवलं मूर्धन्यादेशः ।
'सहेः साडः सः' इति सूत्रेण ।

६. अनडुह = वलीवर्दः एतस्य शब्दस्य रूपसिध्यर्थं सूत्रचतुष्टयमुपतिष्ठते ।
चतुरनडुहोरामुदात्तः (७/१/९८) 'आम्' इत्यागमः । 'मिदचोऽन्त्यात् परः'
इति नियमेन अन्त्यात् अचः परः ।

सावनडुहः (७/१/८२) नुम् ।

वसुस्रंसुध्वंस्वनडुहां दः (८/२/७२) 'ह'कारस्थाने 'दकारः' ।

अम् सम्बुद्धौ (७/१९९) सम्बुद्धा अम् ।

अनडवान्

अनडुह + सु
अनडुह + आम् + ह + सु = चतुरनडुहोरामुदात्तः (७/१/९८)
अनडु + आ + ह् + सु
अनड् व + आ +ह् + सु = इको यणचि ।
अनड् वा + नुम् + ह + सु = सावनडुहः (७/१/८२)
अनड् वा + न् + ह् + सु
अनड् वा + न् + ह + ( ) = हलङ्याभ्यो
अनड् वा न् + ( ) = संयोगान्तस्य लोपः
अनड्वान् ।

सर्वनामस्थानविभक्तौ 'आम्' इत्यागमः अतः अनड्वाहौ, अनड्वाहः, अनड्वाहम् इति रूपसिद्धिः । एतद्विहाय अजादिविभक्तिषु अनडुहा, अनडुहे, अनडुहः, अनडुहोः, अनडुहाम्, अनडुहि । सम्बुद्धौ अनड्वान् इति । भ्याम्-भिस्-भ्यस्विभक्तौ हकारस्य स्थाने 'वसुस्रंसु' इति सूत्रेण दकारः 'अनडुद्भ्याम्' इति ।

**II. 'ह'कारान्तहलन्तस्त्रीलिङ्गशब्दाः**

१. उपानह् = पादुका

उपानह् + सु

उपानह् + ( ) = हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (६/१/६८) ।

उपानध् + ( ) = नहो धः (८/२/३४)

उपानद् = झलां जशोऽन्ते (८/२/३८)

उपानत् = खरि च (८/४/५४)

पुँल्लिङ्ग 'लह्' शब्दवत् रूपं सञ्चरति केवलं भ्याम्-भिस्-भ्यस्विभक्तौ 'नहो धः' इति सूत्रेण हकारस्य स्थाने 'ध'कारे जश्त्वे 'द'कारे उपानद्भ्याम्, उपानद्भिः, उपानद्भ्यः इति रूपम् ।

२. उष्णिह् = शिरस्त्राणः

उष्णिह् + सु

उष्णिह् + ( ) = हल्ब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (६/१/६८)

उष्णिघ् = क्विन्प्रत्ययस्य कुः

उष्णिक् = जश्त्वे, चर्त्वे

भ्यामादिविभक्तौ उष्णिग्भ्याम् इत्यादिरूपम् ।

३. हकारान्तहलन्तनपुंसकलिङ्गशब्दाः

स्वनडुह्

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | स्वनडुत् / स्वनडुद् | स्वनडुही | स्वनड्वांहि |
| द्वितीया | स्वनडुत् / स्वनडुद् | स्वनडुही | स्वनड्वांहि |

तृतीयादिषु विभक्तिषु अनडुह्शब्दवत् रूपं बोधनीयम् ।

| | | |
|---|---|---|
| स्वनडुह् + सु | | स्वनडुही |
| स्वनडुह् + ( ) | = स्वमोर्नपुंसकात् | स्वनडुह् + औ |
| स्वनडुद् | = वसुस्रंस्व ..... | स्वनडुह + शी = नपुंसकाच्च |
| स्वनडुत् | = खरि च | स्वनडुही |
| स्वनडसवांहि | = स्वनडुह् + जस् | |

स्वनडुह् + शि = जश्शसोः शिः

स्वनडु + आम् + ह् + शि = चतुरनडुहोः

स्वनड्वा + नुम् + ह + इ = नपुंसकस्य झलचः

स्वनड्वा + न् + ह् + इ

स्वनड्वांहि ।

**स्वावलोकनप्रश्नाः**

१. लिह् शब्दस्य सप्तमीबहुवचने किं रूपम् ?

२. दुह् शब्दस्य प्रथमैकवचने किं रूपम् ?

३. द्रुह् शब्दस्य सप्तमीबहुवचने किं रूपचतुष्टयम् ?

४. विश्ववाह् शब्दस्य द्वितीयाबहुवचने किं रूपम् ?

५. तुरासाह् शब्दस्य कोऽर्थः ?

६. अनडुह् शब्दस्य प्रथमैकवचने किं रूपम् ?

७. उपानह् शब्दस्य तृतीयाबहुवचने किं रूपम् ?

८. स्वनडुह् शब्दस्य प्रथमाविभक्तिबहुवचने किं रूपम् ?

## ९.८. हलन्तप्रकरणे 'व'कारान्तशब्दाः

'व'कारः अन्ते यस्य स 'व'कारान्तः । 'व'कारान्तश्चासौ शब्दः 'व'कारान्तशब्दः यस्य शब्दस्य अन्त्ये 'व'कारो विद्यते । यस्य शब्दस्य अन्तिमो वर्णः 'व'कारः । अन्तिमवर्णमादाय शब्दपरिचयसाधने प्रक्रियाकार्य्ये लाघवं भविष्यतीति विचारः । पुँल्लिङ्ग–स्त्रीलिङ्गभावेन तस्य शब्दस्य विभागद्वयेन प्रयोगः प्राप्यते । क्लीवलिङ्गे असौ शब्दः न प्राप्यते ।

१. 'व'कारान्तहलन्तपुँल्लिङ्गशब्दः सुदिव् ।
२. 'व'कारान्त हलन्तस्त्रीलिङ्गशब्दः दिव् ।
३. 'व'कारान्तहलन्तक्लीवलिङ्गशब्दः ।

**स्वावलोकनप्रश्नाः**

१. ‘व’कारान्तशब्द इत्यस्य किं विग्रहवाक्यम् ?

२. ‘व’कारान्तशब्द इति किमर्थं व्यवहार: ?

३. दिव् शब्दस्य कस्मिन् लिङ्गे व्यवहार: ?

४. ‘व’कारान्तहलन्तपुँल्लिङ्गशब्दस्योदाहरणं देयम् ?

## ९.९. ‘व’कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

स्वादिषु सप्तसु विभक्तिषु ‘व’कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन कौमुद्यां मुख्यतया सूत्रद्वयं विद्यते

१. दिव औत् (पा.सू. ७/१/८४)

२. दिव उत् (पा.सू. ६/१/१३१)

**स्वावलोकनप्रश्नाः**

१. ‘व’कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन कौमुद्यां कति सूत्राणि सन्ति ?

## ९.१०. सूत्राणामर्थावगमनम्

दिव् औत् (पा.सू. ७/१/८४)

दिव: = षष्ठ्येकवचने रूपम् । औत् = प्रथमाविभक्तेरेकवचने रूपम् ।

अनु सौ, अङ्गस्य ।

अर्थ: दिव इत्येतस्य अङ्गस्य सौ परत औत् इत्ययमादेशो भवति ।

१. दिवु क्रीडाविचिकित्सा इति धातो: ग्रहणं न भवति ‘निरनुबन्धकग्रहणे न सानुबन्धकस्य’ इति परिभाषावचनात् । प्रतिपदिकस्य दिव् इत्यस्य ग्रहणम् । पुनश्च ‘द्यो दिवौ द्वे स्त्रयाम्’ इत्यमरकोषवचनात् दिव्शब्द: स्त्रीलिङ्ग: किन्तु सु = शोभना द्यौर्यस्येति बहुब्रीहिसमासात् सुदिव्शब्द: पुँल्लिङ्ग: । ‘औत्’ इत्यत्र तकार: उच्चारणार्थ: । अत: अनेकालत्वाभावात् सर्वादिशता न भवति । ‘त’कारस्य इत्सञ्ज्ञा तु न भवति । तस्य किमपि फलं नास्ति ।

२. दिव उत् (पा.सू. ६/१/१३१)

दिव: = षष्ठीविभक्तेरेकवचने । उत् = प्रथमैकवचने ।

अनु. 'एङः पदान्तादति' इति सूत्रात् पदग्रहणं मण्डूकप्लुतगत्याऽनुवर्त्तते । अनुवर्त्तमानस्य तस्य पदस्य सप्तम्या विपरिणामो जायते । अर्थ: दिवोऽन्तादेश: उकार: स्यात् पदान्ते इति सूत्रार्थ: । उत् इत्यत्र तपरकरणस्य फलन्तु भाव्यमान उकार: स्वसवर्णग्राहक: । भाव्यमान: नाम विधीयमान: इत्यर्थ: । सूत्रेण तस्य 'उ'कारस्य विधानं भवतीति रहस्यम् ।

**स्वावलोकनप्रश्नाः**

१. 'दिव औत्' इति सूत्रे दिव इति किं विभक्त्यन्तं पदम् ?

२. 'दिव औत्' इत्यत्र तकार: किमर्थ: ?

३. 'दिव उत्' इत्यत्र तकार: किमर्थ: ?

४. दिव् शब्द: कस्मिन् लिङ्गे वर्त्तते ?

५. सुदिव् इत्यत्र क: समास: ? किं लिङ्गम् ?

६. दिव उत् इत्यत्र 'पदान्ते' इत्यर्थ: कथं लभ्यते ?

## ९.११. लक्ष्यसिद्धिः ('व'कारान्तहलन्तशब्दानां रूपसाधनप्रकार:)

हलन्तप्रकरणे 'व'कारान्तपुँल्लिङ्गशब्दस्य सुदिव् इत्यस्य प्रथमाविभक्तेरेकवचने भ्याम्-भिस्-भ्यस्-सुप्विभक्तिषु 'सुदिव्' इत्यत्र 'व'कारस्य स्थाने आदेशविधाने रूपं निष्पद्यते अन्यत्र सर्वत्र विभक्तौ विभक्तियोगेन रूपनिष्पत्ति: ।

१. सुदिव् + सु = सुद्यौ: ।

सुदिव् + सु

सुदि + औत् + सु = दिव औत् (पा.सू. ७/१/८४)

सु दि + औ + सु

सु द् + य् + औ + सु = इको यणचि (पा.सू. ६/१/७७)

सुद्यौ: ।

जायमानस्य 'औत्' इत्यादेशस्य स्थानिवत्वेन 'व' इति हलन्तमादाय हलङ्यादिलोपो न भवति। अल्विधित्वात् स्थानिवत्त्वं न ।

२. सुद्युभ्याम् / सुद्युभिः / सुद्युभ्यः / सुद्युषु   सुदिव + भ्याम् / भिस् / भ्यस् / सुप् ।

सुद्युभ्याम् = सुदिव् + भ्याम्

सुदि + उत् + भ्याम् = दिव उत् (पा.सू. ६/१/११५)

सुदि + उ + भ्याम् ।

सु द् + य + उ + भ्याम्

सुद्युभ्याम् ।

स्त्रीलिङ्गे वर्त्तमानस्य 'दिव्' शब्दस्य 'सुदिव्' इति शब्दवत् रूपं सर्वासु विभक्तिषु प्रवर्त्तते ।

**स्वावलोकनप्रश्नाः**

१. सुदिव् शब्दस्य प्रथमाविभक्तेरेकवचने किं रूपम् ?

२. दिव्शब्दस्य प्रथमाविभक्तेरेकवचने किं रूपम् ?

३. दिव् शब्दस्य सप्तमीबहुवचने किं रूपम् ?

४. सुदिव् शब्दस्य 'व'कारस्थाने औकारादेशः केन सूत्रेण जायते ?

५. दिव् शब्दस्य 'व'कारस्थाने 'उ'कारादेशः केन सूत्रेण जायते ?

## ९.१२. हलन्तप्रकरणे 'न'कारान्तशब्दाः

'न'कारः अन्ते यस्य स 'न'कारान्तश्चासौ शब्दः 'न'कारान्तशब्दः । यस्य शब्दस्य अन्ते 'न'कारो विद्यते । यस्य शब्दस्य अन्तिमो वर्णः 'न'कारः । पुँल्लिङ्ग–क्लीवलिङ्गभावेन तस्य शब्दस्य विभागद्वयेन प्रयोगः प्राप्यते । स्त्रीलिङ्गे असौ शब्दः न प्राप्यते ।

१. 'न'कारान्तहलन्तपुँल्लिङ्गशब्दाः   राजन्, यज्वन्, ब्रह्मन्, वृत्रन्, श्वन्, युवन्, अर्वन्, पथिन्, मथिन् ।

२. 'न'कारान्तहलन्तस्त्रीलिङ्गशब्दाः

३. 'न'कारान्तहलन्तक्लीवलिङ्गशब्दाः   अहन्, दण्डिन्, सुपथिन् ।

**स्वावलोकनप्रश्नाः**

१. ‘न’कारान्तशब्द इत्यस्य किं विग्रहवाक्यम् ?

२. ‘न’कारान्तशब्द इति किमर्थं व्यवहार: ?

३. ‘अहन्’-शब्दस्य कस्मिन् लिङ्गे व्यवहार: ?

४. केषाञ्चित् हलन्त-‘न’कारान्तशब्दानामुदाहरणं देयम् ?

५. ‘न’कारान्तहलन्तस्त्रीलिङ्गशब्दा: व्यवहारे सन्ति न वा ?

## ९.१३. ‘न’कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

स्वादिषु सप्तसु विभक्तिषु ‘न’कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन कौमुद्यां मुख्यतया १७ संख्याकानि पाणिनीयानि सूत्राणि प्रवृत्तानि सन्ति ।

१. न ङि सम्बुध्यो: (पा.सू. ८/२/८)
२. न लोप: सुपृस्वर ..... (पा.सू. ८/२/२)
३. हलि च (पा.सू. ८/२/७७)
४. न संयोगाद्वमन्तात् ( पा.सू. ३/४/१३७)
५. इन् हन् पूषार्य्यम्णां शौ (पा.सू. ६/४/१२)
६. सौ च (पा.सू. ६/४/१३)
७. हो हन्ते र्ञ्णि णि न्नेषु (पा.सू. ७/३/५४)
८. मघवा बहुलम् (पा.सू. ६/४/१२८)
९. उगिदचां सर्वनामस्थानेऽधातो: (पा.सू. ७/१/७०)
१०. श्वयुवमघोनामतद्धिते (पा.सू. ६/४/१३३)
११. न सम्प्रसारणे सम्प्रसारणम् (पा.सू. ६/१/३७)
१२. अर्वणस्त्रसावनञ: (पा.सू. ६/४/१२७)
१३. पथिमथिऋभुक्षामात् (पा.सू. ७/१/४५)
१४. इतोऽत् सर्वनामस्थाने (पा.सू. ७/१/८६)
१५. थोन्थ: (पा.सू. ७/१/८७)
१६. अस्य टेर्लोप: (पा.सू. ७/१/८८)
१७. अहन् (पा.सू. ८/२/३८)

**स्वावलोकनप्रश्नाः**

१. ‘न’कारान्तहलन्तशब्दरूपसाधने कति पाणिनीयानि सूत्राणि सन्ति ?

२. ‘न सम्प्रसारणे ....’ । शून्यं स्थानं पूरयत ?

३. ‘..... सर्वनामस्थानेऽधातोज’ । शून्यं स्थानं पूरयत ?

४. ‘...... न्थः’ । शून्यस्थानं पूरयत ?

५. ‘मघवा .....’ । शून्यस्थानं पूरयत ?

## ९.१४. सूत्राणामर्थावगमनम्

१. न ङि सम्बुध्योः (पा.सू. ८/२/८)

अनु. न लोपः प्रातिपदिकान्तस्य, पदस्य । प्रातिपदिकस्य पदस्य योऽन्त्यः न कारस्तस्य ङौ सम्बुद्धौ च परतो लोपो न भवति । उदा. हे राजन्, राजनि ।

२. न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति (पा.सू. ८/२/२)

अनु. असिद्धः । सुब्विधौ स्वरविधौ संज्ञाविधौ तुग्विधौ च कृति ‘न’लोपः पूर्वत्रासिद्धो भवति । उदा. राजभिः, राजसु ।

३. हलि च (पा.सू. ८/२/७७)

अनु. बोरूपधायाः दीर्घ, इकः, धातोः ।

अर्थः हलि च परतो रेफवकारान्तस्य धातोरूपधाया इको दीर्घो भवति ।

४. न संयोगाद्वमन्तात् (पा.सू. ३/४/१३७)

अर्थः वकारमकारान्तसंयोगात्परतस्याऽनोऽकारस्य लोपो न स्यात् ।

उदा. यज्वनः ।

५. इन् हन् पूषार्य्यम्णां शौ (पा.सू. ६/४/१२)

अनु. उपधायाः, अङ्गस्य, दीर्घः ।

अर्थः इन् , हन्, पूषन्, अर्यमन् इत्येवमन्तानामङ्गानामुपधायाः शौ परतः दीर्घो भवति नान्यत्र।

उदा. बहुदण्डीनि, बहुवृत्रहाणि, बहुपूषाणी, बह्वर्यमाणि ।

६. सौ च (पा.सू. ६/४/१३)

अनु. इन् हन् पूषार्य्यम्णाम्, असम्बुद्धौ, उपधायाः, अङ्गस्य, दीर्घः ।

अर्थः सावसम्बुद्धौ परतः इन्हन्पूषार्य्यम्णामुपधाया दीर्घो भवति ।

उदा. दण्डी, वृत्रहा, पूषा, अर्यमा ।

७. हो हन्तेर्ञ्णिन्नेषु (पा.सू. ७.३.५४)

ञश्च णश्च ञ्णौ, ञ्णौ इतौ येषां ते ञ्णितः । ञ्णितश्च न श्च ञ्णिन्नाः ।

अनु. कु, अङ्गस्य ।

अर्थः हन्तेर्हकारस्य स्थाने कवर्गादेशो भवति । ञिति णिति प्रत्यये परतो नकारे च ।

उदा. घातः, घातकः ।

८. मघवा बहुलम् (पा.सू. ६/४/१२८)

अनु. तृ, अङ्गस्य ।

अर्थः मघवन् इत्येतस्याङ्गस्य बहुलं तृ इत्ययमादेशो भवति ।

उदा. मघवान्, बहुलवचनात् न च भवति मघवा ।

९. उगिदचां सर्वनामस्थानेंधातोः (पा.सू. ७/१/७०)

अनु. नुम्, अङ्गस्य । उक् (उ, ऋ) इत् यस्य स उगित् । सु, औ, जस्, अम्, औट्, इति सर्वनामस्थानप्रत्ययाः ।

अर्थः धातुवर्जितानाम् उगितामङ्गानामञ्चतेश्च नुमागमो भवति सर्वनामस्थाने परतः ।

१०. स्वयुवमघोनामतद्धिते (पा.सू. ६/४/१३३)

अनु. सम्प्रसारणम्, भस्य, अङ्गस्य ।

अर्थः श्वन्, युवन्, मघवन्, इत्येतेषां भ संज्ञकानामङ्गानामतद्धिते प्रत्यये परतः सम्प्रसारणं भवति ।

उदा. शुनः, शुना, शुने । यूनः, यूना, यूने । मघोनः, मघोना, मघोने ।

११. न सम्प्रसारणे सम्प्रसारणम् (पा.सू. ६/१/३७)

अर्थः सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न भवति ।

१२. अर्वणस्त्रसावनञः (पा.सू. ६/४/१२७)

अनु. अङ्गस्य ।

अर्थः अर्वन् इत्येतस्याङ्गस्य तृ इत्ययमादेशो भवति । सुश्चेत्ततः परो न भवति, स च नञ उत्तरो न भवति, स च नञ उत्तरो न भवति । अर्वतृ इति शब्दः । अतः ‘उगिदचां’ इति नुमागम । अर्वन्, अर्वन्तौ, अर्वन्तः .... ।

१३. पथिमथिऋभुक्षमात् (पा.सू. ७/१/८५)

अनु. सौ, अङ्गस्य ।

अर्थः पथिन् मथिन् ऋभुक्षिन् इत्येतेषामङ्गानां सौ परत आकारादेशो भवति ।

उदा. पन्थाः, मन्थाः, ऋभुक्षः ।

१४. इतोऽत् सर्वनामस्थाने (पा.सू. ७/१/८६)

अनु. पथिमथ्यृभुक्षाम्, अङ्गस्य ।

अर्थः पथिन्,मथिन्,ऋभुक्षिन् इत्येतेषामिकारस्य स्थाने अकारादेशो भवति सर्वनामस्थाने परतः

उदा. पन्थाः, मन्थाः, ऋभुक्षाः ।

१५. थोन्थोः (पा.सू. ७/१/८७)

अनु. सर्वनामस्थाने, पथिमथोः, अङ्गस्य ।

अर्थः पथिमथोस्थकारस्य स्थाने 'न्थ' इत्ययमादेशो भवति सर्वनामस्थाने परतः ।

उदा. पन्थाः, मन्थाः ।

१६. भस्य टेर्लोपः (७/१/८८)

अनु. पथिमथ्यृभुक्षाम्, अङ्गस्य ।

अर्थः पथ्यादीनां भसंज्ञकानां टेर्लोपो भवति ।

उदा. पथः, पथा, पथे ।

१७. अहन् (पा.सू. ८/२/६८)

अनु. रुः, पदस्य ।

अर्थः अहन् इत्येतस्य पदस्य रुर्भवति ।

उदा. अहोभ्याम्, अहोभिः ।

**स्वावलोकनप्रश्नाः**

१. हे राजन् ! इत्यत्र 'न'कारलोपनिषेधः केन सूत्रेण भवति ?

२. 'उगिदचां सर्वनामस्थाने' इति सूत्रेण किं भवति ?

३. 'थोन्थः' इति सूत्रेण किं क्रियते ?

४. 'मघवा बहुलम्' इति सूत्रेण किं भवति ?

५. 'सम्प्रसारणे परतः पूर्वस्य यणः संप्रसारणं न भवति इति केन सूत्रेण जायते ?

६. 'अहन्' इति सूत्रस्य कः अर्थः ?

## ९.१५. 'न'कारान्तशब्दरूपसिद्धिप्रदर्शनम्

१. राजन् = (नृपति:)

i. राजन् + सु

राजान् + सु = सर्वनामस्थाने चासम्बुद्धौ (पा.सू. ६/४/८) ।

राजान् + ( ) = हल्ङ्याब्भ्यो दीर्घात् (पा.सू. ६/१/६८) ।

राजा + ( ) + ( ) = न लोप: प्रातिपदिकान्तस्य (पा.सू. ८/२/७) ।

ii. राजानौ, राजान: । राजानम्, राजानौ इत्यस्य (राजन् प्रथमा द्वि./ब.व., द्वितीया एकव./ द्विवचनम्) । केवलं 'सर्वनामस्थान चासम्बुद्धौ' इति उपधादीर्घे विभक्तियोगे रूपसिद्धि:

iii. राज्ञ: = राजन् + शम्

रा ज् + न् + शस् = अल्लोपोऽन: (पा.सू. ६/४/१३४) ।

राज् + ञ् + शस् = स्तो: श्चुना श्चु: (पा.सू. ८/४/४०) ।

राज्ञ + अस्

राज्ञ: ।

iv. राज्ञा, राज्ञे, राज्ञ:, राज्ञो:, राज्ञाम्, राज्ञि इति सर्वत्र 'अल्लोपोऽन:' 'स्तो: श्चुना श्चु' इति सूत्रप्रवृत्त्या विभक्तियोगे रूपसिद्धि: ।

v. राजभ्याम् / राजभि: / राजभ्य:

राजन् + भ्याम् ।

राज + भ्याम् = न लोप: प्रातिपदिकान्तस्य (८/२७) ।

राजभ्याम् ।

प्रकृते 'न'लोपस्य 'न लोप: सुप्स्वरसंज्ञा' इति सूत्रेणासिद्धत्वात् 'सुपि च' इति सूत्रेण दीर्घकार्य्यम्, 'अतो भिस् ऐस्' इति ऐस्, 'बहुवचने झल्येत्' इत्यनेन एत्वम् इति न प्रवर्त्तते ।

vi राजनि राजन् + ङि 'न ङिसम्बुद्ध्यो: (पा.सू. ८/२/८) इत्यनेन

राजन् राजन् + सु 'न'कारस्य लोपो न भवति ।

२. यज्वन् (यज्ञकर्त्ता)

यज्वन्-शब्दस्य रूपसिद्धि: 'राजन्' इति वत् भवति केवलम् अजादिविभक्तौ तथा शम् विभक्तौ उपधास्थितस्य अकारस्य लोपो न भवति 'न संयोगाद्वमन्तात्' ६/४/१३७ । अत: विभक्तिकार्य्ये यज्वन:, यज्वना, यज्वने, यज्वनाम्, यज्वनि, यज्वनो:, यज्वसु इति रूपसिद्धि: । एवं ब्रह्मन्-शब्दस्य रूपसंघटनं बोधनीयं जायते ।

३. वृत्रहन् (इन्द्र:)

वृत्रहन् + सु = वृत्रहा ।

वृत्रहान् + सु = सौ च (६/४/१३)

वृत्रहान् + ( )

वृत्रहा + ( ) + ( ) = न लोप: प्रातिपदिकान्तस्य (८/२/७) ।

वृत्रहणौ  वृत्रहन् + औ / औट्

वृत्रहन् + औ = 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण प्राप्तस्य दीर्घकार्य्यस्य 'इन्हन्पूषार्यम्णां शौ' इति सूत्रेण निषेध: ।

वृत्रहण् + औ = हन्ते: (८/४/२२)

वृत्रहणौ ।

वृत्रघ्न:  वृत्रहन् + शस्

वृत्रह् + न् + शस् = अल्लोपोऽन: (६/४/१३४)

वृत्रघ् + न् + शन् = हो हन्तेर्ञ्णिन्नेषु (७/३/७४)

वृत्रघ्न् + अस्

वृत्रघ्नस् = वृत्रघ्न: ।

एवं सर्वत्र अजादिविभक्तौ वृत्रघ्ना, वृत्रघ्ने, वृत्रघ्नो:, वृत्रघ्नाम्, वृत्रघ्नि (विकल्पेन वृत्रहणि) इति रूपसिद्धि: । भ्याम् – भिस् – भ्यस् विभक्तौ राजन्शब्दवत् सिद्धं रूपं बोधनीयम् । वृत्रहभ्याम्, वृत्रहभ्य: इति ।

४. मघवन् = (इन्द्र:)

मघवा बहुलम् (पा.सू. ६/४/१२८) इति सूत्रेण विकल्पेन अन्तिमवर्णस्य 'न'कारस्य स्थाने 'तृ' इत्यादेश: मघवतृ इति शब्द: । 'भगवत्' शब्दवत् तस्य रूपम् ।

| | | |
|---|---|---|
| मघवान् | मघवन्तौ | मघवन्त: |
| मघवन्तम् | मघवन्तौ | मघवत: |
| मघवता | मघवद्भ्याम् | मघवद्भि: । |

मघवत् + सु

मघव नुम् + त् + सु = उगिदचां सर्वनामस्थानेऽधातो:

मघव + न + त् + सु

मघव + न् + त् + ( ) = ठल्ङयाब्भ

मघव + न् + ( ) = संयोगान्तस्य लोप:

मघवा + न् = सर्वनामस्थाने चासम्बुद्धौ

मघवा + ( ) = न लोप: प्रातिपदिकान्तस्य

मघवा ।

मघवन् इति शब्दस्य 'राजन्' इतिवद्रूपं शस्विभक्तौ अजादिविभक्तौ च 'श्वयुवमघोनामतद्धिते' इति सूत्रेण सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'आद् गुणः' इति गुणे विभक्तिकार्य्ये इष्टं रूपम् । मघोनः, मघोना, मघोने, मघोनः, मघोनोः, मघोनाम्, मघोनि इति ।

मघवन् + शस्

मघ् + अ + व् + अ + न् + शस्

मघ् + अ + अ + अ + अ + न् + शस् = श्वयुवमघोनामतद्धिते

मघ् + अ + उ + न् + शस् = सम्प्रसारणाच्च

मघ् + औ + न् + शस् = आद्गुणः

मघोन् + अस्

मघोनस् + मघोनः ।

एवं श्वन्-शब्दस्य युवन्शब्दस्य च रूपं बोधनीयं जायते । किन्तु युवन्शब्दस्य शस्विभक्तौ अजादिविभक्तौ च 'श्वयुवमघोनामतद्धिते' इति सूत्रेण सम्प्रसारणादनन्तरं यदा पुनः 'य'कारस्य सम्प्रसारणं प्राप्नोति तदा 'न सम्प्रसारणे सम्प्रसारणम्' (पा.सू. ६/१/३७) इति सूत्रेण निषेधः ।

५. अर्वन् = (अश्वः)

अर्वन् शब्दस्य प्रथमाविभक्तेरेकवचनं विहाय अन्यत्र विभक्तौ 'अर्वणस्त्रसावनञः' 'तृ' इत्यादेशो भवति । अतः प्रथमाविभक्तेरेकवचने 'राजन्' इति शब्दवद्रूपम् अर्वा अन्यत्र (मघवन्) = मघवतृ इति वद्रूपम् ।

६. पथिन् = (मार्गः)

पथिन् शब्दस्य रूपसिद्धये इमानि सूत्राणि प्रवर्त्तन्ते

१. पथिमथ्यृभुक्षामात् (पा.सू. ७/१/८५) आकारः अन्तादेशः ।
२. इतोऽसर्वनामस्थाने (पा.सू. ७/१/८६) इकारस्याकारः ।
३. थोन्थः (पा.सू. ७/१/८७) थकारस्य स्थाने 'न्थ' आदेशः ।
४. भस्य टेर्लोपः (पा.सू. ७/१/८८) टिलोपः ।

पथिन् + सु = पन्थाः

पथिन् + सु

पथि + आ + सु = पथिमथ्यृभुक्षामात् (७/१/८५)

प + थ् + आ + सु = इतोऽसर्वनामस्थाने (७/१/८६)

प + न्थ् + आ + आ + सु = थोन्थः (७/१/८७)

प + न्थ् + आ + सु = अकः सवर्णे दीर्घः (६/१/१०१)

पन्थान् = पन्था: ।

पथिन् शब्दस्य शस्विभक्तौ अजादिविभक्तौ च पथ:, पथा, पथे, पथ:, पथो:, पथाम्, पथि इति रूपम् ।

पथिन् + शस्

पथ् + इन् + शस्

पथ् + ( ) + शस् = भस्य टेलोप: (७/१/८८)

पथस + अस्

= पथस् = पथ:

भ्याम्-भिस्-भ्यस्विभक्तौ केवलं 'न लोप: प्रातिपदिकान्तस्य' इति 'न'कारलोपे पभिभ्याम्, पथिभि:, पथिभ्य: इति रूपसिद्धि: । मथिन्-शब्दस्य पथिन् इतिवद्रूपम् ।

**'न'कारान्तहलन्तनपुंसकलिङ्गशब्दरूपसाधनम्**

१. अहन्

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | अह: | अह्नी / अहनी | अहानि |
| द्वितीया | अह: | अह्नी / अहनी | अहानि |
| तृतीया | अह्ना | अहोभ्याम् | अहोभि: । |

अहन् + सु

अहन् + ( ) = स्वमोर्नपुंसकात्

अह रु = अहन्

अहर् = अह:

अहानि

अहन् + जस्

अहन् + शि = जस्शसो: शि

अहन + इ

अ हा न् + इ = सर्वनामस्थाने च अहानि ।

अह्नी / अहनी =

अहन् + औ / औट्

अहन् + शी = औङ: शी

अ ह् + न् + शी = विभाषा ङिभ्यो:

अह्नी / अहनी ।

अहोभ्याम् .......

अहन् + भ्याम्

अह रु + भ्याम् = अहन्

अह र् + भ्याम्

अ ह उ + भ्याम् = हशि च

अहोभ्याम् ।

| | | | | |
|---|---|---|---|---|
| एवं | दण्डिन् | दण्डि | दण्डिनी | दण्डीनि |
| | स्रग्विन् | स्रग्वि | स्रग्विणी | स्रग्वीणि |
| | सुपथिन् | सुपथि | सुपथिनी | सुपथीनि । |

**बोधप्रश्नाः**

१. राजन् शब्दस्य द्वितीयाविभक्तेः बहुवचने किं रूपम् ?

२. राजनि इति रूपसिद्धये 'न%'लोपवारणं केन सूत्रेण जायते ?

३. वृत्रघ्नः इति कस्यां विभक्तौ रूपम् ?

४. मघवन्शब्दस्य प्रथमाविभक्तेरेकवचने किं रूपद्वयम् ?

५. 'पन्थाः' इति सिद्धये आकारादेशविधायकं सूत्रद्वयं किम् ?

६. 'अहन्' शब्दस्य प्रथमाद्विवचने किं रूपद्वयम् ?

## ९.१६. हलन्तप्रकरणे 'ज'कारान्तशब्दाः

'ज'कारः अन्ते यस्य स जकारान्तः । जकारान्तश्चासौ शब्दः जकारान्तशब्दः । यस्य शब्दस्य अन्ते 'ज'कारो विद्यते । यस्य शब्दस्य अन्तिमो वर्णः जकारः पुँल्लिङ्गे क्लीवलिङ्गे तस्य शब्दस्य प्रयोगः प्राप्यते । स्त्रीलिङ्गे असौ शब्दः न प्राप्यते ।

१. 'ज'कारान्तहलन्तपुँल्लिङ्गशब्दाः ऋत्विज्, युज्, सुयुज्, खञ्ज्, राज्, विभ्राज्, परिव्राज्, विश्वराज्, भ्रस्ज् ।

२. 'ज'कारान्तहलन्तस्त्रीलिङ्गशब्दाः

३. 'ज'कारान्तहलन्तक्लीवलिङ्गशब्दाः ऊर्ज ।

**बोधप्रश्नाः**

१. 'ज'कारान्तशब्दः इत्यस्य किं विग्रहवाक्यम् ?

२. 'विश्वराज्'शब्दस्य कस्मिन् लिङ्गे व्यवहारः ?

३. 'ज'कारान्तहलन्तशब्दाः व्यवहारे सन्ति न वा ?

४. 'ज'कारान्तहलन्तक्लीवलिङ्गशब्दस्य उदाहरणं देयम् ?

## ९.१७. 'ज'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

स्वादिषु सप्तसु विभक्तिषु 'ज'कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन कौमुद्यां मुख्यतया अष्टौ सूत्राणि सन्ति ।

१. ऋत्विगसदधृक् ....... (३/२/५९)
२. कृदतिङ्स (३/१/९३)
३. वेरपृक्तस्य (पा.सू. ६/१/६७)
४. क्विन्प्रत्ययस्य कुः (पा.सू. ८/२/६२)
५. युजेरसमासे (पा.सू. ७/१/७१)
६. चो.कुः (पा.सू. ८/२/३०)
७. विश्वस्य वसुराटोः (पा.सू. ६/३/१२८)
८. स्कोः संयोगाद्योरन्ते च (पा.सू. ८/२/२९)

एषु 'ऋत्विगदधृक्' इति कृत्प्रक्रियायां क्विन्प्रत्ययविधायकं सूत्रम् । 'कृदतिङ्' इति कृत्संज्ञाविधायकं सूत्रम् । 'वेरपृक्तस्य' इति क्विन्प्रत्ययघटकस्य 'वि' इत्यस्य लोपविधायकं सूत्रम् । पञ्चसूत्राणि सन्ति यैः रूपसाधनं प्रतिपद्यते ।

**स्वावलोकनप्रश्नाः**

१. जकारान्तशब्दानां रूपसाधने कति सूत्राणि सन्ति ?

२. कृत् संज्ञा केन सूत्रेण जायते ?

३. 'युजे .....' । शून्यस्थानं पूरयत ?

४. 'चोः .....' । शून्यस्थानं पूरयत ?

## ९.१८. सूत्रोक्तपारिभाषिकशब्दाः

एषु सूत्रेषु द्वयोः सूत्रयोः पारिभाषिकं पदं विद्यते ।

१. कृत् धातोरित्यधिकारे विधीयमानाः तिङ्भिन्नाः प्रत्ययाः कृत्संज्ञकाः भवन्ति । क्त, क्तवतु, शतृ, शानच्, क्विप्, क्विन् प्रभृतयः प्रत्ययाः ।

२. अपृक्तम् अपृक्तम् इति एका संज्ञा । 'अपृक्त एकाल् प्रत्ययः' (पा.सू. १/२/४१) इति सूत्रेण विधीयते । एक अल्मात्र वर्णः यत्र विद्यते स अपृक्तसंज्ञको भवति ।
उदा. वाक् ...... ।

**बोधप्रश्नाः**

१. किं नाम कृत् ?

२. अपृक्तसंज्ञाविधायकं सूत्रं किम् ?

## ९.१९. सूत्राणामर्थावगमनम्

१. ऋत्विक्दधृक् .... (पा.सू. ३/२/५९)

अर्थः ऋत्विक्, दधृक्, स्रक्, दिक्, उष्णिक् इत्येते पञ्चशब्दाः क्विन्प्रत्ययान्ताः निपात्यन्ते । ऋतु + युज् + क्विन् = ऋत्विक् इत्यादयः ।

२. कृदतिङ् (३/१/९३)

अर्थः धातोरित्यधिकारे विधीयमानाः तिङ्भिन्नाः प्रत्ययाः कृत्संज्ञका भवन्ति ।

३. वेरपृक्तस्य (६/१/६३)

अर्थः अपृक्तस्य वेः लोपो भवति ।

४. क्विन्प्रत्ययस्य कुः (पा.सू. ८/२/६२)

अनु. पदस्य

अर्थः क्विन्प्रत्ययस्य पदस्य कवर्गादेशो भवति ।

५. युजेरसमासे (पा.सू. ७/१/७१)

अनु. सर्वनामस्थाने, नुम्, अङ्गस्य ।

अर्थः युजेरङ्गस्यासमासे सर्वनामस्थाने परतो नुमागमो भवति ।

उदा. युङ्, युञ्जौ, युञ्जः ।

६. चोः कुः (पा.सू. ८/२/३०)

अनु. झलि, अन्ते, पदस्य ।

अर्थः च वर्गस्य स्थाने कवर्गादेशो भवति झलि परतः पदान्ते च ।

उदा. पक्तुम्, वक्तुम्, वक्तव्यम् ।

७. विश्वस्य वसुराटो (पा.सू. ६/३/१२८)

अनु. पूर्वस्य दीर्घोऽणः, उत्तरपदे, संहितायाम् ।

अर्थः विश्व इत्येतस्य वसुराट् इत्येतयोरुत्तरपदयोः दीर्घो भवति ।

उदा. विश्वावसुः, विश्वाराट् ।

८. स्कोः संयोगाद्योरन्ते च (पा.सू. ८/२/२९)

अनु. झलि, लोप:, पदस्य ।

अर्थ: पदान्ते झलि च परतो य: संयोगस्तदाद्यो: सकारकारयो: लोपो भवति ।

**स्वावलोकनप्रश्नाः**

१. कृदतिङ् इति सूत्रेण किं भवति ?

२. अपृक्तसंज्ञकस्य वे: लोप: केन सूत्रेण जायते ?

३. 'चो: कु:' इति सूत्रेण किं भवति ?

४. 'विश्व + वसु' इत्यत्र सिद्धं रूपं किम् ?

५. युजेरङ्गस्य कुत्र निमित्ते नुमागमो भवति ?

## ९.२०. 'ज'कारान्तहलन्तशब्दरूपसाधनप्रकार:

ऋत्विज् युज्-प्रभृतय: शब्दा: क्विन्प्रत्ययेन सिद्धा: ।

ऋत्विज् ऋत्विक् ऋत्विजौ ऋत्विज: ।

ऋत्विज् + सु

ऋत्विज् + ( ) हल्ङ्या

ऋत्वग् = चो: कु: (८/२/३०)

ऋत्विक् = खरि च ।

युज् युङ् युञ्जौ युञ्ज: ।

युज् + सु

यु + नुम् + ज् + सु = युजेरसमासे (पा.सू. ७/१/७१)

यु + न् + ज् + सु

यु + न् + ज् = हल्ङ्यादि

यु + न् + ( ) = संयोगान्तस्य लोप:

यु + ङ् = क्विन्प्रत्ययस्य कु: ।

खञ्ज खञ्ज् खञ्जौ खञ्ज: ।

खञ् + ज् + ( ) = हल्ङ्यादि

खञ् + ( ) = संयोगान्तस्य लोप:

खन् = अकृतव्यूहाः पाणिनीयाः इति परिभाषया पूर्वं परसवर्णकार्य्यं
न । अथवा कृतस्य कार्य्यस्य निवृत्तिः, निमित्तस्यापाये
नैमित्तिकस्याप्यपायः ।

राज्, विभ्राज्, परिव्राज्, विश्वराज्

राज् राट् राजौ राजः ।

राज् + सु

राज् + ( ) = हल्ङ्यादि ....

राष् = व्रश्चभ्रस्जसृज्मृज् .....

राड् = झलां जशोऽन्ते

राट् = वाऽवसाने (विकल्पेन चर्त्वम्)

राट् / राड्

सप्तमीबहुवचने

राज् + सुप्

राज् + सु

राष् + सु = व्रश्चभ्रस्जसृजमृज्

राड् + सु = झलां जशोऽन्ते

राड् + धुट् + सु = डः सि धुट् (विकल्पेन धुट्)

राड् + ध् + सु

राट्त्सु / राट्सु

विश्वराज् विश्वराट् विश्वराजौ विश्वराजः

विश्वराज् + सु

विश्वराज् + ( ) = विश्वस्य राटः (६/३/१२८)

विश्वराष् = व्रश्वभ्रस्ज्

विश्वाराड् = झलां जशोऽन्ते

विश्वाराट् = वाऽवसारे (विकल्पेन चर्त्वम्)

विश्वाराट् / विश्वाराड् ।

ऊर्ज नपुंसकलिङ्गे ऊर्क / ऊर्ग ऊर्जी उनर्जि

ऊनर्जि = ऊर्ज + जस् । अत्र 'जशशसोः शिः', झलन्तत्वान्नुम् = ऊनर्जि ।

## ९.२१. सारांशः

अस्मिन् खण्डे 'ह'–'व'–'न'–'ज'–कारान्तहलन्तशब्दानां रूपसंविज्ञानं वयं जानीमः । तदर्थं पाणिनीयसूत्राणि यानि उपस्थापितानि सन्ति तेषां सर्वेषामुपपादनम्, सूत्राणामर्थावगमनं, सूत्रोक्ताः

पारिभाषिकशब्दाः, इत्यधिगतवन्तः । समानशब्दानां विभिन्नासु विभक्तिषु कथं रूपसाधने व्यतिक्रमः तत् सर्वं ज्ञातवन्तः ।

## ९.२२. आदर्शप्रश्नाः

**I. निबन्धात्मकाः प्रश्नाः** १५

१. 'राजन्'शब्दस्य सप्तसु विभक्तिसु रूपलिखप्रकारं प्रदर्शयत ?

२. केषाञ्चित् त्रयाणां सूत्राणां व्याख्यानं कुरुत ?

दादेर्धातोर्घः, दिवउत्, मघवा बहुलम्, थोन्थः, चोः कुः ।

३. विश्वाराट्, मघोनः, पथि, सुद्यौः, यूनः, धुक्षुः, इत्येतेषां निष्पत्तिप्रकारं ससूत्रं प्रदर्शयत?

**II. विश्लेषणात्मकाः प्रश्ना**

१. हकारान्ताः हलन्तशब्दाः ।

२. लिट्, लिट्त्सु इति पदयोः साधनप्रकारमुपपादयत ?

३. विश्वौह, राज्ञः इति पदयोः साधनप्रकारमुपपादयत ?

४. उपानत्, अनडुद्भ्याम्, इति पदयोः साधनप्रकारमुपपादयत ?

५. 'न ङिसम्बुध्योः' इति सूत्रस्याशयं विलिख्य तदनुसारं प्रयोगं साधयत ?

६. वृत्रहन् शब्दस्य द्वितीयाबहुवचने किं रूपं तत् प्रदर्श्य साधनप्रकारं ससूत्रं लिखत ?

७. 'पथिमथ्यृभुक्षामात्' इति सूत्रस्याशयं विलिख्य रूपसाधनं प्रदर्शयत् ?

**III. लघुप्रश्नाः**

१. 'न'कारान्तशब्द इति नामकरणं स्पष्टी कुरुत ?

२. सम्प्रसारणं किम् ?

३. सर्वनामस्थानं किम् ?

४. 'दिव औत्' इति सूत्रेण विधीयमानस्य औत्-आदेशस्य कथं सर्वादेशता न ?

५. 'श्वयुवमघोनामतद्धिते' इति सूत्रेण सम्प्रसारणं कस्य जायते ?

६. 'अहन्' इति सूत्रस्याशयं लिखत ?

७. किं नाम अपृक्तम् ?

८. कृत्संज्ञा कस्य भवति ?

**IV. एकाङ्कप्रश्नाः**

१. हलन्तप्रकरणे 'ह'कारान्तशब्दः कथमादावुपदिष्टः ?

२. 'उपानह' इति शब्दः कस्मिन् लिङ्गे वर्त्तते ?

३. '......... ऊठ्' इति सूत्रे शून्यस्थानानि पूरयत ?

४. भष्प्रत्याहारे के वर्णाः सन्ति ?

५. अनडुह्शब्दस्य प्रथमैकवचने किं रूपम् ?
६. 'व'कारान्तहलन्तशब्दानां रूपसाधने कौमुद्यां कति मुख्यसूत्राणि सन्ति ?
७. 'दिव उत्' इत्यत्र तकारः किमर्थः ?
८. 'अहन्'शब्दस्य कस्मिन् लिङ्गे व्यवहारः ?
९. 'न सम्प्रसारणे ......' । शून्यं स्थानं पूरयत ?
१०. 'उगिदचां सर्वनामस्थाने' इति सूत्रेण किं भवति ?
११. राजन्-शब्दस्य सप्तम्येकवचने किं रूपद्वयम् ?
१२. 'विश्व + वसु' इत्यत्र सिद्धं रूपं किम् ?
१३. 'हो ढः' इति सूत्रेण किं भवति ?
१४. कस्य सम्बुद्धिसंज्ञा जायते ?
१५. तुरासाह् शब्दस्य कोऽर्थः ?

## ९.२३. एकाङ्कप्रश्नानामुत्तराणि

१. वर्णोपदेशे 'हयवरट्' प्रथमं सूत्रम् २. स्त्रीलिङ्गे ३. वाह ४. भ, घ, ढ, ध ५. अनडवान् ६. द्वयम् ७. स्वसवर्णग्राहक ८. नपुंसक ९. सम्प्रसारणम् १०. नुमागमः ११. राज्ञि १२. विश्वावसुः १३. ढकारादेशः १४. एकवचनं १५. इन्द्रः ।

********

# ।। दशमखण्डः ।।

## ‘त’–‘द’–‘च’–‘प’–‘र’–‘श’–‘ष’–‘स’– कारान्तहलन्तशब्दानां संविज्ञानं साधनप्रकारश्च

### १०.१. प्रस्तावना

अन्तिमं वर्णमादाय शब्दस्य विभाजनप्रकार इति प्रक्रियात्मके कार्य्ये कश्चन उपाय: । तत्र पुन: विभाजने लिङ्गव्यवस्था । एतदेवादाय हलन्तशब्दानां पदसंघटनविधौ ‘त’–‘द’–‘च’–‘प’–‘र’–‘श’–‘ष’–‘स’– कारान्तहलन्तशब्दानां विभिन्नासु विभक्तिषु पदनिष्पत्तिव्यवस्था विदिता जायते । किन्तु एतद्विधानां सर्वेषां शब्दानां सर्वत्र लिङ्गे विद्यमानता न लक्ष्यते । व्यवहारविज्ञानं तस्य कृते कारणम् । प्रकृतखण्डे इमे शब्दा: अनुशासनविधौ विदिता: भवन्ति

१. ‘त’कारान्त:

पु. महत्, धीमत्, भवत्, ददत्, जक्षत्, जाग्रत्, दरिद्रत्, शासत् ।

स्त्री. ।

क्ली. शकृत्, ददत्, तुदत्, पचत्, दीव्यत् ।

२. ‘द’कारान्त:

पु. सुपाद्, सुहृद् ।

स्त्री. विपद् ।

क्ली. ।

३. ‘चकारान्त:’

पु. प्राञ्च्, प्रत्यञ्च, उदञ्च, सम्यञ्च, तिर्य्यञ्च ।

स्त्री. वाच् ।

क्ली.

४. ‘प’कारान्त:

पु. गुप् ।

स्त्री. अप् ।

क्ली. स्वप् ।

५. ‘र’कारान्त:

पु. ।

स्त्री. गिर्, पुर् ।

क्ली. वार् ।

६. 'श'कारान्तः

पु. तादृश्, नश्, धृतस्पृश् ।

स्त्री. दिश्, दृश् ।

क्ली. ।

७. 'ष'कारान्तः

पु. दधृष्, रत्नमुष्, पिपठिष्, चिकीर्ष ।

स्त्री. त्वष्, सजुष्, आशिष् ।

क्ली. धनुष्, चक्षुष् ।

८. 'स'कारान्तः

पु. पुम्स्, विद्वस्, उशनस्, अनेहम्, वेधस् ।

स्त्री. ।

क्ली. पयस्, सुपुम्स् ।

एतेषां शब्दानां रूपसाधनाय कौमुद्यां ३७ संख्याकानि पाणिनीयानि सूत्राणि वर्त्तन्त ।

## १०.२. उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- हलन्तप्रकरणे 'त'कारान्तपुँल्लिङ्गनपुंसकलिङ्गशब्दान् अवगमिष्यामः ।
- 'त'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि प्राप्स्यामः ।
- सूत्रोक्तपारिभाषिकशब्दान् जानीमः ।
- सूत्राणामर्थपरिकल्पनं ज्ञास्यन्ति ।
- सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्मः ।
- हलन्तप्रकरणे 'च'कारान्तपुँल्लिङ्गस्त्रीलिङ्गशब्दान् अवगमिष्यामः ।
- 'च'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि प्राप्स्यामः ।
- सूत्रोक्तपारिभाषिकशब्दान् जानीमः ।
- सूत्राणामर्थपरिकल्पनं ज्ञास्यान्ति ।
- सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्मः ।
- हलन्तप्रकरणे परकारान्तपुँल्लिङ्ग-स्त्रीलिङ्ग-क्लीवलिङ्गशब्दान् अवगमिष्यामः ।
- 'प'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि प्राप्स्यामः ।
- सूत्रोक्तपारिभाषिकशब्दान् जानीमः ।
- सूत्राणामर्थपरिकल्पनं ज्ञास्यन्ति ।
- सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्मः ।

. हलन्तप्रकरणे 'र'कारान्तस्त्रीलिङ्गक्लीवलिङ्गशब्दान् अवगमिष्यामः ।
. 'र'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि प्राप्स्यामः ।
. सूत्रोक्तपारिभाषिकशब्दान् जानीमः ।
. सूत्राणामर्थपरिकल्पनं ज्ञास्यन्ति ।
. सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्मः ।
. हलन्तप्रकरणे 'श'कारान्त पुँल्लिङ्गस्त्रीलिङ्गशब्दान् अवगमिष्यामः ।
. 'श'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि प्राप्स्यामः ।
. सूत्रोक्तपारिभाषिकशब्दान् जानीमः ।
. सूत्राणामर्थपरिकल्पनं ज्ञास्यन्ति ।
. सूत्रद्वारा लक्ष्यसिद्धिं विषयीकूर्मः ।
. हलन्तप्रकरणे 'ष'कारान्त पुँल्लिङ्-स्त्रीलिङ्ग-क्लीवलिङ्गशब्दान् अवगमिष्यामः ।
. 'ष'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि प्राप्स्यामः ।
. सूत्रोक्तपारिभाषिकशब्दान् जानीमः ।
. सूत्राणामर्थपरिकल्पनं ज्ञास्यन्ति ।
. सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्मः ।
. हलन्तप्रकरणे 'स'कारान्तपुँल्लिङ्ग क्लीवलिङ्गशब्दान् अवगमिष्यामः ।
. 'स'कारान्तशब्दरूपसाधनोद्दिष्टनि पाणिनीयसूत्राणि प्राप्स्यामः ।
. सूत्रोक्तपारिभाषिकशब्दान् जानीमः ।
. सूत्राणामर्थपरिकल्पनं ज्ञास्यन्ति ।
. सूत्रद्वारा लक्ष्यसिद्धिं विषयीकुर्मः ।

## १०.३. हलन्तप्रकरणे 'त'कारान्तशब्दाः

'त'कारः अन्ते यस्य स तकारान्तः । तकारान्तश्चासौ शब्दः तकारान्तशब्दः यस्य शब्दस्य अन्त्ये तकारो विद्यते । यस्य शब्दस्य अन्तिमो वर्णः 'त'कारः । पुँल्लिङ्-क्लिवलिङ्गभावेन तस्य शब्दस्य विभाजनद्वयम् । स्त्रीलिङ्गे तकारान्तशब्दस्य व्यवहारो न दृश्यते । इमे ते शब्दाः विदिताः भवनित ।

१. 'त'कारान्तहलन्तपुँल्लिङ्गशब्दाः महत्, धीमत्, भवत्, ददत्, जक्षत्, जाग्रत्, दद्रित्, शावत् ।

२. 'त'कारान्तहलन्तस्त्रीलिङ्गशब्दाः ।

## १०.४. 'त'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

'त'कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन सप्त संख्याकानि सूत्राणि कोमुद्यां वर्त्तन्ते ।

१. अत्वसन्तस्य चाधातो (पा.सू. ६/४/१४) ।

२. उभेऽभ्यस्तम् (६/१/५) ।

३. नाभ्यस्ताच्छतुः (पा.सू. ७/१/७८) ।
४. जक्षित्यादयः षट् (पा.सू. ६/१/६) ।
५. वा नपुंसकस्य (पा.सू. ७/१/७९) ।
६. आच्छीनद्यार्नुम् (पा.सू. ७/१/८०) ।
७. शप्श्यनोर्नित्यम् (पा.सू. ७/१/८१) ।

**स्वावलोकनप्रश्नाः**

१. 'त'कारान्तहलन्तशब्दरूपसाधने कति संख्याकानि पाणिनीयानि सूत्राणि वर्त्तन्ते ?

२. ''अत्वसन्तस्य ......' इति शून्यस्थानं पूरयत ?

३. ''जक्षित्यादयः ........ ' इति शून्यस्थानं पूरयत ?

४. ''........ श्यनोर्नित्यम्'' इति शून्यस्थानं पूरयत ?

## १०.५. सूत्रोक्ताः पारिभाषिकशब्दाः

'त'कारान्तहलन्तशब्दरूपसाधनोद्देश्येन सप्त (०७) सूत्राणि वर्त्तन्ते । तेषु सूत्रेषु एक एव पारिभाषिकशब्दो विद्यते, अभ्यस्तम् ।

**अभ्यस्तम्**

प्रकृते सूत्रद्वयेन अभ्यस्तसंज्ञा विधीयते ।

'उभेऽभ्यस्तम्' (पा.सू.६/१/५) , 'जक्षित्यादयः षट्' (पा.सू.६/१/६) इति ।

'उभेऽभ्यस्तम्' अष्टाध्याय्याः षष्ठाध्याये द्वित्वप्रकरणे द्वित्वकार्य्यं सम्पादितं विद्यते । तत्र ये द्वे विहिते, उभे समुदिते अभ्यस्तसंज्ञे स्तः । ददाति इति रूपसिध्यर्थं दा + दा + ति इति दा इत्यस्य द्वित्वं विहितं तदुभयमभ्यस्तसंज्ञा भवति । एवञ्च 'जक्षित्यादयः षट् (६/१/६) इति सूत्रेणापि अभ्यस्तसंज्ञा विचारिता भवति । जक्ष इति धातुः । एवमन्ये ये षट् धातवः सन्ति जाग्रति, दरिद्रति, चकासति, शासति, दीध्यते, वेव्यते एतेषाम् अभ्यस्तसंज्ञा विधीयते । नुम् इति निषेधः तस्याः संज्ञायाःफलम् ।

**शप्**

शप् इति विकरणः । श् + अ + प् = शप् । एतस्मात् अ इति अवशिष्यते । 'कर्त्तरि शप्' इति तद्विधायकं सूत्रम् ।

**श्यन्**

श्यन् इति विकरणः । श् + य + न् = श्यन् । एतस्मात् 'य' इति अवशिष्यते । 'दिवादिभ्यः श्यन्' इति तद्विधायकं सूत्रम् ।

**स्वावलोकनप्रश्नाः**

१. किं नाम अभ्यस्तम् ?

२. 'जक्षित्यादयः षट्' इति सूत्रस्थ षट्पदेन केषां षण्णां ग्रहणम् ?

३. 'श्यन्' इति कथनेन कस्य ग्रहणम् ?

## १०.६. सूत्राणामर्थावगमनम्

१. अत्वसन्तस्य चाधातोः (पा.सू. ६/४/१४)

अत्वसन्तस्य, च, अधातोः इति त्रीणि पदानि । अतुश्च अश्च अत्वसौ तौ अन्ते यस्य स अत्वसन्तः तस्य = अत्वसन्तस्य । न धातुः = अधातुः तस्य अधातोः । अनु. सौ, असम्बुद्धौ, उपधायाः, अङ्गस्य, दीर्घः । अर्थः धातुभिन्नस्य अत्वन्तस्य असन्तस्य च अङ्गस्योपधायाः यौ सम्बुद्धौ परतो दीर्घो भवति । उदा. अतु = भवत् = भवान्, कृतवत् = कृतवान्, गोमत् = गोमान् । असन्तस्य = सुपयाः, सुयशाः, सुस्रोताः ।

२. उभेऽभ्यस्तम् (पा.सू. ६/१/५)

उभे, अभ्यस्तम् इति पदद्वयम् । इदं संज्ञाविधायकं सूत्रम् । अभ्यस्तसंज्ञाविधीयते । अष्टाध्याय्याः षष्ठाध्याये यत् द्वित्वं विधीयते ते उभे समुदिते अभ्यस्तसंज्ञे भवतः । उदा. दा + लट् (तिप्), दा + दा + ति = अत्र दा + दा इति अभ्यस्तसंज्ञा ।

३. नाभ्यस्ताच्छतुः (पा.सू.७/१/७८)

न, अभ्यस्तात्, शतुः इति त्रीणि पदानि वर्त्तन्ते । अनु = नुम्, अङ्गस्य । अर्थः अभ्यस्तादङ्गादुत्तरस्य शतुर्नुम् न भवति । 'उगिदचां सर्वनामस्थानेऽधातोः' इति सूत्रेण नुमागमः प्राप्नोति । तस्य अनेन सूत्रेण निषेधः क्रियते । उदा. दा = ददत् । अत्र 'जक्षित्यादयः षट्' इति सूत्रेण अभ्यस्तसंज्ञा ।

४. जक्षित्यादयः षट् (पा.सू.६/१/६)

जक्ष, इत्यादयः, षट् इति त्रीणि पदानि सन्ति । जक्ष् इति अविभक्तिकनिर्देशः इति आदि येषां ते = इत्यादयः । अभ्यस्तम् इति पदस्यानुवृत्तिः । अतः जक्ष इति धातुः । अन्ये ये षट् धातवः अभ्यस्तसंज्ञकाः भवन्ति । जगति, दरिद्रति, चकासति, शासति, दीध्यते, वेव्यते इति इमे षट् धातवः । अभ्यस्तसंज्ञायाः फलन्तु 'नाभ्यस्ताच्छतुः' इति सूत्रेण नुमः निषेधः ।

५. वा नपुंसकस्य (पा.सू.७/१/७९)

वा, नपुंसकस्य इति पदद्वयम् । अनु. अभ्यस्ताच्छतुः, नुम्, अङ्गस्य अर्थः अभ्यस्तात् अङ्गात् उत्तरो यः शतृप्रत्ययः तदन्तस्य नपुंसकस्य वा नुमागमो भवति । उदा. ददति कुलानि, ददन्ति कुलानि ।

६. आच्छीनद्योर्नुम् (पा.सू. ७/१/८०)

आत्, शीनद्योः, नुम् इति त्रीणि पदानि वर्त्तन्ते । अनु. वा, नुम्, शतुः, अङ्गस्य । अर्थः अवर्णान्तादङ्गादुत्तरस्य शतुर्वा नुमागमो भवति शीनद्योः परतः । उदा. तुदती कुले, तुदन्ती कुले, तुदती ब्राह्मणी, तुदन्ती ब्राह्मणी ।

७. शप्श्यनोर्नित्यम् (पा.सू.७/१/८१)

शप्श्यनोः, नित्यम् इति पदद्वयम् । शप् च श्यन् च तयोः । अनु. शीनद्योः, शतुः, नुम्, अङ्गस्य । अर्थः शप्श्यन् इत्येतयोः शतुः शीनद्योः परतो नित्यं नुमागमो भवति । उदा. दीव्यन्ती कुले, पचन्ती कुले । पचन्ती ब्राह्मणी, दिव्यन्ती ब्राह्मणी ।

**स्वावलोकनप्रश्नाः**

१. 'अत्वसन्तस्य चाधातोः' इति सूत्रेण किं भवति ?

२. 'जक्षित्यादः षट्' इति सूत्रे 'इत्यादयः' पदस्य का व्युत्पत्तिः ?

३. 'शप्श्यनोर्नित्यम्' इति सूत्रेण किं क्रियते ?

४. अभ्यस्तसंज्ञायाः फलं किम् ?

## १०.७. लक्ष्यसिद्धिः

हलन्तप्रकरणे 'त'कारान्तपुँल्लिङ्गशब्दानां महत्, धीमत्, भवत्, ददत्, जक्षत्, जाग्रत्, दरिद्रत्, शांसत् इत्येतेषां शब्दानां मध्ये महत्, धीमत् भवत् इति शब्दानां सर्वासु विभक्तिषु एकरूपता विद्यते । केवलं प्रथमाविभक्तेरेकवचने नुमागमे दीर्घकार्य्ये महान्, धीमान्, भवान् इति रूपम् । अन्यत्र सर्वत्र विभक्तौ 'त'कारान्तशब्दानां विभक्तियोगात् इष्टं रूपम् ।

महत् + सु = महान्
महात् + सु = अत्वसन्तस्य चाधातोः (पा.सू.६/४/१४)
महात् + सु
= महा + नुम् + त् + सु = उगिदचां सर्वनामस्थानेऽधातोः
= महा + न् + त् + सु

= महा + न् + त् + ( ) = हल्ङ्यादि

= महान् = संयोगान्तस्य लोप: (पा.सू. ... )

एवं 'धीमत्'शब्दस्य 'भवत्'शब्दस्य च सुब्विभक्तौ रूपं बोधनीयम् । प्रकृते नुम्कार्य्यं परभूतं नित्यञ्च । तथापि वचनसामर्थ्यात् पूर्वं दीर्घकार्य्यं ततश्च नुमागमकार्य्यम् । सम्बोधने तु दीर्घकार्य्याभावात् केवलं नुमागमकार्य्ये हे महन् ! इति रूपम् ।

ददत्, जक्षत्, जाग्रत्, दरिद्रत्, शासत् इति शब्दानां तु प्रथमाविभक्तेरेकवचने जक्षत्/जक्षद् इति रूपसिद्धि: । अत्र 'नाभ्यस्ताच्छतु' इति सूत्रेण नुमागमो न जायते । 'जक्षित्यादय: षट्' इति सूत्रेण अभ्यस्तसंज्ञा । हे महत् ! इति रूपम् ।

**'त'कारान्तनपुंसकलिङ्गशब्दा:**

शकृत्, ददत्, तुदत्, पचत्, दीव्यत् इत्येते शब्दा: । शकृत्, ददत् शब्दयो: प्रथमा-द्वितीयाविभक्ते: द्विवचने शकृती/ददती बहुवचने ददन्ति/ददति इति रूपम् तुदत्, पचत्, दीव्यत् इत्येतेषां शब्दानां मध्ये तुदत् शब्दस्य तुदन्ती/तुदती इति रूपम् पचत्-दीव्यत् इत्यनयो: पचन्ती दीव्यन्ती पचन्ति/दीव्यन्ति इति रूपम् ।

ददन्ती = ददत् + औ

= ददत् + शी

= ददत् + शी = 'नाभ्यस्ताच्छतु:' इति नुम्निषेध: ।

= ददत् + ई

= ददती ।

ददन्ति = ददत् + जस्

ददत् + शि = जश्शसो: शि

दद् + नुम् + त् + शि = वा नपुंसकस्य (७/१/७९)

दद + न् + त् + इ

ददन्ति ।

नुमागमाभावपक्षे तु ददति इति रूपम् ।

दीव्यत् दीव्यन्ती, दीव्यन्ति

दीव्यत् + औ

दीव्यत् + शी

दीव्य + नुम् + त + शी = शप्श्यनोर्नित्यम् (पा.सू.७/१/८१)

दीव्य + न् + त् + इ

दीव्यन्ती ।

एवं दीव्यत् + जस् / शस् = दीव्यन्ति इति बोधनीयम् ।

तुदत्　　तुदन्ती, तुदन्ति

तुदत् + औ

तुदत् + शी

तुद् + नुम् + त् + शी = आच्छीनद्यार्नुम् (पा.सू.७/१/८०)

तुद् + न्+ त् + ई

तुदन्ती ।

नुमागमाभावपक्षे तु 'तुदन्ती' इति रूपम् ।

**स्वावलोकनप्रश्नाः**

१. महान् इति रूपसिद्धौ दीघकार्य्यनुमागमयोः कस्य पूर्वं प्रवृत्तिः ?

२. महत् शब्दस्य सम्बुद्धौ किं रूपम् ?

३. ददत् शब्दस्य (पुं) प्रथमैकवचने नुमागमो कथं न जायते ?

४. 'दीव्यत्' शब्दस्य जश्शस्विभक्तौ किं रूपम् ?

## १०.८. हलन्तपकरणे 'द'कारान्तशब्दाः

'द'कारः अन्ते यस्य स 'द'कारान्तः । 'द'कारान्तश्चासौ शब्दः 'द'कारान्तशब्दः । यस्य शब्दस्य अन्त्ये 'द'कारो विद्यते । यस्य शब्दस्य अन्तिमो वर्णः 'द'कारः । केवलं पुँल्लङ्गे स्त्रीलिङ्गे चास्य रूपं प्राप्यते । क्लीवलिङ्गे न दृश्यते इति भावः ।

'द'कारान्त-हलन्तपुँल्लिङ्गशब्दः　　सुपाद्, सुहृद्, सभासद् ।

'द'कारान्त-हलन्तस्त्रीलिङ्गशब्दः　　विपद्

एतेषां शब्दानां प्रथमाविभक्तेरेकवचने 'द' इत्यस्य स्थाने 'वाऽवसाने' इति 'त'कारे रूपम् । अन्यत्र विभक्तौ केवलं विभक्तियोगेन इष्टसिद्धः । 'सुपाद्'शब्दस्य 'पादः पत्' (६/४/१३०) इति सूत्रेण 'पत्' इत्यादेशः । स चादेशः 'निर्दिश्यमानस्यादेशाः' भवतीति परिभाषया 'पाद्' इति स्थाने 'पत' इत्यादेशः । पादः पत् (पा.सू. ६/४/१३०)

पात् शब्दान्तं पदङ्गं भं तदवयवस्य पात् शब्दस्य ।

पदादेशः स्यात् । उदा.　सुपदः, सुपदा ।

**बोधप्रश्नाः**

१. 'सुपद्' इति सिद्धये 'पत' इत्यादेश केन सूत्रेण भवति ?

२. 'सुहृद्' शब्दस्य प्रथमाविभक्तेरेकवचने किं रूपम् ?

## १०.९. हलन्तप्रकरणे 'च'कारान्तशब्दाः

यस्य शब्दस्यान्तिमो वर्णः 'च'कारः असौ 'च'कारान्तशब्दः । क्लीबलिङ्गे 'च'कारान्तशब्दः न प्राप्यते । पुँल्लिङ्गे स्त्रीलिङ्गे च असौ शब्दः लभ्यते ।

'च'कारान्तपुँल्लिङ्गशब्दाः प्राञ्च्, प्रत्यञ्च्, उदञ्च्, सम्यञ्च्, तिर्य्यञ्च ।

'च'कारान्तस्त्रीलिङ्गशब्दाः वाच् ।

**स्वावलोकनप्रश्नाः**

१. 'वाच्' शब्दः कस्मिन् लिङ्गे वर्त्तते ?

२. 'च'कारान्तपुँल्लिङ्गशब्दस्योदाहरणं देयम् ?

## १०.१०. 'च'कारान्तशब्दयपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

'च'कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन षट् सूत्राणि वर्त्तन्ते । तथाहि

१. तिरस्तिर्य्यलोपे (पा.सू. ६/३/९४)
२. नाञ्चेः पूजायाम् (पा.सू. ६/४/३०)
३. समः समि (पा.सू. ६/३/९३)
४. चौ (पा.सू. ६/३/१३८)
५. अचः (पा.सू. ६/४/१३८)
६. अनिदितां हल उपधायाः क्ङिति (पा.सू. ६/४/२४)

**स्वावलोकनप्रश्नाः**

१. 'च'कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन कति संख्याकानि पाणिनीयसूत्राणि विद्यन्ते ?

२. 'तिरस्तिर्य ........' शून्यस्थानानि पूरयत ?

३. 'अनिदितां ...........क्ङिति' । शून्यस्थानानि पूरयत ?

४. '..........पूजायाम् । शून्यस्थानानि पूरयत ?

## १०.११. सूत्रोक्ताः पारिभाषिकशब्दाः

'च'कारान्तशब्दरूपसाधनोद्देश्येन षट् सूत्राणि विद्यन्ते । तेषु सूत्रेषु एक एव पारिभाषिकशब्दः विद्यते, उपधा इति ।

उपधा उपधासंज्ञाविधायकं सूत्रमेकं विद्यते । तच्च सूत्रं अलोऽन्त्यात् पूर्व उपधा (पा.सू. १/१/६५) । अन्त्यात् अलः पूर्वो वर्ण उपधासंज्ञः स्यात् । तथा 'मनस्' इत्यत्र 'अ' इति उपधा ।

**स्वावलोकनप्रश्नाः**

१. का नाम उपधा ?

## १०.१२. सूत्राणामर्थावगमनम्

१. तिरसस्तिर्य्य लोपे (पा.सू. ६/३/९४)

तिरसः, तिरि, अलोपे इति त्रीणि पदानि सन्ति । अनु. अञ्चतौ वप्रत्यये, उत्तरपदे । अतः तिरसस इत्येतस्य तिरि इत्ययमादेशो भवति वप्रत्यान्तेऽञ्चतौ परतोऽलोपे सति । उदा. तिर्यङ्, तिर्यञ्चौ, तिर्यञ्चः । अञ्चु इत्यस्य अकारलोपः 'अचः' (पा.सू. ६/४/१३८) इति सूत्रेण भवति ।

२. नाञ्चेः पूजायाम् (पा.सू. ६/४/३०)

नाञ्चेः, पूजायाम् इति पदद्वयम् । अनु. उपधायाः, न लोपः, अङ्गस्य । अर्थः पूजायामर्थे अञ्चेरङ्गस्योपधायाः न कारस्य लोपो न भवति । अञ्च + क्त = अञ्चिता । अत्र 'अनिदितां हल उपधायाः क्ङिति' इति सूत्रेण 'न'कारस्य लोपः प्राप्त आसीत्, तस्य निषेधः ।

३. समः समि (पा.सू. ६/३/९३)

समः, समि इति पदद्वयम् । अनु. अञ्चतौ वप्रत्यये, उत्तरपदे । अर्थः सम् इत्येतस्य समि इत्ययमादेशो भवति वप्रत्ययान्ते अञ्चतौ उत्तरपदे । उदा. सम्यङ्, सम्यञ्चौ, सम्यञ्चः ।

४. चौ (पा.सू. ६/३/१३८)

अनु. पूर्वस्य दीर्घोऽणः, उत्तरपदे, संहितायाम् । अर्थः चौ परतः पूर्वस्याणोः दीर्घो भवति । 'चु' इत्यस्य सप्तम्येकवचने चौ इति । अञ्चुधातोः इत्यत्र 'अनिदितां हल उपधायाः 'क्ङिति' इति सूत्रेण 'न'कारस्य लोपः 'अचः' इति सूत्रेण अकारस्य लोपः 'चु' इति अवशिष्यते । तस्य सप्तम्येकवचने चौ इति । उदा. दधीचः, मयूचः इति रूपम् ।

५. अचः (पा.सू. ६/४/१३८)

अनु. अल्लोपः, भस्य, अङ्गस्य ।

अर्थः अच इत्ययमञ्चतिर्लुप्त नकारो गृह्यते । तदन्तस्य भस्य अकारस्य लोपो

भवति । दधीचः, मधूचः ।

६. अनिदितां हल उपधायाः क्ङिति (पा.सू. ६/४/२४)

अनिदितम्, हलः, उपधायाः, क्ङिति इति पदचतुष्टयं विद्यते । इकार इत् येषां त इदितः । न इदित्, तेषाम् । कश्च ङश्च क्ङौ क्ङौ इतौ यस्य स क्ङित् तस्मिन् । अनु. न लोपः इङ्गस्य । अर्थः अनिदितामङ्गानां हलन्तानामुपधाया नकारस्य लोपो भवति किति ङिति च प्रत्यये । उदा. स्रस्तः, ध्वस्तः ।

**स्वावलोकनप्रश्नाः**

१. 'तिरस्तिर्य्यलोपे' इति सूत्रेण कि भवति ?

२. 'चौ' इति सूत्रस्य क आशयः ?

३. 'अचः' इति सूत्रेण किं भवति ?

४. 'अनिदिताम्' इति पदस्य किं विग्रहवाक्यम् ?

५. 'समः समि' इति सूत्रे 'समि' इति किं विभक्त्यन्तं पदम् ?

## १०.१३. लक्ष्यसिद्धिः

हलन्तपुँल्लिङ्गप्रकरणे 'च'कारान्तशब्दभावेन प्राञ्च्, प्रत्यञ्च्, उदञ्च्, सम्यञ्च, तिर्यञ्च् इति एते शब्दाः ।

प्राञ्च = प्राङ् प्राञ्चौ प्राञ्चः प्रथमाविभक्तिः ।

प्राङ् = प्र + अञ्चु + क्विन् = 'ऋत्विग्दधृक् .....' (३/२/५९)

प्राञ्च्

प्राञ्च + सु = अनिदितां हल उपधायाः क्ङिति (६/४/२४)

(उपधायाः 'न'स्य लोपः)

प्रा च् + ( ) = 'हैलङ्याभ्यो .....' (६/१/६८)

प्रा + नुम् + च् = 'उगिदचां सर्वनामस्थानेऽधातोः (७/१/७०)

प्रा + न् + च्

प्रा + न् + (च) = संयोगान्तस्य लोपः (८/२/३)

प्रा + ङ् = क्विन्प्रत्ययस्य कुः (८/२/६२)

प्राङ् ।

प्र + अञ्चु् + क्विन् = प्र + अञ्चु् + ( )

प्र + अच् = अनिदितां हल उपधाया क्ङिति ।

प्राञ्चौ = प्राञ्चु् + औ = 'कृदतिङ्' इति प्रातिपदिकसंज्ञायां 'औ' ।

प्राच् + औ =

प्रा + नुम् + च् + औ = उगिदचां सर्वनामस्थानेऽधातोः

प्रा + न् + च् + औ

प्रां + च् + औ = न श्चापदान्तस्य झलि

प्रा ञ् + च् + औ = अनुस्वारस्य ययि परसवर्णः

प्राञ्चौ ।

प्राञ्चः = प्राञ्च + जस् ।

प्राञ्चः (नुमागमः, अनुस्वारः, अनुस्वारस्य परसवण्रः, 'स'कारस्य रूत्वविसर्गः)

प्राचः = प्र + अञ्चु् + क्विन्

प्र + अञ्च + ( )

प्र + अच् = अनिदितां हल उपधाया क्ङिति

प्र + अच् + शस् = 'कृदतिङ्' इति प्रातिपदिकसंज्ञायां 'शस्'

प्र + ( ) च् + अस् = भसंज्ञायां 'अचः' इत्यकारलोपः

प्रा+ च् + अस् = चौ

प्राचस्

प्राचः = 'स'कारस्य रूत्वे विसर्गे च ।

प्राचा = प्र + अञ्च + क्विन्

प्र + अञ्च + ( )

प्र + अञ्चु् = अनिदितां हल् उपधाया क्ङिति

प्र + अच् + टा = 'कृततिङ्' इति प्रातिपदिकसंज्ञायां 'टा'

प्र + ( ) च् + टा = भसंज्ञायां 'अचः' इत्यकारलोपः

प्रा + च् + आ = चौ

प्राचा ।

भ्याम्-भ्यस्-विभक्तौ कुत्वे जश्त्वे प्राग्भ्याम् प्राग्भिः, प्राग्भ्यः इति रूपम्, ङे प्रकृतिषु अजादिविभक्तिषु प्राचे, प्राचः, प्राचोः, प्राचाम्, प्राचि, प्राक्षु इति रूपम् । 'प्राचः' इत्यादिषु (प्र + अच् + शस्) सवर्णदीर्घेण यद्यपि रूपं सिद्धं भवितुमर्हति तथापि प्रतीचः (प्रति + अच् + शस्) इत्यादिरूपसिध्यर्थं 'अचः' (६/४/१३), 'चौ' (६/३/१३८) इति सूत्रम् । एवं भावेन 'प्रत्यञ्चु्', 'उदञ्चु्', 'सम्यञ्चु्', 'तिर्यञ्चु्' इति शब्दानां रूपसाधनप्रकारः बोधनीयो जायते ।

**'च'कारान्तस्त्रीलिङ्गशब्दः**

वाच् = वाक् वाचौ वाचः

'च' इत्यस्य कुत्वे जश्त्वे वाग्भ्याम्, वाग्भिः, इति रूपसिद्धिः ।

**स्वावलोकनप्रश्नाः**

१. प्राचः इति रूपसिद्धिं प्रदर्शयति ?

२. 'प्राचः' इत्यादिषु सवर्णदीर्घेण इष्टरूपसिद्धौ 'अचः' 'चौ' इति सूत्रं किमर्थम् ?

३. 'वाच्' शब्दव्य प्रथमाविभक्तेरेकवचने किं रूपम् ?

४. 'प्रत्यञ्च्' शब्दस्य शस्सविभक्तौ किं रूपम् ?

५. 'सम्यञ्च्' शब्दस्य ङस्विभक्तौ किं रूपम् ?

## १०.१४. 'प'कारान्त हलन्तशब्दाः

'प'कारः यस्य शब्दस्य अन्त्ये विद्यते, असौ पकारान्तशब्दः । पकारान्तशब्दभावेन हलन्तपुं. गुप्, स्त्रीलिङ्ग अप्, क्लीवलिङ्ग स्वप् इत्येते शब्दाः विदिताः भवन्ति ।

**स्वावलोकनप्रश्नाः**

१. 'अप्'शब्दस्य कस्मिन् लिङ्गे व्यवहारः ?

२. हलन्तक्लीवलिङ्गशब्दस्य एकमुदाहरणं देयम् ?

## १०.१५. 'प'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

'प'कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन स्वतन्त्रतया स्त्रीलिङ्गे एकमेव सूत्रं वर्त्तते ।

१. अपो भि (पा.सू. ७/४/५८)

२. शप्श्यनोर्नित्यम् (पा.सू. ७/१/८१)

३. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् (६/४/१७)

## १०.१६. सूत्रार्थावगमनम्

१. अपो भि (पा.सू. ७/४/४८)

अपः, भि इति पदद्वयम् । अनु. तः, अङ्गस्य ।

अर्थः अप् इत्येतस्याङ्गस्य भकारादौ प्रत्यये परतः 'तः' इत्ययमादेशो भवति ।

उदा. अप् + भिस् = अद्भिः, अप् + भ्याम् = अद्भ्याम् ।

२. शप्श्यनोर्नित्यम् (पा.सू. ७/१/८१)

इदं नपुंसकलिङ्गे नुमागमविधानार्थमानुषङ्गिकं सूत्रम् । अस्य सूत्रस्यार्थप्रतिपादनमत्र विहितम् । उदा. स्वम्पि, स्वाम्पि ।

३. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृप्रशास्तृणाम् (६/४/११)

अनु. सर्वनामस्थानेऽसम्बुद्धौ, उपधायाः, अङ्गस्य, दीर्घः । अर्थः अप्, तृन्, स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षतृ, होतृ, पोतृ, प्रशास्तृ इत्येतेषामङ्गानामुपधायाः सम्बुद्धिभिन्ने सर्वनामस्थाने परतो दीर्घो भवति । उदा. अप् = आपः, तृन् = कर्त्ता ।

**स्वावलोकनप्रश्नाः**

१. 'अपो भि' इति सूत्रेण किं क्रियते ?

२. 'अप्तृन्तृच्' इत्यादिना सूत्रेण कस्य दीर्घो भवति ?

३. स्वपि / स्वाम्पि इत्यत्र नुमागमः केन सूत्रेण भवति ?

## १०.१७. 'प'कारान्तहलन्तशब्दानां रूपसाधनप्रकारः (लक्ष्यसिद्धिः)

'प'कारान्तहलन्तपुँल्लिङ्गशब्दभावेन 'गुप्' इति विदितः । तस्य रूपसाधनं 'द'कारान्तशब्दवत् भवति । केवलं प्रथमाविभक्तेः एकवचने 'प'कारस्य स्थाने विकल्पेन 'ब' इत्यादेशः ।

गुप् / गुब् गुपौ गुपः

अन्यत्र विभक्तौ केवलं विभक्तियोगेन इष्टरूपसिद्धिः ।

**'प'कारान्तस्त्रीलिङ्गशब्दः**

एतत्कोटौ 'अप्'शब्दः विचार्य्यते । अयं शब्दो नित्यं बहुवचनान्तः ।

अप् + जस् / शम् = आपः

अप् + जस् / शस्

आप् + अस् / अस् += अप्तृन्तृच् .... (पा.सू. ६/४/११)

आपस् = आपः

भिस् भ्यस्विभक्तिसु अद्भिः, अद्भ्यः ।

अप् + भिस्

अत् + अभस् = अपो भि (पा.सू. ७/४/४८)

अद् + भिस् = झलां जश् झशि (पा.सू. ८/४/५३)

अद्भिस् = अद्भिः

केवलं विभक्तियोगेन अपाम्, अप्सु इति रूपम् ।

**'प'कारान्तक्लीवलिङ्गशब्दः**

एतत् कोटौ स्वप्शब्दो विचार्य्यते । सु = शोभनाः आपो यस्मिन् सरसि इति बहुब्रीहिसमासद्वारा निष्पन्नः । 'न पूजनात्' इति निषेधात् 'ऋक्पूष्धू' इति सूत्रेण समासान्तप्रत्ययो न भवति ।

| | | | |
|---|---|---|---|
| स्वप् | प्रथमा | स्वपी | स्वाम्पि / स्पम्पि |
| द्वितीया | स्पप् | स्वपी | स्वाम्पि / स्वापि |

स्वप् + सु / अम् = स्वप्

स्वप् + ( ) = स्वमोर्नपुंसकात्

स्वपी = स्वप् + औ / औट्

स्वप् + शी

स्वपी

स्वाम्पि / स्वम्पि = स्वप् + जस् / शस्

स्वप् + शि = जश्शसोः शि

स्वाप् + इ = अप्तृन्च् .....

स्वा + नुम् + प् + इ = शप्श्यनोर्नित्यम् (पा.सू. ७/१/८१)

स्वा + न् + प् + इ

स्वा + म् + प् + इ = अनुस्वारो ययि परसवर्णः ।

स्वाम्पि ।

दीर्घं बाधित्वा पूर्वं नुमागमकार्य्यं प्रथमं प्रवर्त्तते नित्यत्वात् परत्वात् । अतस्तस्मिन् पक्षे 'स्वम्पि' इति रूपम्

केषाञ्चिद् विचारेण 'अप्तृन्' इति दीर्घस्य निरवकाशत्वरूपप्रतिपदोक्तत्वाभावेऽपि प्रतिपदविधिस्तेन शीघ्रोपस्थितिकतया प्रथमं प्रवृत्तौ स्वाम्पि इत्येव इष्टं रूपम् । नित्यमत्र कृताकृतिप्रसङ्गः यो विधिः स नित्यः । पुनश्च प्रतिपदोक्तविधेः वलीयस्त्वं तु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषया निरूपितम् ।

**स्वावलोकनप्रश्नाः**

१. 'अप्'शब्दः कस्मिन् वचने व्यवह्रियते ?

२. ‘अप्’शब्दस्य भिस्विभक्तौ किं रूपम् ?

३. ‘अप्’शब्दस्य जस्/शस्विभक्तौ किं रूपम् ?

४. ‘स्वप्’शब्दस्य जस्/शस्विभक्तौ किं रूपम् ?

५. को नाम नित्यविधिः ?

## १०.१८. ‘र’कारान्तहलन्तशब्दाः

‘र’कार’ अन्ते यस्य स रकारान्तः । रकारान्तश्चासौ शब्दः रकारान्तशब्दः । यस्य शब्दस्य अन्त्ये ‘र’कारो विद्यते । यस्य शब्दस्य अन्तिमो वर्णः ‘र’कारः । स्त्रीलिङ्गक्लीवलिङ्गभावेन तस्य शब्दस्य विभाजनद्वयम् । पुँल्लिङ्गे तस्य व्यवहारो न दृश्यते । इमे ते शब्दाः विदिताः भवन्ति

१. ‘र’कारान्तस्त्रीलिङ्गशब्दाः गिर्, पुर् ।

२. ‘र’कारान्तनपुंसकलिङ्गशब्दाः वार् ।

**स्वावलोकनप्रश्नाः**

१. ‘र’कारान्तशब्द इत्यनेन किं बोध्यते ?

२. ‘र’कारान्तस्त्रीलिङ्गशब्दानामुदाहरणं देयम् ?

३. ‘वार्’ शब्दस्य कस्मिन् लिङ्गे वर्त्तमानता ?

## १०.१९. ‘र’कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

‘र’कारान्तहलन्तहलन्तशब्दानां रूपसाधनोद्देश्येन किमपि मुख्यं विशिष्टं च सूत्रं न वर्त्तते । आनुसङ्गिकसूत्राणि कार्य्यं साधयन्ति । दीर्घविधायकमेकं सूत्रम्, विसर्जनीयविधानाय अपरं सूत्रम् ।

१. र्वोरुपधाया दीर्घ इकः (पा.सू. ८/२/७६)

२. खरवसानयोर्विसर्जनीयः (पा.सू.)

## १.२०. लक्ष्यसिद्धिः

गिर् = गीः गिरौ गिरः

गिर् + सु

गिर् + ( ) = हल्ङ्या .....

गीर् = र्वोरुपधाया दीर्घ इकः (८/२/७६)

गीः = खरवसानयोः विसर्जनीयः ।

भ्याम्-भिस्-भ्यस्विभक्तौ गीर्भ्याम्, गीर्भिः, गीर्भ्यः ।

तथैव 'पुर्'शब्दस्य रूपसाधनमवबोधनीयं जायते ।

**रेफान्तक्लीवलिङ्गशब्दः वार् (जलम्) । वारयति आकाशमिति वार् ।**

वृञ् आवरणे इति चौरादिकात् क्विपि णिलोपे वार्

वार् =

वाः वारी वारि

वाः वारी वारि ।

'वार्'घटक 'र'कारस्य विसर्गे अन्यत्र सर्वत्र विभक्तियोगे च इष्टं रूपं बोधनीयम् ।

**स्वावलोकनप्रश्नाः**

१. 'गिर्'शब्दस्य प्रथमाविभक्तेरेकवचने किं रूपम् ?

२. 'वार्'शब्दस्य 'जस्'विभक्तौ 'शस्'विभक्तौ च किं रूपम् ?

३. 'पुर्'शब्दस्य भ्याम्विभक्तौ किं रूपम् ?

## १०.२१. 'श'कारान्तहलन्तशब्दाः

'श'कारः अन्ते यस्य स शकारान्तः । शकारान्तश्चासौ शब्दः शकारान्तशब्दः । यस्य शब्दस्य अन्त्ये 'श'कारो विद्यते । यस्य शब्दस्य अन्तिमो वर्णः शकारः । पुँल्लिङ्ग-स्त्रीलिङ्गभावेन तस्य शब्दस्य विभाजनद्वयम् इमे ते शब्दाः विदिताः

१. 'श'कारान्तपुँल्लिङ्गशब्दाः तादृश्, नश्, धृतस्पृश्

२. 'श'कारान्तस्त्रीलिङ्गशब्दाः दिश्, दृश् ।

**स्वावलोकनप्रश्नाः**

१. 'श'कारान्तस्त्रीलिङ्गशब्दस्योदाहरणं देयम् ?

२. 'श'कारान्तशब्द इत्यनेन किं बोध्यते ?

## १०.२२. 'श'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

'श'कारान्तशब्दानां रूपसाधनोद्देश्येन प्राकरणिकानि सूत्राणि सर्वाण्यत्र विषयीकृतानि वर्त्तन्ते । तद्यथा

पुँल्लिङ्गशब्दस्य साधने

१. त्यदादिषु दृशोऽनालोचने कञ्च (पा.सू. ३/२/६०)
२. आ सर्वनाम्नः (पा.सू. ६/३/९१)
३. स्पृशोऽनुदके क्विन् (पा.सू. ३/२/५८)
४. नशेर्वा (पा.सू. ८/२/६१)
५. वाऽवसाने (पा.सू. ८/४/५६)
६. क्विन्प्रत्ययस्य कुः (पा.सू. ८/२/६२)

स्त्रीलिङ्गशब्दस्य साधने

१. ऋत्विक् दधृक् .... (पा.सू. ३/२/५९) क्विन्प्रत्ययः
२. व्रश्चभ्रस्जसृजमृज (पा.सू. ८/२/३६) षत्वम्
३. झलां जशोऽन्ते (पा.सू. ८/२/३९) जश्त्वम्
४. चोः कुः (पा.सू. ८/२/३०) कुत्वम्

**सूत्रार्थावगमनम्**

एषु सर्वेषां सूत्राणामर्थावगमनं कृतम् । केवलं 'नशेर्वा' (८/२/६१) इति सूत्रम् ।

नशेर्वा (८/२/६१)

नशेः, वा, इति पदद्वयम् । अनु. कुः, पदस्य । अर्थः नशेः पदस्य वा कवर्गादेशो भवति । 'अलोऽन्त्यस्य' इति नियमेन अन्त्यस्य 'श'कारस्य स्थाने स च कवर्गादेशः ।

**स्वावलोकनप्रश्नाः**

१. 'आ सर्वनाम्नः' इति सूत्रेण किं भवति ?

२. 'नशेर्वा' इति सूत्रेण किं क्रियते ?

३. 'दिश्' इति 'श'कारस्य स्थाने षत्वं केन जायते ?

## १०.२३. लक्ष्यसिद्धिः (शकारान्तशब्दरूपसाधनप्रकारः)

पुँल्लिङ्गशब्दाः तादृश्, नश्, घृतस्पृश् इति ।

१. तादृश्   =   तद् + दृश् + क्विन्
तद् + दृश् + (  )
त + (आ) + दृश्  =  आ सर्वनाम्नः (६/३/९१)
ता + दृश्   =   अकः सवर्णे दीर्घः
तादृश्  ।

प्रथमाविभक्तौ   तादृश् + सु
तादृश् + (  )   =  हल्ङ्यादिलोपः
तादृश्   =  व्रश्चभ्रस्ज ....
तादृड्   =  झलां जशोऽन्ते
तादृग्   =  क्विन्प्रत्ययस्य कुः  ।
तादृक्   =  वाऽवसाने  ।
तादृक् / तादृग्

तादृक् / तादृग्   तादृशौ   तादृशः  ।

भ्याम्-भिस्-भ्यस्विभक्तिषु षत्वे जशत्वे कुत्वे च तादृग्भ्याम्, तादृग्भिः, तादृग्भ्यः इति रूपसिद्धिः । अन्यत्र विभक्तौ केवलं विभक्तियोगे इष्टं रूपं बोधनीयम्  ।

२. नश्   णश् अदर्शने इति धातोः क्विप्प्रत्यये 'नश्' इति रूपम् ।

प्रथमाविभक्तौ   नश् + सु

| | |
|---|---|
| नश् + सु | नश् + (  ) = हल्ङ्यादिलोपः |
| नश् + (  ) = हलङ्यादि | नष्  =  व्रश्चभ्रस्ज ..... |
| नष्   व्रश्चभ्रस्ज | नड्  =  झलां जशोऽन्ते |
| नड्   झलां जशो | नट्  =  वाऽवसाने |
| नग्   नशेर्वा | |
| नक्   वाऽवसाने | |

नक् / नग्   कुत्वपक्षे जश्त्वचर्त्वाभ्यां रूपे  ।
नड् / नट्   षत्वपक्षे जश्त्वचर्त्वाभ्यां रूपे  ।

३. घृतस्पृश्

घृतं स्पृशतीति विग्रहः = घृतस्पृश् + क्विन् = स्पृशोंनुदके क्विन् (३/२/५८)
घृतस्पृश् + (  )

घृतस्पृश् + सु इति दशायां तादृशादिशब्दवत् सोर्हल्ङ्यादिलोपः । 'क्विन्प्रत्ययस्य' इति कुत्वस्यासिद्धत्वात् पूर्वं 'व्रश्चभ्रस्ज' इति षः । तस्य जश्त्वेन डः । तस्य कुत्वेन गः । तस्य

चर्त्वविकल्प इति भावः । अतः घृतस्पृक् / घृतस्पृग् इति रूपक्षयम् । अन्यत्र सर्वत्र विभक्तौ 'तादृश्' इति शब्दवद्रूपम् ।

**स्त्रीलिङ्गशब्दाः दिश्, दृशस**

१. दिश् दिक् / दिगस दिशौ दिशः

दिशति पूर्वा दक्षिण इत्यादि ज्ञानं या सा दिक् । 'दिश्' अतिसर्जने इति धातुः

दिश् + क्विन् = ऋत्वि

दिश् + ( )

दिश् + सु

दिश् + ( ) = हलङ्यादिलोपः

ततश्च 'व्रश्चभ्रस्ज' इति षत्वे जश्त्वे कुत्वेन गकारे वैकल्पिकचर्त्वे दिक् । एवं दृश् शब्दात् दृक् / दृग् इति रूपम् । भ्याम्-भिस्-भ्यस्-विभक्तिषु 'तादृश्' शब्दवद्रूपम् । दिग्भ्याम्, दिग्भिः, दिग्भ्यः, दिक्षु इति ।

**स्वावलोकनप्रश्नाः**

१. 'तादृश्'शब्दस्य प्रथमाविभक्तावेकवचने रूपं साधयत ?

२. 'नश्' शब्दस्य प्रथमाविभक्तावेकवचने कानि रूपाणि ?

३. दिश्शब्दस्य प्रथमाविभक्तावेकवचने किं रूपम् ?

४. घृतस्पृक् इति रूपं कस्यां विभक्तौ निष्पद्यते ?

५. 'नश्' इत्य मूलधातुः किम् ?

## १.२४. 'ष'कारान्तहलन्तशब्दाः

'ष'कारः अन्ते यस्य स षकारान्तः । षकारान्तश्चासौ शब्दः षकारान्तशब्दः पुँल्लिङ्ग-स्त्रीलिङ्ग-क्लीवलिङ्गभावेन तस्य शब्दस्य विभाजनम् । इमे ते शब्दाः

१. पु. दधृष्, रत्नमुषस, पिपठिष्, चिकीर्ष्

२. स्त्री त्विष्, सजुष्, आशिष्

३. क्ली धनुष् ।

**स्वावलोकनप्रश्नाः**

१. 'ष'कारान्तस्त्रीलिङ्गशब्दस्योदाहरणं देयम् ?

२. 'ष'कारान्तक्लीवलिङ्गशब्दस्योदाहरणं देयम् ?

३. 'ष'कारान्तशब्द इत्यनेन किं बोध्यते ?

## १०.२५. 'ष'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

'ष'कारान्तशब्दानां रूपसाधनोद्देश्येन प्राकरणिकानि इमानि सूत्राणि समुपदिष्टानि विद्यन्ते

१. ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च (पा.सू. ३/२/५९) = क्विन् ।

२. झलां जशोऽन्ते (पा.सू. २/२/३९) जश्त्वम्

३. क्विन्प्रत्ययस्य कुः (पा.सू. ८/२/६२) कुत्वम्

४. र्वोरुपधायाज दीर्घः (पा.सू. ८/२/७६) उपधायाः इकः दीर्घः ।

५. नुम्विसर्जनीयशर्व्यवायेऽपि (पा.सू. ८/३/५८) 'स'स्य मर्धन्यादेशः ।

६. सान्तमहतः संयोगस्य (पा.सू. ६/४/१०) दीर्घः ।

इमानि सर्वाणि प्राकरणिकसूत्राणि, येषामर्थागमनं नापेक्षितम् । केवलमेतदेव सूत्रद्वयम्

१. र्वोरूपधायाः दीर्घः (८/२/७६) २. नुम्विसर्जनीयशर्व्यवायेऽपि (८/३/५८) ययोस्तात्पर्य्यावबोधने यत्नः क्रियते ।

१. र्वोरुपधाया दीर्घः (पा.सू. ८/२/७६)

रश्च वश्च = र्वौ, तयोः । रेफान्तस्य वकारान्तस्य च धातोः पदस्य उपधाया इको दीर्घो भवति । उदा. आशीः, गीः, धूः, पूः । 'स्वादिष्वसर्वनामस्थाने' इति पदत्वम् ।

२. नुम्विसर्जनीयशर्व्यवायेऽपि (पा.सू. ८/३/५८)

शर् च तैः = नुम्विसर्जनीयभिः । व्यवायः, तस्मिन् । अनु. सः, इण्कोः, अपदान्तस्य मूर्धन्यः, संहितायाम् । अर्थः नुम्व्यवायेऽपि विसर्जनीयव्यवायेऽपि शर्व्यवायेऽपि इण्कोरुत्तरस्य सकारस्य मूर्धन्यादेशो भवति । यजुंषि, सर्पिषु, हविष्षु । इति ।

**स्वावलोकनप्रश्नाः**

१. 'र्वोरुपधायाः' इति सूत्रेण किं भवति ?

२. ‘आशीः’ इत्यत्र दीर्घविधायकं सूत्रं किम् ?

३. ‘नुम्विसर्जनीय’ इत्यादिसूत्रेण किं विधीयते ?

४. ‘सर्पिस् + सुप्’ इत्यत्र सिद्धं रूपं किम् ?

## १०.२६. लक्ष्यसिद्धिः (षकारान्तशब्दरूपसाधनप्रकारः)

**पुँल्लिङ्गशब्दाः** दधृष्, रत्नमुष्, पिपठिष्, चिकीर्ष ।

१. दधृष् ञिधृषा प्रागल्भ्ये इत्यस्माद् धातोः ‘ऋत्विग् दधृक्’ इत्यादिना क्विन्प्रत्ययः । द्वित्वमन्तोदात्तत्वं च निपात्यते । शब्दस्यास्यार्थः धाष्र्ट्यकर्त्ता इति । विभक्तिकार्य्ये दधृक्–दधृषौ–दधृषः।

दधृक् दधृष् + सु

दधृष् + ( ) = हलङ्यादिलोपः

दधृङ् = दधृग् = दधृक् = जश्त्वेन ङः गः कः इति ।

तादृश् इति शब्दवद्रूपम् ।

२. रत्नमुष् रत्नानि मुष्णातीति । मुषस्तेशे इति धातोः क्विप्प्रत्ययः ।

रत्नमुष् रत्नमुट् / रत्नमुड् रत्नमुषौ रत्नमुषः ।

(हलङ्यादिलोपः, जश्त्वम्, चर्त्वम्) ।

३. पिपठिष् पठ व्यक्तायां वाचि इति धातोः सन्प्रत्यये द्वित्वलोपादि प्रयिाकार्य्ये पिपठिष्। विभक्तिकार्य्ये पिपठीः – पिपठिषौ – पिपठिषः ।

पिपठीः पिपठिष् + सु

पिपठिष् + ( )

पिपठीष् = र्वोरुपधायाः ।

पिपठीः = रुत्वे विसर्गे च ।

४. चिकीर्ष् ‘कृ’धातोः सनि प्रक्रियाकार्य्ये चिकीर्ष् । विभक्तिकार्य्ये

चिकीः चिकीर्षौ – चिकीर्षः इत्यादिरूपम्

चिकीर्ष + सु

चिकीर्ष + ( ) = हल्ङ्यादिलोपः ।

चिकीर् ( ) + = रात्सस्य

चिकीर् वोऽरुपधायाः ।

यद्यपि 'हलि च' इति पूर्वमेव दीर्घो जातस्तथापि 'हलि च' इति पूर्वमेव दीर्घो जातस्तथापि 'हलि' च इत्यसिद्धतया र्वोः इति दीर्घः ।

चिकीः खरवसानयोः विसर्जनीयः ।

स्त्रीलिङ्गशब्दाः त्विष्, सजुष्, आशिष् ।

१. त्विष् त्वेषणं दीपनमिति भावे । त्वेषन्ति = दीप्यन्तेऽर्था अनेनेति करणे वा क्विपि त्विष् इति । विभक्तिकार्य्ये त्विट् / त्विड् – त्विषौ – त्विषः ।

त्विष् + सु

त्विष् + ( ) हल्ङ्यादिलोपः

त्विड् = त्विट् = जश्त्वे, चर्त्वे च रूपम् ।

२. सजुष् सह जुषते इत्यर्थे जुषी प्रतिसेचनयोः इत्यतः क्विपि 'सहस्य सः संज्ञायाम्' इति 'ससजुषोरुः' इति निर्द्देशेन निपातनाद्वा सहस्य सादेशे सजुष इति । ततः सौ तस्य लोपे पदत्वे 'र्वोरुपधायाः' इत्युपधादीर्घे विसर्गे सजूः इति ।

सजूः = मित्रम्, सेवको वा ।

३. आशिष् आङ् पूर्वकात् 'आङः शासु इच्छायाम्' इत्यतो भावे क्विपि 'आशासः क्वावुपधायाः' इत्युपधायाः इत्वे 'शासिवसिघसीनाञ्च' इति सस्य षत्वे आशिष् इति । विभक्तिकार्य्ये आशीः – आशिषौ – आशिषः सौ तस्य लोपे पदत्वे 'र्वोरुपधायाः' इत्युपधादीर्घे विसर्गे 'आशीः' इति रूपम् ।

**क्लीवलिङ्गशब्दाः** धनुष्, चक्षुष् ।

दधन्ति = धनादिकं प्राप्नोति येन तद् धनुः । धन = धान्ये इत्यस्माद् धातोः 'अर्ति पृवपियजितनिधनितपिभ्योनिट्' इत्यौणादिकसूत्रेण उस् प्रत्यये (धन् + उस्) प्रत्ययावयवत्वात् सस्य षत्वे 'धनुष्' इति शब्दः । विभक्तिकार्य्ये धनुः – धनुषी – धनूंषि ।

धनुः धनुष् + सु

धनुष् + ( ) स्वमोर्नपुंसकात्

धनुः रूत्वे, विसर्गे ।

'र्वोरुपधायाः' इति दीर्घकार्य्यन्तु न रेफान्तस्य धातुत्वाभावात् ।

धनुषी धनुष् + औ

धनुष् + शी

धनुषी ।

धनूंषि धनुष् + जस्

धनुष् + शि

धनु + नुम् + ष् + शि = नपुंसकस्य झलचः ।
धनु + न् + ष् + शि
धनू + न् + ष् + इ
धनूंषि ।

**स्वावलोकनप्रश्नाः**

१. 'दधृष्' इति शब्दस्य प्रथमाविभक्तेरेकवचने रूपं किम् ?

२. 'पिपठिष्' शब्दस्य प्रथमाविभक्तेरेकवचने रूपं साधयत ?

३. 'सजुष्' शब्दस्य प्रथमाविभक्तेरेकवचने किं रूपम् ?

४. धनुष्शब्दस्य जस्विभक्तौ किं रूपम् ?

५. 'आशीः' इति रूपसाधनं कुरुत ?

## १०.२७. 'स'कारान्तलन्तशब्दाः

'स'कारः अन्ते यस्य स सकारान्तः । सकारान्तश्चासौ शब्दः 'स'कारान्तशब्दः लिङ्गभेदेन तद्रूपस्य शब्दस्य विभाजनं जायते । इमे ते शब्दाः

१. पुं पुमन्, विद्वन्, उशनस्, अनेहस्, वेधस् ।
२. स्त्री.
३. क्ली पयस्, सुपुम्स् ।

**स्वावलोकनप्रश्नाः**

१. के 'स'कारान्त हलन्तशब्दाः ?

२. पयस् शब्दः कस्मिन् लिङ्गे व्यवह्रियते ?

## १०.२८. 'स'कारान्तशब्दरूपसाधनोद्दिष्टानि पाणिनीयसूत्राणि

'स'कारान्तशब्दानां रूपसाधनाऽवसरे सूत्रद्वयं कौमुद्यां वर्त्तते ।

१. वसोः सम्प्रसारणम् (पा.सू. ६/४/१३१)
२. पुंसोऽसुङ् (७/१/८९)

**सूत्रार्थावगमनम्**

१. वसोः सम्प्रसारणम् (पा.सू. ६/४/१३१)

पदद्वयं वर्त्तते । वसोरिति षष्ठ्यन्तम्, सम्प्रसारणमिति प्रथमान्तपदम् । अनु. भस्य, अङ्गस्य । वस्वन्तस्य स्वाङ्गस्य भस्य सम्प्रसारणं भवति । उदा . विदुषः, विदुषा, विदुषे ।

२. पुंसोऽसुङ् (पा.सू. ७/१/८९)

पुंसः षष्ठ्यन्तं पदम्, असुङ् प्रथमान्तं पदम् । अनु. सर्वनामस्थाने अङ्गस्य । पुंस इत्येतस्याङ्गस्य सर्वनामस्थाने परतोऽसुङ् इत्ययमादेशो भवति । उदा. पुमान्, पुमांसौ, पुमांसः, पुमांसम् ।

**स्वावलोकनप्रश्नाः**

१. 'वसोः सम्प्रसारणम्' इति सूत्रेण किं भवति ?

२. पुंसः असुङ् इत्यादेशः कुत्र भवति ?

## १०.२९. लक्ष्यसिद्धिः (सकारान्तशब्दरूपसाधनप्रकारः)

**पुँल्लिङ्गशब्दाः** घुम्स्, विद्वस्, उशनस्, अनेहस्, वेधस् । पुञ् भावने इति धातोः डुम्सुन् प्रत्यये पुम्स् (पुञ् + डुम्सुन् = पुम्स्) इति शब्दः ।

| | | | |
|---|---|---|---|
| १. पुंस | पुमान् | पुमांसौ | पुमांसः |
| | पुमांसम् | पुमांसौ | पुंसः |
| | पुंसा | पुंभ्याम् | पुम्भिः |

पुमान् पुंस + सु

पुम् + असुङ् + सु = पुंसोऽसुङ् (पा.सू. ७/१/८९)

पुमस् + सु

पुम + नुम + स् + सु = उगिदचां सर्वनामस्थाने ....

पुम + न् + म् + सु

पुमा + न् + स् + सु = सान्तमहतः

पुमा + न् + स् + ( ) = हल्ङ्याभ्यो .....

पुमा + न् + ( ) = संयोगान्तस्य लोपः

पुमान् ........

हे पुमन् इत्यत्र दीर्घकार्य्यं न भवति 'सान्तमहतः' इति सूत्रे असम्बुद्धौ इत्यनुवृत्तेः कारणात् । प्रकृते तु एकवचनात्मिका विभक्तिः सम्बुद्धिः ।

पुम्भ्याम् पुंस + भ्याम् इत्यत्र सस्य संयोगान्तलोपे निमित्तापायादनुस्वारनिवृत्तौ

मकारमाश्रित्य पुनरनुस्वारे परसवर्णे पुम्भ्याम् इति ।

पुंसः, पुंसि, पुंसाम् इत्यत्र तु सर्वनामस्थानिप्रत्ययाभावात् असुङादेशो न भवति ।

केवलं विभक्तियोगे इष्टं रूपम् ।

२. विद् विद् = ज्ञाने इत्यदादिगणीयधातोः (वेत्ति = जानाति) लटि तस्य लटः शतृशानचौ (पा.सू. ३/२/११४) इति शत्रादेशे शपि तस्य 'अदिप्रभृतिभ्यः इति लुकि 'विदेः शतुर्वसुः' इति वस्वादेशः 'सार्वधातुकमपित्' इति शतुर्ङित्वात् लघूपधगुणो न । विद्वस् इति ।

| | | |
|---|---|---|
| विद्वांनस | विद्वांसौ | विद्वांसः |
| विद्वांसम् | विद्वांसौ | विदुषः |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः |

विद्वान् विद्वान् + सु

विद्व + नम् + स् + सु = उगिदचां सर्वनामस्थानेऽधातोः

विद्व + न् + स् + सु

विद्वा + न् + स् + सु = सान्तमहतः ......

विद्वान् + स् + ( ) = हल्ङ्यादि ........

विद्वान् + ( ) = संयोगान्तस्य लोपः

विद्वांसौ सुहि नुमि कृते 'सान्तमहतः' इति दीर्घः 'नश्च' इत्यनुस्वारः ।

विदुषः विद्वस् इति वस्य सम्प्रसारणे (वसोः सम्प्रसारणम्)

'विद् उ अस्' इत्यत्र 'सम्प्रसारणाच्च' इत्यकारस्य पूर्वरूपे विदुस् अस् इति स्थितौ पूर्वसस्य षत्वे अन्त्यसस्य रुत्वे विसर्गे विदुषः इति रूपम् ।

विद्वद्भ्याम् विद्वस् + भ्याम्

विद्वद् + भ्याम् = वसु स्रंसुध्वं त्वनडुहां दः (८/२/७२)

विद्वद्भ्याम् ।

विद्वत्सु विद्वस् + सुप्

विद्वद् + सु = विद्वत्सु ।

३. दशनम् वश कान्तौ इत्यतः वष्टि = कामयते इत्यर्थे 'वशेः कनसिः' इति कनसि प्रत्यये इकारस्योच्चारणार्थत्वे इत्वे वा वस्य 'ग्रहिज्या' इति सम्प्रसारणे 'उशनम्' इति ।

| | | |
|---|---|---|
| उशना | उशनसौ | उशनसः |
| उशनसम् | उशनसौ | उशनसः |
| उशनसा | उशनोभ्याम् | उशनोभिः |

हे उशन, हे उशनन्

हे उशनः

अनङादेशे न लोपाभावे हे उशनन् । अनङि न लोपे हे उशन ! । अनङोऽभावे असम्बुद्धौ इत्युक्त्या 'सान्त' इति दीर्घाभावे च हे उशनः ! ।

४. अनेहम् न हन्यते = विच्छिद्यते इत्यर्थे नञि उपपदे हन्धातोः 'नञि हन एह च' इति औणादिके असुन्प्रत्यये हन् एहादेशे उपपदसमासे नञो न लोपे एहशब्दस्य तस्मान्नुडचि इति नुडागमे अनेहस्शब्दः । तस्यार्थः समयः, उशनस् इति शब्दवद्रूपम् ।

५. वेधस् विदधाति = सृष्टिं करोतीत्यर्थे विपूर्वकात् डुधाञ् धारणपोषणयोः इत्यतः 'विधाञो वेध च' इत्यसि प्रत्यये । विशिष्टस्य धाञः वेधादेशे वेधस् इति ।

वेधाः वेधसो वेधसः

वेधाः वेधस्शब्दात् सौ तस्य लोपे 'अत्वसन्तस्य' इत्युपधादीर्घे रुत्वविसर्गयोः वेधाः इति ।

**स्त्रीलिङ्गशब्दाः**

**क्लीवलिङ्गशब्दाः** पयस्, सुपुम्स् ।

१. पयस् पीयते यत् तत् पयः । 'पीङ् पाने' इति दौवादिकात् 'सर्वधातुभ्योऽसुन्' इत्यसुनि गुणे अयादेशे पयस् ।

पयः पयसी पयांसि

पयः पयस् शब्दात् सौ तस्य लुकि रुत्वविसर्गयोः पयः इति ।

पयसी औङः श्यां रूपम् ।

पयांसि जशशसोः शौ झलन्तत्वान्नुमि 'सान्तमहत्' इति दीर्घे अनुस्वारे च पयांसि इति रूपम् ।

२. सुपुम्स् शोभनाः सुमांसो यस्मिन्नगरे तत् सुपुम् नगरम् । सुपुंस् इति शब्दात् स्वमोर्लुकि संयोगान्तलोपे सुपुम् इति ।

**स्वावलोकनप्रश्नाः**

१. 'पुम्स इति शब्दस्य निष्पत्तये का प्रकृतिः ? कः प्रत्ययः ?

२. पुम्स शब्दस्य सुविभक्तौ किं रूपम् ?

३. विद्वस् शब्दस्य भ्याम् विभक्तौ किं रूपम् ?

४. वेधाः इति सिद्धये दीघविधायकं सूत्रं किम् ?

| |
|---|
| ५. पयस् शब्दस्य जस् / शस् विभक्तौ किं रूपम् ? |

## १०.३०. सारांश:

प्रियपाठका: ! अस्मिन् खण्डे 'त'-'द'-'च'-'प'-'र'-'श'-'ष'-'स' कारान्त हलन्तशब्दानां संविज्ञानं साधनप्रकारश्च ज्ञातवन्त: । पाणिनीयव्याकरणे तदर्थं ३७ संख्याकानि सूत्राणि वर्त्तन्ते । अभ्यस्तम्, उपधा, सम्प्रसारणम् इत्यादय: पारिभाषिकशब्दा:, जस्, शस् प्रभृतय: विभक्तिसङ्केता:, अवहिता: । प्रक्रियात्मककार्य्येषु दीर्घकार्य्यम्, लोपकार्य्यम्, आगमकार्य्यम्, तकारादिवर्णविपरिणाम:, षत्वकार्य्यम् इत्यादीनि कार्य्याण्यवधेयानि भवन्ति ।

## १०.३१. आदर्शप्रश्ना:

I. **निबन्धात्मकप्रश्ना: (प्रत्येकं २०/१५ अङ्का:)**

१. 'त'-'द'-'च'-'प'-'र'-'श'-'ष'-'स' कारान्त हलन्तशब्दानां यथाग्रन्थमुपपादनं कुरुत ?

२. 'द'कारान्तशब्देषु 'सुहृद्'शब्दस्य 'सुपाद्'शब्दस्य 'विपद्'शब्दस्य च सप्तसु विभक्तिषु रूपाणि लिखत ?

३. 'ष'कारान्तशब्देषु 'पिपठिष्' 'आशिष्' 'धनुष्' शब्दानां सप्तसु विभक्तिषु रूपाणि उपस्थापयत?

४. 'स'कारान्तशब्देषु विद्वस्-वेधस्-पयस्-शब्दानां सप्तसु विभक्तिषु रूपाणि उपस्थापयत ?

५. प्राश्च् - वाच् - वार् - शब्दानां सप्तसु विभक्तिषु रूपाणि उपस्थापयत ?

II. **विश्लेषणात्मकप्रश्ना: (प्रत्येकं १२/१० अङ्का:)**

१. 'अत्वसन्तस्य चाधातो:' इति सूत्रस्य व्याख्या कार्य्या ?

२. नुमागमविधायकसूत्राणामुपपादनपूर्वकं केवलं सूत्रार्थं लिखत ?

३. 'च'कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन उद्दिष्टानि सूत्राण्युपस्थाप्य तेषां कार्य्यप्रकारं विवृणत ?

४. 'अप्तृन्तृच्' इति सम्पूर्णं सूत्रमुपस्थाप्य तस्य कार्य्यं प्रतिपाद्य च प्रत्येकं कृते उदाहरणं देयम् ?

५. 'श'कारान्तहलन्तशब्दानां रूपसाधनोद्देश्येन उद्दिष्टानि सूत्राणि उपस्थापयत ?

६. 'र्वोरुपधाया दीर्घ:' 'क्विन्प्रत्ययस्य कु:' इति सूत्रद्वयस्य व्याख्यानं विधेयम् ?

७. 'नश्'शब्दस्य सुविभक्तौ रूपचतुष्टयस्य सिद्धिप्रकारमुपस्थापयत ?

८. 'जक्षित्यादय: षट्' इति सूत्रस्य व्याख्यानं कार्य्यम् ?

९. 'चौ' 'अनिदितां हल् उपधाया: क्ङिति' इति सूत्रद्वयस्य व्याख्या कार्य्या ?

१०. 'वसो: सम्प्रसारणम्', 'पुंसोऽसुङ्' इति सूत्रद्वयस्य व्याख्यानं विधेयम् ?

III. **लघुप्रश्ना: (प्रत्येकं ५ अङ्का:)**

१. रूपसाधनप्रकारं ससूत्रमुपस्थापयत ?

i. महत् प्रथमैकवचने, ii. ददत् (नपुं) प्रथमाबहुवचने, iii. प्राञ्च् प्रथमैकवचने, iv. प्राञ्च् द्वितीयाबहुवचने v. अप् जस्/शस्/विभक्तौ vi. अप् भिस्विभक्तौ vii. तादृश् सुविभक्तौ viii. दिश् प्रथमाविभक्तौ ix. सजुष् सुविभक्तौ x. आशिष् सुविभक्तौ xi. धनुष् जस्विभक्तौ xii. पुंस् सुविभक्तौ xiii. वेधस् सुविभक्तौ xiv. विद्वस् भ्याम्विभक्तौ ।

२. टिप्पणी प्रदेया

1. अभ्यस्तम् 2. श्यन् 3. उपधा 4. जश्त्वम्
5. सम्प्रसारणम् 6. शप् ।

IV. **एकाङ्कप्रश्ना: (प्रत्येकं १ अङ्क:)**

१. 'त'कारान्तशब्द इत्यनेन किं बोध्यते ?

२. 'अत्वसन्तस्य ......' इति शून्यस्थानं पूरयत ?

३. 'जक्षित्यादय: षट्' इति सूत्रस्थ षट् पदेन केषां षण्णां ग्रहणम् ?

४. 'अत्वसन्तस्य चाधातो:' इति सूत्रेण किं भवति ?

५. 'शप्श्यनोर्नित्यम्' इति सूत्रेण किं क्रियते ?

६. महान् इति रूपसिद्धौ दीर्घकार्य्यनुमागमयो: कस्य पूर्वं प्रवृत्ति: ?

७. महत्शब्दस्य सम्बुद्धौ किं रूपम् ?

८. 'दीव्यत्' शब्दस्य जस्शस्विभक्तौ किं रूपम् ?

९. सुहृद् + सु इत्यत्र सिद्धं रूपं किम् ?

१०. 'सम: समि' इति सूत्रे समि इति किं विभक्त्यन्तं पदम् ?

११. 'अनिदिताम्' इति पदस्य किं विग्रहवाक्यम् ?

१२. 'तिरस्तिर्य्यलोपे' इति सूत्रेण किं भवति ?

१३. प्रत्यञ्च् + शस् इत्यत्र सिद्धं रूपं किम् ?

१४. 'वाच्'शब्दस्य प्रथमाविभक्तेरेकवचने किं रूपम् ?

१५. 'अप'शब्दस्य कस्मिन् लिङ्गे व्यवहार: ?

१६. 'अपो भि' इति सूत्रेण किं क्रियते ?

१७. 'अप्तृन्तृच्' इत्यादिना सूत्रेण कस्य दीर्घो भवति ?

१८. अप्शब्दस्य कस्मिन् वचने व्यवहार: ?

१९. को नाम नित्यविधि: ?

२०. वार् शब्दस्य कस्मिन् लिङ्गे वर्त्तमानता ?

२१.  ‘आशिष् + सु’ इत्यत्र सिद्धं रूपं किम् ?
२२.  ‘र्वोरुपधाया दीर्घ’ इत्यादिना कस्य दीर्घो भवति ?
२३.  ‘श’कारान्तस्त्रीलिङ्गशब्दस्य एकस्योदाहरणं देयम् ?
२४.  ‘नशेर्वा’ इति सूत्रेण किं क्रियते ?
२५.  ‘नश्’ इत्यत्र मूलधातुः किम् ?
२६.  घृतस्पृक् इति रूपं कस्यां विभक्तौ निष्पद्यते ?
२७.  सर्पिष् + सुप् इत्यत्र सिद्धं रूपं किम् ?
२८.  ‘स्वमोर्नपुंसकात्’ इति सूत्रेण किं भवति ?
२९.  सजुष् + सु इत्यत्र किं सिद्धं रूपम् ?
३०.  पुंसः असुङ् इत्यादेशः कुत्र भवति ?

## १०.३२. एकाङ्कप्रश्नानामुत्तराणि

१. यस्य शब्दस्य अन्त्ये ‘त’कारो विद्यते २. चाधातोः ३. जग्रति, दरिद्रति, चकासति, शासति, दीध्यते, वेव्यते ४. उपधादीर्घः ५. नित्यं नुमागमः ६. दीर्घकार्य्यम् ७. महन् ८. दीव्यन्ति ९. सुहृत् १०. प्रथमान्तम् ११. इकार इत् येषां ते, न इदित्, तेषाम्, १२. तिरि १३. प्रतीचः १४. वाक् १५. स्त्री १६. ‘त’ इत्यादेशः १७. उपधादीर्घः १८. बहुवचने १९. कृताकृतिप्रसङ्गः २०. नपुंसक २१. आशीः २२. उपधायाः इकः २३. दिश् २४. कवर्गादेशः २५. णश् २६. सुविभक्तौ २७. सर्पिःषु २८. स्वमोर्लुक् २९. सजूः ३०. सर्वनामस्थाने परतः ।

*********

# ।। एकादशखण्डः ।।

## ११.१. प्रस्तावना

सर्वादीनि सर्वनामानि (पा.सू. १/१/२७) इति सूत्रेण सर्वनामसंज्ञा विधीयते । तस्मात् सूत्रात् के शब्दा: सर्वनामसंज्ञका: भवन्तीति परिचयं प्राप्नुम: । सर्वादिगणे पठिता: ये शब्दा: सन्ति, तेषां सर्वनामसंज्ञा प्रतिपद्यते । तत्र गणे पञ्चत्रिंशत् (३५) शब्दा: पठिता: दृश्यन्ते । ते च सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम, पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक , द्वि, युष्मद्, अस्मद्, भवतु, किम् इति । एतेषु दशशब्दा: त्वत्, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, युष्मद्, अस्मद्, किम् वर्त्तन्ते, ये हलन्तसर्वनामशब्दभावेन विज्ञेया: । यतो हि तेषां शब्दानामन्त्यवर्णत्वेन हलन्तवर्णा एव विद्यन्ते । युष्मदस्मद्शब्दयो: प्रथमखण्डे चर्च्चा विहिता । अत्र तद्विहाय अन्येषां पुनरष्टानां शब्दानां त्वत्-त्यद्-तद्-यद्-एतद्-इदम्-अदस्-किम्शब्दानां खण्डेऽस्मिन् साधनं सूत्रोपक्रमपुरस्सरं विवेचनञ्च प्रस्तूयते ।

शब्दप्रकारेषु प्रयोगदशायां शब्दतात्पर्य्यमूलकविवेचनेषु च सर्वनामशब्द: विशेषणकोटौ सर्वथाऽऽविर्भवति । विशेषणशब्द: प्रधानपरमर्शक: विशेष्यशब्दानुसारं तादृशस्य शब्दस्य लिङ्गवचनव्यवस्था नियमिता जायते । महाभाष्यकार: सर्वेषां नामानि इति व्युत्पत्तिं पुरस्कृत्य अयं शब्द: अन्वर्थसंज्ञक: विशेष्यशब्दानुयायी इति प्रकटीकृतवान् । प्रधानपरामर्शकत्वरूपकारणेन विशेष्यानुगमक-भावेन च एतद्विधस्य शब्दस्य व्यवहार: लिङ्गत्रये विचार्य्यते । यदा सर्वादिशब्द: नामवाचक: तदा सर्वनामसंज्ञां न लभते, यदा तु गौणभूत: उपसर्जनीभूतो वा तदा सर्वनामसंज्ञां लभते तदुद्देश्यकं कार्य्यं प्राप्नोति च । सर्वनामशब्द: प्रयोगे प्रधानपरामर्शक इति शब्दान्तरापेक्षया विशेष: । एकस्यैव सर्वनाम्न: शब्दस्य पुँल्लिङ्गे स्त्रीलिङ्गे क्लीवलिङ्गे च भिन्नं भिन्नं रूपं प्रवर्तते । नपुंसकलिङ्गे प्रथमा-द्वितीयाविभक्तिं विहाय अन्यत्र विभक्तौ तृतीयाविभक्तित: आरभ्य सप्तमीविभक्तिं यावत् सर्वत्र पुँल्लिङ्गवद्रूपसाधनं प्रक्रियाप्रतिपादनञ्चानुष्ठीयते । इयमेव पुँल्लिङ्गनपुंसकलिङ्गयोरेतद्विधशब्दरूपसाधने विचारविधाने च विशेषता ।

'एतद्' 'इदम्' 'अदस्' इत्येते समानार्थका: शब्दा: । किन्तु इदम् शब्दस्य प्रयोग: अङ्गुलिनिर्देशयोग्ये जायते । अयं वालक: गच्छति, अत्र निश्चितस्य निर्दिष्टस्य वालकस्यावबोधनोद्देश्येन निरूपणं कर्त्तव्यमिष्यते । एषो वालक: / असौ वालक: गच्छति इति वाक्ये गमनकर्त्तु: वालकस्य निश्चितोल्लेखो नावबोध्यते । त्यद्-तद् इति इमौ द्वौ शब्दौ समानार्थकौ । तद्-यद् शब्दौ एकस्मिन् परिपूरकार्थे वाक्ये परिपूरकार्थकौ । य: आगच्छति, स: गच्छति इति वाक्ये य: .... स: इति प्रयोगेण सा प्रतिपत्ति: । उक्तं हि

इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चेतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ।।

## ११.२. उद्देश्यम्

प्रियपाठका: ! अस्मिन् खण्डे अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- के हलन्तसर्वनामशब्दा: सन्ति ? तान् जानीम: ।
- सर्वनामसंज्ञाया: किं फलं किं वा कार्य्यं ? तदवगमिष्यन्ति ।
- प्रत्येकं शब्दरूपसाधने कानि पाणिनीयानि सूत्राणि सन्ति तदधिगमिष्यन्ति ।
- सूत्रेषु पारिभाषिकशब्दा: सन्ति तज्ज्ञास्यन्ति ।
- सूत्रै: हलन्तसर्वनामप्रकृतिस्थानीयादेशा: विज्ञेया: भविष्यन्ति ।
- सूत्रै: हलन्तसर्वनामशब्दरूपसाधने प्रत्ययादेशानवगमिष्यन्ति ।
- स्त्रिलिङ्गेषु त्यद्-तद्-यद्-यतद्-इदम्-अदम्शब्दरूपसाधनं ज्ञास्यन्ति ।
- हलन्तसर्वनामशब्दानां सप्तसु विभक्तिषु रूपलिखनप्रकारमधिगमिष्यन्ति ।

## ११.३. हलन्तसर्वनामशब्दा:

सर्वादिगणेषु पठिता: शब्दा: सर्वनामशब्दभावेन ख्याता इत्यत्र विषयीकृतम् । पञ्चत्रिंशत् शब्दा: (३५) तत्र परिगणिता: भवन्ति । शब्दानामन्तिमवर्णोपस्थितिदृष्ट्या श्रेणीद्वयेन तस्य विभाग: अजन्तसर्वनामशब्दा:, हलन्तसर्वनामशब्दाश्चेति भावेन । हल्वर्णस्य अन्त्यविद्यमानतामादाय हलन्तशब्दा:, एवञ्च सर्वादिगणीयोपस्थितिमादाय च हलन्तसर्वनामशब्दा: इति प्रक्रियादशायामेतद्विधस्य शब्दस्य स्वरूपाभिधानं प्रतीयते । त्यद्, तद्, यद्, एतद्, इदम्, अदस्, किम्, युष्मद्, अस्मद् इत्येते हलन्तसर्वनामशब्दा: । बुद्धिस्थपरामर्शकत्वेन सर्वनामत्वम्, त्रिलिङ्गकत्वञ्च ब्रह्मवाचकत्वा-न्नपुंसकत्वमिति एतेषां शब्दानां क्लीवलिङ्गत्वे हेतुता ।

**स्वावलोकनप्रश्नाः**

१. सर्वनामशब्दानां कस्मिन् गणे पाठ: ?

२. कति सर्वनामशब्दा: ?

३. कति हलन्तसर्वनाम शब्दा: ?

४. केन कारणेन त्यदादिशब्दानां सर्वनामत्वम् ?

## ११.४. सर्वनामसंज्ञाया: किं फलम्

या या संज्ञा सा सा फलवती भवतीति प्रसिद्धि: । सर्वनामसंज्ञाया: फलं भवति सर्वनामसंज्ञोद्देश्यकं कार्य्यसाधनम् । आगमकार्य्यम्, आदेशकार्य्यमिति द्विविधम् । प्रत्ययस्थाने विभक्तिस्थाने च शी-स्मात्-स्मिन्-स्मै इत्यादेशा: । सुट् इति आगम: । जस् स्थाने शी, ङे स्थाने स्मै, ङसि स्थाने स्मात्, ङिस्थाने स्मिन्, आम: सुडागम: । तदर्थं पाणिनीयानि सूत्राणि इमानि सन्ति

१. जस: शी (पा.सू. ७/१/१७) जस् = शी
२. सर्वनाम्न: स्मै (पा.सू. ७/१/१४) ङे: = स्मै
३. ङसिङ्यो: स्मात्स्मिनौ (पा.सू. ७/१/१५) ङसि = स्मात्, ङि = स्मिन्
४. अमि सर्वनाम्न: सुट् (पा.सू. ७/१/५२) आम: सुट् इत्यादय:
५. त्यदादीनाम: (पा.सू. ७/२/१०३) द् = अ

**स्वावलोकनप्रश्नाः**

१. सर्वनामसंज्ञाया: किं फलम् ?

२. 'स्मै' इत्यादेश कस्या: विभक्ते: स्थाने जायते ?

३. कस्य स्थाने स्मात् इत्यादेशो जायते ?

४. सप्तम्येकवचने सर्वनाम्न: क: आदेश: जायते ?

५. जस् स्थाने श्यादेशविधाकं सूत्रं किम् ?

## ११.५. शब्दरूपसाधने प्रकरणस्थानि पाणिनीयानि सूत्राणि

हलन्तसर्वनामशब्दानां विभिन्नविभक्तौ रूपसाधने कार्य्यद्वयमभिलक्ष्यते । सर्वनामस्थानीयप्रकृतिस्थाने 'उपदिश्यमानमादेशात्मकं कार्य्यम् । एवञ्च प्रत्ययस्थानीयमादेशात्मकं कार्य्यम् । प्रत्येकं शब्दस्य कृते आदेशे भिन्नता लिङ्गभेदेन । पुनश्च प्रत्येकं प्रत्ययस्य कृते विभिन्नता । पाणिनीयसूत्रानुसारम् एषा व्यवस्था नियमिता वर्त्तते

सर्वनामसंज्ञकप्रकृतिस्थाने आदेशा:

१. त्यदादीनामम: (पा.सू.७/२/१०२)
२. किम: क: (पा.सू. ७/२/१०३)
३. तदो: स: सावनन्त्ययो: (पा.सू. ७/२/१०६)

४. इदमो मः (पा.सू. ७/२/१०८)
५. इदोऽयपुंसि (पा.सू. ७/२/१११)
६. दश्च (पा.सू. ७/२/१०९)
७. अनाप्यकः (पा.सू. ७/२/१११)
८. हलि लोपः (पा.सू. ७/२/११३)
९. नेदमसोरको: (पा.सू. ७/१/११)
१०. इदमोऽन्वादेशे (पा.सू. २/४/३२)
११. द्वितीया टौ स्स्वेन (पा.सू. २/४/३४)
१२. अदस् औ सुलोपश्च (पा.सू. ७/२/१०७)
१३. एत ईद् बहुवचने (पा.सू. ८/२/८२)
१४. अदसोसेर्दादुदोमः (पा.सू. ८/२/८०)
१५. न मु ने (पा.सू. ८/२/३)

**स्वावलोकनप्रश्नाः**

१. सर्वनामसंज्ञकहलन्तप्रकृतिस्थाने आदेशविधानार्थं कति सूत्राणि ?

२. 'त्यदादीनामः' इति सूत्रेण विधीयमान आदेशः केषां शब्दानां कृते उद्दिष्टः ?

३. 'इदोऽयपुंसि' इति सूत्रेण विधीयमान आदेशः कस्य शब्दस्य कृते उद्दिष्टः ?

४. 'अदसोसे ....' इति सूत्रेण 'द'कारस्थाने कः आदशो विधीयते ।

## ११.६. सूत्राणामर्थावगमनम्

१. त्यदादीनामः (पा.सू. ७/२/१०२)

त्यद् आदिर्येषां ते त्यदादयः, तेषां त्यादीनाम् । 'विभक्तौ' इति पदानुवृत्तिः 'अङ्गस्य इत्यधिकारः । अर्थः त्यदादीनामङ्गानामकारादेशो भवति विभक्तौ परतः । अलोऽन्त्यस्य (पा.सू.१/१/५१) इति सूत्रेण अन्त्यस्य अलः स्थाने अकारादेशो भवतीति रहस्यम् । उदा. त्यद् = स्यः – तौ – त्ये । तद् = सः – तौ – ते । यद् = यः – यौ – ये ।

२. किमः कः (पा.सू. ७/२/१०३)

'विभक्तौ' इति पदानुवृत्तिः, 'अङ्गस्य' इत्यधिकारः । अर्थः किम् इत्येतस्य स्थाने क इत्ययमादेशो भवति विभक्तौ परतः । अनेकाल् शित् सर्वस्य (पा.सू. १/१/५४) इति नियमेन

सम्पूर्णस्य किम् इत्यस्य स्थाने 'क' इत्यादेशः । उदा. किम् = कः – कौ – के ।

३. तदोः सः सावनन्त्ययोः (पा.सू. ७/२/१०६)

तश्च दश्च = तदौ तयोः तदोः । न अन्त्यौ = अनन्त्यौ तयोः । 'विभक्तौ' इति पदानुवृत्तिः । 'अङ्गस्य इत्यधिकारः । पुनश्च मण्डूकगत्या 'त्यदादीनाम्' इति पदानुवृत्तिः । अतः त्यदादीनामनन्त्ययोस्तकारदकारयोः स्थाने सकारादेशो भवति सौ परतः । उदा. त्यद् = स्यः, तद् = सः, एतद् = एषः, अदस् = असौ ।

४. इदमो मः (पा.सू. ७/२/१०८)

'सौ', 'विभक्तौ' इति पदयोरनुवृत्तिः । 'अङ्गस्य' इत्यधिकारः । इतः इदमः सौ विभक्तौ परतो मकारोऽन्तादेशो भवति । उदा. अयम्, इयम् ।

५. इदोऽय् पुंसि (पा.सू. ७/२/१११)

'सौ', 'इदमः', 'विभक्तौ' अनुवृत्त्या उपतिष्ठन्ते । 'अङ्गस्य' इत्यधिकारः । अतः इदम इद्रूपस्य पुंसि सौ विभक्तौ परतोऽय् इत्ययमादेशो भवति । उदा. इदम् = अयम् ।

६. दश्च (७/२/१०९)

इदमो मः, विभक्तौ अनुवृत्त्या उपतिष्ठन्ते । 'अङ्गस्य' इत्यधिकारः । इदमो दकारस्य स्थाने मकारादेशो भवति विभक्तौ परतः इति सूत्रार्थः । उदा. इमौ, इमे, इमम्, इमौ, इमान् ।

७. अनाप्यकः (पा.सू. ७/२/११२)

अन + आपि + अकः = अनाप्यकः । न विद्यते ककारो यस्मिन् तत् अक् तस्य = अकः । इदः इदमः, विभक्तौ इत्येतेषामनुवृत्तिः । 'अङ्गस्य' इत्यधिकारः । अर्थः इदमोऽककारस्य इद्रूपस्य स्थाने अन इत्यमादेशो भवति अपि विभक्तौ परतः । उदा. अनेन, अनयोः ।

८. हलि लोपः (पा.सू. ७/२/११३)

'अकः', 'इदः', 'इदमः', 'विभक्तौ' इत्यनुवर्त्तन्ते । अङ्गस्य इत्यधिकारः इदमोऽककारस्य इद्रूपस्य लोपो भवति हलादौ विभक्तौ परतः । उदा. आभ्याम्, एभिः, एषाम्, एषु ।

९. नेदमदसोरकोः (पा.सू. ७/१/११)

इदम् च अदस् च इदमदसौ, तयोः । अविद्यमानः ककारो ययोस्तौ अकौ, तयोः । 'भिस्', 'ऐस्' इत्यनुवृत्तिः । 'अङ्गस्य' इत्यधिकारः । इदम् अदस् इत्येतयोरककारयोर्भिस् ऐस् न भवति । उदा. एभिः, अमीभिः, ।

१०. इदमोऽन्वादेशे (पा.सू. २/४/३२)

अन्वादेशविषयस्येदमोऽनुदात्तोऽशादेशः स्यात्तृतीयादौ । अश्वचनं साकच्कार्थम् ।

११. द्वितीया टौ स्स्वेन (पा.सू. २/४/३४)

द्वितीया च टा च अश्चेति द्वितीयाटौसः तेषु द्वितीयाटौस्सु । इदसोऽन्वादेशे इत्यतः इदम् इति । अन्वादेशे इति एतदस्त्रतसोः इत्यतः 'एतद्' इति चानुवर्त्तते । अतः द्वितीयायां टोसोश्च परत

इदमेतदोरेनादेश: स्यादन्वादेशे इत्यर्थ: । यथा अनेन व्याकरणमधीतम्, एनं छन्दोऽध्यापय, अनयो: पवित्रं कुलम्, एनयो: प्रभूतं स्वम् । किञ्चित्कार्य्यं विधातुमुपात्तस्य कार्य्यान्तरं विधातुं पुनरुपादानमन्वादेश: ।

१२. अदस् औ सुलोपश्च (पा.सू. ७/२/१०७)

अदस: सौ परत: औकारादेशो भवति सोश्च लोपो भवति । उदा. असौ ।

१३. एत ईद् बहुवचने (पा.सू. ८/२/८१)

अदसोऽसेर्दात् दो म: इत्यनुवर्त्तते । अर्थ: असकारान्तस्यादसो दादुत्तरस्य एकारस्य ईकारादेशो भवति, दकारस्य च मकार: बहुवचने । उदा. अमी, अमीभि:, अमीभ्य:, अमीषाम्, अमीषु । नेदं पारिभाषिकस्य बहुवचनस्य ग्रहणम् । अन्वर्थग्रहणमेतत् । बहुनामर्थानां वचनं = बहुवचनम् ।

१४. अदसोऽसेर्दादु दोम: (८/२/८०)

अदस: + असे: + दात् + उ + द: + म: ।

अविद्यमान: सि: सकारो यस्य स: = असि तस्य = असे: । अर्थ: असकारान्तस्यादसो दानुत्तरस्य वर्णस्य उवर्णादेशो भवति, दकारस्य च मकारादेशो भवति । उदा. अमुम्, अमू, अमून्, अमुना, अमूभ्याम् ।

१५. न मु ने (पा.सू. ८/२/३)

असिद्ध: इत्यनुवृत्ति: । ने परतो यत् प्राप्नोति तस्मिन् कर्त्तव्ये मुभावो नासिद्धो भवति, किन्तु सिद्ध एव । उदा. अमुना ।

**स्वावलोकनप्रश्नाः**

१. 'त्यदादीनाम:' इति सूत्रेण किं भवति ?

२. किम: स्थाने 'क' इत्यादेशविधायकं सूत्रं किम् ?

३. 'तद्'शब्दस्य तकारस्य स्थाने 'स'कारादेश: केन सूत्रेण विधीयते ?

४. इदम: कस्यां विभक्तौ परत: मकारोऽन्तादेशो भवति ?

५. इदम इद्रूपस्य अयादेश: कुत्र भवति ?

६. 'दश्च' इति सूत्रेण किं विधीयते ?

| |
|---|
| ७. अमुम् इत्यत्र मुत्वविधायकं सूत्रं किम् ? |
| ८. 'अनाप्यक:' इति सूत्रे आपि पदेन कस्य ग्रहणम् ? |
| ९. 'एत ईद् बहुवचने' इति सूत्रोक्तबहुवचनशब्दस्य क आशय: ? |

## ११.७. लक्ष्यसिद्धि: (रूपसाधनप्रकार:)

**I. इदम्शब्द:** सन्निकृष्टेऽर्थे व्यवह्रियते ।

सर्वनामहलन्तशब्दानां त्रिषु लिङ्गेषु रूपस्थापनं दृश्यते । रूपसाधने प्रकृतिस्थाने आदेश: प्रत्ययस्थाने आदेश: / सर्वनामसंज्ञोद्देश्यकं कार्य्यमिति स्वभावत: इमानि कार्य्याणि ।

इदम् शब्द:

पुँल्लिङ्गे स्त्रीलिङ्गे क्लीवलिङ्गे चास्य शब्दस्य रूपम् । साधनस्य कृते इमानि सूत्राणि प्रतिपादनीयानि प्रयोजनीयानि च सन्ति ।

१. इदमो म: (पा.सू. ७/२/१०८) इदमो मस्य मभाव: ।
२. इदोंय पुंसि (पा.सू. ७/२/१११) इदभागस्य अयादेश: ।
३. दश्च (पा.सू.७/२/१०९) दकारस्य मकार: ।
४. अनाप्यक: (पा.सू. ७/२/११२) इद्रूपस्य स्थाने अनादेश: ।
५. हलि लोप: (पा.सू. ७/२/११३) इद् रूपस्य लोप: ।
६. नेदमदसोरको: (पा.सू. ७/१/११) भिस: ऐसादेशो न ।
७. इदमोऽन्वदेशेऽशनुदात्तस्तृतीयादौ (पा.सू. २/४/३२) भिस: ऐसादेशो न ।
८. द्वीयाटौस्स्वेन (पा.सू. २/४/३४) इदमेतदोरेनादेश: ।
९. य: सौ (पा.सू. ७/२/११०) इदमो दस्य य: ।
१०. सर्वनाम्न: स्याड्ढ्रस्वश्च (पा.सू. ७/३/११४) स्याडागम: ह्रस्व: ।
११. ङेराम्नद्याम्निभ्य: (पा.सू. ७/३/११४) ङिस्थाने आम् ।

एतेषां सूत्राणामर्थावगमनं विहितम् । एभि: सूत्रै: प्रकृतिभागे प्रत्ययभागे च विशिष्टादेश: । एतद्विहाय सर्वनामसंज्ञोद्देश्यकं कार्य्यमपि कर्त्तव्यं दृश्यते ।

इदम्–शब्द: पुँल्लिङ्गे

अयम् इदम् + सु

इदम् + स्

इदम् + स् = इदमो म: (७/२/१०८) 'म'भाव: 'अलोऽन्त्यस्य'

इति नियमेन ।
अयम् स् = इदोऽय पुंसि (७/२/११)
अयम् + ( ) = हल्ङ्यादि लोपः ।

इदम् शब्दात् सौ 'त्यादादीनामः' इति सूत्रेण अत्वे प्राप्ते अपवादत्वात् तत् प्रबाध्य 'इदमो मः' इति सूत्रेण इदमो मस्य मत्वे 'इदोऽय पुंसि' इति सूत्रेण इद्भागस्य अयादेशे सलोपे 'अयम्' इति ।

इमौ इदम् + औ
अद् अ + औ = त्यदादीनामः
इद + औ = अतो गुणे
इम + औ = दश्च
इमौ = वृद्धिरेचि

इदम् शब्दात् 'औ'विभक्तौ 'इदम् + औ' इति स्थिते 'त्यदादीनामः' इति 'म'कारस्याकारे इद अ + औ इति जाते 'अतो गुणे' इति पररूपे इद + औ इति 'दश्च' इति सूत्रेण दकारस्य स्थाने 'म'कारे इम + औ इत्यवस्थायां 'वृद्धिरेचि' इति सूत्रेण वृद्धौ 'इमौ' रूपम् ।

इमे इदम् + जस्
इदम् + शी
इदम् + ई
इद + अ + ई = त्यदादीनामः
इद + ई = अतो गुणे
इम + ई = दश्च
इमे = आद्गुणः

इमम् इदम् + अम्
इद + अ + अम् = त्यदादीनामः
इद् + अम् = अतो गुणे
इम + अम् = दश्च
इमम् = अमि पूर्वः ।

इमान् इदम् + शस्
इद + अ + शस् = त्यदादीनामः
इद् + शस् = अतो गुणे
इम + शस् = दश्च
इम + अस् = लशक्वतद्धिते
इमास् = अकः सवर्णे दीर्घः ।

इमान् = तस्माच्छसो: न: पुंसि ।

अनेन इदम् + टा
इदम् + आ
इद अ + आ = त्यदादीनाम:
इद + आ = अतो गुणे
अन् अ + आ = अनाप्यक:
अन + आ
अन + इन = टाङसिङसामिनात्स्या: (७/१/१२)
अनेन = आद्गुण: ।

आभ्याम् इदम् + भ्याम्
इद अ + भ्याम् = त्यदादीनाम:
इद + भ्याम् = अतो गुणे
इद + अ + भ्याम् = हलि लोप:
आ + भ्याम् = सुपि च
आभ्याम् ।

इदम् शब्दात् भ्यामि विभक्तौ अत्वे पररूपे इद् + भ्याम् इति जाते 'हलि लोप:' इत्यनेन 'अलोऽन्त्यस्य इति परिभाषा अन्त्य'द'कारस्य लोपे प्राप्ते 'नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे' इति परिभाषया अलोऽन्त्यविध्यभावे इद्भागस्यैव लोपे 'अभ्याम्' इति स्थिते 'आद्यन्तवदेकस्मिन्' इत्येकस्मन्नेवाऽधिकारे अन्तवद्भावेनादन्तत्वं मत्वा 'सुपि च' इति दीर्घे 'आभ्याम्' इति रूपम् ।

एभि: इदम् + भिस्
इद + अ + भिस् = त्यदादीनाम:
इद + भिस् = अतो गुणे
इद + अ + भिस् = हलि लोप:
ए + भिस् = बहुवचने झल्येत
एभिस्
एभि: ।

इदम् + भिस् इति स्थिते त्यदाद्यत्वे पररूपे 'हलि लोप:' इति इदो लोपे अ + भिस् इति स्थिते 'अतो भिस ऐस' इति प्राप्ते 'नदमदसोरको:' इति तन्निशेधे 'बहुवचने झल्येत' इति एत्वे स्कारस्य रुत्वे विसर्गे च एभि: इति रूपम् ।

एभ्य इदम् + भ्यस्
एषु इदम् + सुप्

'एभिः' इति रूपसाधनवत् सर्वं कार्य्यम् भ्यस् विभक्तौ 'एभ्यः' 'सुप्' विभक्तौ षत्वे 'एषु' इति रूपसाधनप्रकारः अवगन्तव्यः ।

अस्मै इदम् + ङे

अस्मात् इदम् + ङसि

अस्मिन् इदम् + ङि

अस्मै इदम् + ङे

इद + अ + ङे = त्यदादीनामः

इद + अ + ङे = अतो गुणे

इद् + अ + ङे = हलिलोपः

अ + स्मै = सर्वनाम्नः स्मै

अस्मै ।

एवं ङसि विभक्तिस्थाने 'स्मात्' इत्यादेशे ङि विभक्तिस्थाने स्मिन् आदेशे 'ङसिङयोः स्मात् स्मिनौ' इति सूत्रेण अस्मात् अस्मिन् इति रूपसिद्धिः ।

एषाम् इदम् + आम्

इद + अ + आम् = त्यदादीनामः

इद + आम् = अतो गुणे

इद् + सुट् + आम् = आमि सर्वनाम्नः सुट्

इद् + अ + म् + आम् = हलि लोपः

अ + ष् + आम् = आदेशप्रत्यययोः

ए + ष् + आम् = बहुवचने झल्येत

एषाम् ।

**इदम् – नपुंसकलिङ्गे**

प्रथमा / द्वितीया विभक्तौ इदम् - इमे - इमानि

इदम् इदम् + सु / अम्

इदम् + ( ) / ( ) = स्वमोर्नपुंसकात्

इदम् ।

इमे इदम् + औ / औट् इम + ई = लशक्वतद्धिते

इद म् + शी = नपुंसकाच्च इमे = आद्गुणः

इद + अ+ शी = त्यदादीनामः

इद + शी = अतो गुणे

इम + शी = दश्च

इमानि इदम् + जस् / शस्

इदम् + शि = जश्शसोश्शि:

इद अ + शि = त्यदादीनाम:

इद + शि = अतो गुणे

इम + शि = दश्च

इम + नुम् + शि = नपुंसकस्य झलच:

इम + न् + शि

इम + न् + इ = लशक्वतद्धिते

इमा + न् + इ = सर्वनामस्थाने चासम्बुद्धौ

इमानि ।

तृतीयाविभक्तित: सप्तमीविभक्तिं यावत् पुँल्लिङ्गवद्रूपं साधनीयं जायते ।

**इदम् स्त्रीलिङ्गे**

इदम् इदम् + सु

इयम् + सु = य: सौ (७२/११०)

इयम् + स् = इदमो म:

इयम् + ( ) = हल्ङ्यादिभ्यो ......

इयम् ।

इदम् + सु इति स्थिते दकारस्य 'य: सौ' इत्यनेन सूत्रेण 'य'कारे 'इयम् + स्' इति स्थिते त्यदाद्यत्वं बाधित्वा 'इदमो म:' इति मकारस्य मत्वे हल्ङ्यादिना सुलोपे 'इयम्' इति रूपम् ।

इमे इदम् + औ / औट्

इद + अ + औ/औट = त्यदादीनाम:

इद + औ/औट = अतो गुणे

इद + टाप् + औ/औट = अजाद्यतष्टाप्

इम + आ + औ/औट = दश्च

इमा + औ = अक: सवर्णे दीर्घ:

इमा + शी = औङ आप:

इमा + ई = लशक्वतद्धिते

इमे = आद्गुण: ।

इमा: इदम् + जस् / शस्

इमा + अस्

इमास् = अकः सवर्णे दीर्घः

इमाः = रुत्वे, विसर्गे च ।(टापि अदन्तत्वाभावात् 'जसः शी'इति न)

अनया इदम् + टा

इद् + अ + टा = त्यदादीनामः

इद् + टा = अतो गुणे

इद + टाप् + टा = अजाद्यतष्टाप्

इद + आ + आ = अनुबन्धलोपे

इदा + आ = अकः सवर्णे दीर्घः

अन् + आ + आ = अनाप्यकः

अन् + ए + आ = आङि चापः

अन् + अय् + आ = एचोऽयवायावः

अनया ।

इदम् + आ (टा) इति स्थिते अत्वं, पररूपम्, टाप्, 'अनाप्यकः' इत्यनेन इद् इत्यस्य अन् आदेशः अन् आ आ इति स्थिते 'आङि चापः' इत्येत्वे अयादेशे अनया इति रूपम् ।

अनयोः इदम् + ओस् इति स्थिते इदमः इदः अनादेशे अत्वपररूपटाप्सु 'आङि चापः' इत्येत्वे अयादेशे रुत्वे विसर्गे ।

आभ्याम् इदम् + भ्याम्

आभ्यः इदम् + भ्यस् इति स्थिते इदो लोपे अत्वे पररूपे टापि च इदं रूपम्

आभिः इदम् + भिस्

अस्यै इदम् + ङे अस्यामवस्थायां अत्वपररूपटाप्सु स्याडागमे

अस्याः इदम् + ङसि/ङस् ह्रस्वत्वे इदो लोपः ।

इदम् + ङे

इदरू + अ + ए = त्यदादीनामः

इद् + ए = अतो गुणे

इद् + टाप् + ए = अजाद्यतष्टाप्

इद + आ + ए

इद + स्याट् + आ + ए = सर्वनाम्नः स्याड्ढ्रस्वश्च ।

इद्+ अ + स्या + ए = हलि लोपः

अ + स्यै = वृद्धिरेचि

अस्यै ।

| | | |
|---|---|---|
| एवम् | इद् + अ + स्याटस + ङसि / ङस् = अस्या: इति । | |
| आसाम् | इदम् + आम् इति स्थिते अत्वपररूपटाप्सु सुटि इदो लोप: = आसाम् | |
| अस्याम् | इदम् + ङि इति स्थिते अत्वपररूपटाप्सु 'ङेराम्नद्याम्निभ्य:' इति ङेरामि स्याडागमे ह्रस्वत्वे इदो लोपे = अस्याम् । | |

एनाम्, एने, एना: । एनया, एनयो: द्वितीयाटास्स्वेन इत्येनादेशे टापि रमाशब्दवद् रूपाणि जायन्ते ।
एनम्, एनौ, एनान् । एनेन, एनयो: पुँल्लिङ्गे रूपम् । तत्र टाप् इत्यस्याभाव: ।

इदम् शब्दात् 'अव्ययसर्वनाम्नामकच् प्राक् टे:' इति अकच् प्रत्यये तु अयकम् – इमकौ – इमके । इमकं – इमकौ – इमकान् । इमकेन – इमकाभ्याम् इति रूपम् । अत्र 'अनाप्यक:', 'हलि लोप:', नेदमदसोरको:' इति अत्र न प्रवर्त्तते कारकयोगे तन्निषेधात् ।

त्यदादे: सम्बोधनं नास्ति, प्रयोगादर्शनात् । तेनैव कारणेन 'इदम्' शब्दस्य सम्बोधने रूपं नास्ति ।

| | पुँल्लिङ्गे रूपम् | | | नपुंसकलिङ्गम् | | | स्त्रीलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| **विभ.** | **१ व.** | **२ व** | **बहु.व** | **१ व.** | **२ व** | **बहु.व** | **१ व.** | **२ व** | **बहु.व** |
| **प्रथमा** | अयम् | इमौ | इमे | इदम् | इमे | इमानि | इयम् | इमे | इमा: |
| **द्वितीया** | इयम् | इमौ | इमान् | इदम् | इमे | इमानि | इमाम् | इमे | इमा: |
| **तृतीया** | अनेन | आभ्याम् | एभि: | पुँल्लिगवद्रूपम् | | | अनया | आभ्याम् | आभि: |
| **चतुर्थी** | अस्मै | आभ्याम् | एभ्य: | | | | अस्यै | आभ्याम् | आभ्य: |
| **पञ्चमी** | अस्मात् | आभ्याम् | एभ्य: | | | | अस्या: | आभ्याम् | आभ्य: |
| **षष्ठी** | अस्य | अनयो: | एषाम् | | | | अस्या: | अनयो: | आसाम् |
| **सप्तमी** | अस्मिन् | अनयो: | एषु | | | | अस्याम् | अनयो: | आसु |

**स्वावलोकनप्रश्ना:**

१. 'त्यदादीनाम:' इति सूत्रस्य अपवादभूतं सूत्रं किम् ?

२. 'इदमो म:' इति सूत्रेण किं भवति ?

३. इमम् इति सिद्धये 'द'कारस्य मकार: केन सूत्रेण विधीयते ?

४. इद्रूपस्य अनादेश: कुत्र विभक्तौ विधीयते ?

५. 'य: सौ' इति सूत्रेण किं विधीयते ?

६. स्याडागमः कुत्र विभक्तौ विधीयते ?

७. 'हलि लोपः' इति सूत्रेण कस्य लोपो भवति ?

८. इमानि इति कुत्र विभक्तौ रूपम् ?

९. त्यदादेः सम्बोधनं कथं नास्ति ?

१०. अनया इति रूपसिद्धिं विचारयत ?

११. इद्भागस्य अयादेशः कस्मिन् लिङ्गे प्रवर्त्तते ?

१२. इदम्शब्दस्य पुँल्लिङ्गे तृतीयाबहुवचने किं रूपम् ?

**II. अदस्–शब्दः** विप्रकृष्टेऽर्थे व्यवह्रियते ।

अदस्–शब्दः पुँल्लिङ्गे स्त्रीलिङ्गे क्लीवलिङ्गे चास्य शब्दस्य रूपम् ।

साधनस्य कृते इमानि सूत्राणि प्रतिपादनीयानि प्रयोजनीयानि च सन्ति ।

१. अदस् औ सुलोपश्च (पा.सू. ७/२/१०७) 'सकारस्थाने औकारः, सुलोपः ।

२. एत ईद् बहुवचने (पा.सू. ८/२/८१) एत् स्थाने ईकारः ।

३. अदसोसेर्दादुदोमः (पा.सू. ८/२/८०) उत्वम्, मत्वम् ।

४. नमुने (पा.सू. ८/२/३) मुभावः सिद्धः ।

५. नेदमदसोरकोः (पा.सू. ७/१/११) भिसः स्थाने ऐसादेशो न भवति ।

६. प्रथमयोः पूर्वसवर्णः (पा.सू.) पूर्वसवर्णदीर्घः ।

एतेषां सूत्राणामर्थागमनं विहितम् । एभिः सूत्रैः प्रकृतिभागे प्रत्ययभागे च विशिष्टादेशः । एतद्विहाय सर्वनामसंज्ञोद्देश्यकं कार्य्यमपि कर्त्तव्यं दृश्यते ।

अदस्–शब्दः पुँल्लिङ्

असौ अदस् + सु

अद + औ + सु अदस् औ सुलोपश्च

अ स + औ तदोः सः सावनन्त्योः

असौ = वृद्धिरेचि

अदस् शब्दात् सुविभक्तौ 'त्यदादीनामः' इति सूत्रेण अत्वे प्राप्ते अपवादत्वात् तं प्रबाध्य 'अदस औ

सुलोपश्च' इति सूत्रेण 'स'कारस्य स्थाने औकारे पुनश्च 'सु' इत्यस्य लोपे 'तदो: स: सौ' इति 'द'कारस्य स्थाने 'स'कारे वृद्धौ असौ इति रूपम् ।

अमू = अदस् + औ / औट्
अद अ + औ = त्यदादीनाम:
अद् + औ = अतो गुणे
अदौ = वृद्धिरेचि ।
अमू = अदसो:सेर्दादुदोम:

अमी = अदस् + जस्
अदम् + शी = जस: शी
अद + अ+ शी = त्यदज्ञापदहीनाम:
अद् + शी = अतो गुणे
अद + ई = लशक्वतद्धिते

अदे = आद्गुण:

अमी = एत ईद्बहुवचने ।

अमुम् = अदस् + अम् इति स्थिते त्यदाद्यत्वं पररूपम्, अमि पूर्व:, उत्वमत्वे ।

अमून् = अदस् + शस् इति स्थिते त्यादाद्यत्वं पररूपम्, पूर्वसवर्णे दीर्घ:, नत्वम्, ऊत्वमत्वे ।

अमुना = अदस् + टा इति स्थिते त्यादाद्यत्वं, पररूपम्, अत्वमत्वे च । शेषो ध्यसखि इति घिसंज्ञायाम् 'आङो नाऽस्त्रियाम्' इति नाभाव: । 'न मु ने' इति सूत्रेण नाभावे कर्त्तव्ये कृते च मुभावो नासिद्ध: ।

अमूभ्याम् अदस् + भ्याम् इति स्थिते त्यादाद्यत्वे पररूपे 'सुपि च' इति दीर्घे दस्य मत्वम् आकारस्य ऊत्वम् इति ।

अमीभि: अदस् + भिस् इति स्थिते त्यादद्यत्वं, पररूपम् । नेदमदसोरको: इति ऐस् निषेध: 'बहुवचने झल्येत' इत्येत्वम् 'एत ईद्बहुवचने' इति ईत्वमत्वे । इति ।

अमुस्मै अदस् + ङे इति स्थिते त्यादद्यत्वं, पररूपम्, 'सर्वनाम्न: सौ' इति ङे: स्थाने स्मै, उत्वमत्वे षत्वे इति ।

अमुस्मात अदस् + इति सर्वनाम्न: स्मात्स्मिनौ

अमुस्मिन् अदस् + ङि अदसोसे ........ म: ।

अमीभ्य: अदस् + भ्यस् त्यदाद्यत्वं, पररूपम्, बहुवचने झल्येत इत्येत्वम् इत्वमत्वे इति ।

अमुयोः अदस् + ओस् त्यदाद्यत्वं, पररूपम्, 'ओसि च' अयादेशः अत्वमत्वे इति ।

अमीषाम् अदस् + आम् त्यदाद्यत्वं, पररूपम्, आमि सर्वनाम्नः सुट् इति सुट् एत्वम्, ईत्वम्, मत्वम्, षत्वम् इति ।

अमीषु अदस् + सुप् त्यदाद्यत्वं, पररूपम्, एत्वम्, ईत्वमत्वे, षत्वम् इति ।

**अदस् नपुंसकलिङ्गः**

| | | | |
|---|---|---|---|
| प्रथमा | अदः | अमू | अमूनि |
| द्वितीया | अदः | अमू | अमूनि |

तृतीयाविभक्तितः सप्तमीविभक्तिं यावत् पुँल्लिङ्गद्रूपं प्रवर्त्तते ।

अदः अदस् + सु

अदस् + ( ) = स्वमोर्लुक्

अदः = रुत्वे विसर्गे च । सान्तत्वात् न मुत्वम् पुनश्च लुका लुप्तत्वात् त्यदाद्यत्वं न ।

अमू अदस् + औ / औट् औङः शी, त्यदाद्यत्वं, पररूपं, गुणः, ऊत्वमत्वे इति ।

अमूनि अदस् + जस् / शस् जश्शसोश्शिः, त्यदाद्यत्वं, पररूपम्, अजन्तत्वात् नुम्, उपधादीर्घः, ऊत्वमत्वे इति ।

**अदस् स्त्रीलिङ्गे**

असौ अदस् + सु पुंवद्रूपम् ।

अमू अदस् + औ / औट् त्यदादीनामः इत्येते पररूपे टापि औङः शीभावे आद्गुणे अदे इति स्थिते एकारस्य ऊत्वम्, दस्य मत्वम् इति ।

अमूः अदम् + जस् अत्वपररूपटाप्सु पूर्वसवर्णदीर्घे उत्वमत्वे । अदन्तत्वाभावात् जसः शीभावो न ।

अमूम् अदम् + अम् पुंवद्रूपम्, केवलं 'ऊ' त्वमत्र विशेषः ।

अमुया अदम् + टा अत्वपररूपटाप्सु आङि चापः इत्येत्वे आयादेशे उत्वमत्वे इति ।

अमूभ्याम् अदम् + भ्याम्

अमूभिः अदस् + भिस् अत्वपररूपटाप्सु ऊत्वमेव इति ।

अमूभ्यः अदस् + भ्यस्

अमुष्यै अदस् + ङे अत्वपररूपटाप्सु स्याड्ढ्रस्वौ, उत्वमत्वे षत्वमिति भाव:

अमुष्या: अदस् + ङसि / ङस् ङेविभक्तिवत् कार्य्यम्, केवलं रुत्वविसर्गौ।

अमुयो: उदस् + ओस् अत्वपररूपटाप्सु 'आङि चाप:' इत्येत्वे अयादेशे मुत्वे रुत्वे विसर्गे । इति ।

अमूषाम् अदस् + आम् अत्वपररूपटाप्सु सुटि अत्वमत्वे 'स'स्य 'ष'त्वम्।

अमुष्याम् अदस् + ङि अत्वपररूपटाप्सु, ङेरामि स्याडसढ्रस्वौ, मुत्वम् इति।

अमूषु अदस् + सुप् अत्वपररूपटाप्सु, ऊत्वमत्वे षत्वमिति ।

**विहितानि कार्य्याणि**

अत्वम् 'त्यदादीनाम:' इति सूत्रेण ।

पररूपम् 'अतो गुणे' इति सूत्रेण ।

टाप् ''अजाद्यतष्टाप्' इति सूत्रेण ।

षत्वम् 'आदेशप्रत्यययो:' इति सूत्रेण ।

पूर्वसर्वर्णदीर्घ: 'प्रथमयो: पूर्वणवर्ण:' इति सूत्रेण ।

ऊत्व – मत्व 'अदसोसे ....' इति सूत्रेण ।

एत्वम् 'आङि चाप:' इति सूत्रेण ।

| | पुँल्लिङ्गे रूपम् | | | नपुंसकलिङ्गम् | | | स्त्रीलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| **विभ.** | **१व.** | **२व** | **बहु.व** | **१व.** | **२व** | **बहु.व** | **१व.** | **२व** | **बहु.व** |
| **प्रथमा** | असौ | अमू | अमी | अद: | अमू | अमूनि | असौ | अमू | अमू: |
| **द्वितीया** | अमुम् | अमू | अमून् | अद: | अमू | अमूनि | अमूम् | अमू | अमू: |
| **तृतीया** | अमुना | अमूभ्याम् | अमीभि: | | | | अमुया | अमूभ्याम् | अमूभि: |
| **चतुर्थी** | अमुष्मै | अमूभ्याम् | अमीभ्य: | पुँल्लिङ्गवद्रूपम् | | | अमुष्यै | अमूभ्याम् | अमूभ्य: |
| **पञ्चमी** | अमुष्मात् | अमूभ्याम् | अमीभ्य: | | | | अमुष्या: | अमूभ्याम् | अमूभ्य: |
| **षष्ठी** | अमुष्य | अमुयो: | अमीषाम् | | | | अमुष्या: | अमुयो: | अमूषाम् |
| **सप्तमी** | अमुस्मिन् | अमुयो: | अमीषु | | | | अमुष्याम् | अमुयो: | अमूषु |

**स्वावलोकनप्रश्नाः**

१. 'असौ' इत्यत्र सुलोपविधायकं सूत्रं किम् ?

२. 'एत ईद् बहुवचने' इति सूत्रेण किं क्रियते ?

| |
|---|
| ३. ‘असौ’ इति सिद्धये ‘त्यदादीनामः’ इति सूत्रं कथं बाध्यते ? |
| ४. अदः इति कस्यां विभक्तौ रूपम् ? |
| ५. अमी अमूः इत्यनयोः को भेदः ? |
| ६. ‘न मू ने’ इति सूत्रस्य किं फलम् ? |
| ७. अदस् शब्दस्य पुँल्लिङ्गे षष्ठीबहुवचने किं रूपम् ? |
| ८. अदस् शब्दस्य स्त्रीलिङ्गे आम्विभक्तौ किं रूपम् ? |
| ९. अदस् शब्दस्य त्रिलिङ्गेषु कस्यां विभक्तौ समानरूपम् ? |
| १०. अदस् शब्दः कस्मिन्नर्थे व्यवह्रियते ? |

**III. त्यद्, तद्, एतद् शब्दाः**

त्यद् – तद् इति दूरस्थपरोक्षे द्योतितेऽर्थे व्यवह्रियते ।
एतद् इति समीपतरवर्त्तिन्यर्थे व्यवह्रियते ।
पुँल्लिङ्गे स्त्रीलिङ्गे क्लीवलिङ्गे च रूपाणि प्रवर्त्तन्ते ।
साधनस्य कृते इमानि सूत्राणि प्रतिपादनीयानि प्रयोजनीयानि च सन्ति ।

**पुँल्लिङ्गस्य कृते**

१. त्यदादीनामः (पा.सू. ७/२/१०२) अत्वम्
२. अतो गुणे (पा.सू. ६/१/९७) पररूपम्
३. तदोः सः सावनन्त्ययोः (पा.सू. ७/२/१०६) ‘स’त्वम्
४. जसः शी (पा.सू. ७/१/१७) जस् स्थाने शी
५. अमि पूर्वः (पा.सू. ६/१/१०७) पूर्वरूपम्
६. तस्माच्छसो: नः पुंसि (पा.सू. ६/१/१०३) शसः ‘स’स्य नकारः
७. प्रथमयोः पूर्वणवर्णः (पा.सू. ६/१/१०२) पूर्वसवर्णदीघः
८. टाङसिङसामिनात्स्याः (पा.सू. ७/१/१२) टा स्थाने इनादेशः

९. अतो भिस् ऐस् (पा.सू. ७/१/९) भिस् = ऐस्

१०. सुपि च (पा.सू. ७/३/१०२) 'अ'कारस्य दीर्घः

११. बहुवचने झल्येत (पा.सू. ७/३/१०३) 'अ'कारस्य 'ए'कारः

१२. ओसि च (पा.सू. ७/३/१०४) अतोऽङ्गस्य एकारः

१३. सर्वनाम्नः स्मै (पा.सू. ७/१/१४) ङे = स्मै

१४. ङसिङ्योः स्मात्स्मिनौ (पा.सू. ७/१/१५) ङसि = स्मात्, ङि = सिम्न्

१५. आमिसर्वनाम्नः सुट् (पा.सू. ७/१/५२) आमः सुडागमः ।

**स्त्रीलिङ्गस्य कृते**

१. त्यदादीनामः (पा.सू. ७/२/१०२)

२. अतो गुणे (पा.सू. ६/१/९७)

३. अजाद्यतष्टाप् (पा.सू. ४/१/४) स्त्रीत्वात् अदन्तत्वमादाय टाप्

४. आङि चाऽऽपः (पा.सू. ८/३/१०५) आवन्तस्य एकारः

५. सर्वनाम्नः स्याड्ढ्रस्वश्च (पा.सू. ७/३/११४) ङितः स्याट्, ह्रस्वः

६. ङेराम्नद्याम्नीभ्यः (पा.सू. ७/३/११६) ङि स्थाने आम् ।

**क्लीवलिङ्गस्य कृते**

१. स्वमोर्नपुंसकात् (पा.सू. ) स्वमोर्लुक्

२. नपुंसकाच्च (पा.सू. ७/१/१९) औ / औट् स्थाने = शी

३. जश्शसोः शिः (पा.सू. ७/१/२०) जस् / शस् स्थाने 'शि'

४. नपुंसकस्य झलचः (पा.सू. ७/१/७२) नुमागमः

५. सर्वनामस्थाने चाऽसंम्बुद्धौ (पा.सू. ६/४/८) नान्तोपधायाः दीर्घः

एषु मुख्यं सूत्रं भवति 'तदोः सः सावनन्त्ययोः', येन सूत्रेण 'त'कारस्य स्थाने 'स'कारः एव विधीयते ।

तद् = तनुते विस्तृतो भवतीति तद् । तन् + अदि 'त्यजितनियजिभ्यो डित्' (उणा. १/१३२) वर्त्तमानकालिकप्रक्रमविषयवाचकः भूतकालिकप्रक्रमविषयवाचकश्च । यच्छब्दमपेक्ष्य प्रयुज्यते।

**तद् पुँल्लिङ्गे**

सः तद् + सु = 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' पररूपे 'तदोः सः सावनन्त्ययोः इति 'त'कारस्य 'स'कारे सोरुत्वे विसर्गे च सः इति रूपम् ।

तौ तद् + औ/औटस त्यदाद्यत्वे पररूपे वृद्धौ तौ इति ।

ते तद् + जस् = त्यदाद्यत्वे पररूपे 'जसः शी' इति सज् स्थाने श्यादेशे अनुबन्धलोपे त + इ इति ततश्च गुणे 'ते' इति रूपम् ।

तम् तद् + अम् = त्यदाद्यत्वे पररूपे 'अमि पूर्वः' इति पूर्वरूपे 'तम्' इति ।

तान् तद् + शस् = त्यदाद्यत्वे पररूपे शस: शकारस्य लोपे 'प्रथमयो: पूर्वसवर्ण:' इति पूर्वसवर्णे दीर्घे 'तस्माच्छसो: न पुंसि' इति 'स'कारस्य 'न'कारे रूपम्।

तेन तद् + टा = त्यदद्यत्वे पररूपे 'टाङसिङसा ...' इत्यादिना 'टा' इत्यस्य इनादेशे गुणे 'तेन' इति ।

ताभ्याम् तद् + भ्याम् = त्यदद्यत्वे पररूपे 'त + भ्याम्' इति 'सुपि च' इति दीर्घे ताभ्याम् इति रूपम् ।

तै: तद् + भिस् = त्यदद्यत्वे पररूपे 'अतो भिस् ऐस्' इति ऐसादेशे वृद्धौ सोरुत्वे विसर्गे च तै: इति ।

तेभ्य: तद् + भ्यस् = त्यदद्यत्वे पररूपे 'त + भ्यस्' इति 'बहुवचने झल्येत' इति एत्वे 'तेभ्य:' इति रूपम् ।

तस्मै तद् + ङे त्यदाद्यत्वे पररूपे ङे = स्मै, ङसि = स्मात्, ङि = स्मिन् इत्यादेशे
तस्मिन् तद् + ङि रूपम् । 'सर्वनाम्न: सौ' इति स्मै । 'ङसिङ्यो: स्मात्स्मिनौ' इति
तस्मात् तद् + ङसि स्मात्, स्मिन् ।

तस्य तद् + ङस् = त्यदद्यत्वे पररूपे 'टाङसिङसामिनात्स्या:' इति ङस: स्थाने स्यादेशे ङस: स्थाने स्यादेशे तस्य इति रूपम् ।

तयो: तद् + ओस् = त्यदाद्यत्वे पररूपे 'ओसि च' इति 'ए'कारे अयादेशे रुत्वे विमर्शे च रूपम् ।

तेषाम् तद् + आम् = तद् + आम् त्यदद्यत्वे पररूपे 'आमि सर्वनाम सुट्' इति सुडागमे 'बहुवचने झल्येत' इति एत्वे ततश्च षत्वे रूपम् ।

तेषु तद् + सुप् = त्यदद्यत्वे पररूपे 'बहुवचने झल्येत' इति एत्वे ततश्च षत्वे रूपम् ।

**तद् क्लीवलिङ्गे**

| | | | |
|---|---|---|---|
| प्रथमा | ततै | ते | तानि |
| द्वितीया | तत् | ते | तानि |

तृतीयात: सप्तमीं यावत् पुँल्लिङ्गवद्रूपम् ।

तत् तद् + सु/आम् 'स्वमोर्नपुंसकात्' इति स्वमोर्लुक् । लुका लुप्तत्वात् त्यदाद्यत्वं पररूपं, 'तदो: स सौ' इति सत्वं च न भवति ।

ते तद् + औ/औट् त्यदद्यत्वे पररूपे 'नपुंसकाच्च' इति सूत्रेण विभक्तिस्थाने श्यादेशे अनुबन्धलोपे गुणे 'ते' इति रूपम् ।

तानि तद् + जस्/शस् त्यदाद्यत्वे पररूपे 'जश्शसो: शि:' इति विभक्तिस्थाने श्यादेशे 'नपुंसकस्य झलच:' इति नुमागमे 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्युपधादीर्घे 'तानि' इति रूपम् ।

**तद्  स्त्रीलिङ्गे**

सा  तद् + सु  त्यदद्यत्वे पररूपे अदन्तत्वाट्टापि 'अजाद्यतष्टाप्' इति सूत्रेण 'तदोः सः सावनन्त्ययोः' इति सत्वे 'सा' इति रूपम् ।

ते  तद् + औ  त्यदद्यत्वे पररूपे अदन्तत्वात् 'अजाद्यतष्टाप्' इति टापि 'औङ आपः' इति औङः स्थाने श्यादेशे अनुबन्धलोपे गुणे 'ते' इति रूपम् ।

ताः  तद् + जस्  त्यदद्यत्वे पररूपे अदन्तत्वात् 'अजाद्यतष्टाप्' इति टापि अनुबन्ध–

कार्य्ये 'ताः' इति 'दीर्घाज्जसि च' इति निषेधात् पूर्वसवर्णदीर्घो न ।

ताम्  तद् + अम्  अत्वे पररूपे टापि ततश्च 'अमि पूर्वः' इति पूर्वरूपे ।

तया  तद् + टा  त्यदाद्यत्वे पररूपे अदन्तत्वात् स्त्रियां टापि 'आङि चापः' इति 'आ'कारस्य स्थाने एत्वे अयादेशे 'तया' इति ।

ताभ्याम्  तद् + भ्याम्
ताभिः  तद् + भिस्
ताभ्यः  तद् + भ्यस्
तासु  तद् + सुप्
— त्यदद्यत्वे पररूपे अदन्तत्वात् 'अजाद्यतष्टाप्' ता इति विभक्तियोगात् इष्टं रूपम् ।

तस्मै  तद् + ङे  त्यदाद्यत्वे पररूपे अदन्तत्वात् 'अजाद्यतष्टाप्' इति टापि अनुबन्ध–लोपे ता + ए इति ततश्च 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे ह्रस्वे 'त + स्या + ए' इति स्थिते वृद्धौ 'तस्यै' इति रूपम् ।

तस्याः  तद् + ङसि/ङस्  त्यदद्यत्वे पररूपे अदन्तत्वात् 'अजाद्यतष्टाप्' इति टापि 'सर्वनाम्नः स्याड्दस्वश्च' इति स्याडागमे ह्रस्वे त+स्या+अम् इति स्थिते सवर्णदीर्घे 'स'कारस्य रुत्वे विसर्गे तस्याः इति रूपम् ।

तासाम्  तद् + आम्  त्यदद्यत्वे पररूपे अदन्तत्वाट्टापि 'आमि सर्वनाम्नः सुट्' इति अनुबन्धलोपे सवर्णदीर्घे 'तासाम्' इति रूपम् ।

तयोः  तद् + ओस्  अत्वे पररूपे टापि 'ता + ओस्' इति ततश्च 'ओसि च' इति आकारस्य एत्वे अयादेशे 'स'कारस्य रुत्वे विसर्गे च 'तयोः' इति ।

तस्याम्  तद् + ङि  अत्वे पररूपे टापि 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे आकारस्य ह्रस्वे 'ङेराम्नद्याम्नीभ्यः' इति 'ङि' स्थाने 'आम्' इत्यादेशे सवर्णदीर्घे 'तस्याम्' इति ।

**रूपलिखनप्रकार:**

| | पुँल्लिङ्गे रूपम् | | | नपुंसकलिङ्गम् | | | स्त्रीलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| **विभ.** | **१ व.** | **२ व** | **बहु.व** | **१ व.** | **२ व** | **बहु.व** | **१ व.** | **२ व** | **बहु.व** |
| **प्रथमा** | स: | तौ | ते | तत् | ते | तानि | सा | ते | ता: |
| **द्वितीया** | तम् | तौ | तान् | तत् | ते | तानि | ताम् | ते | ता: |
| **तृतीया** | तेन | ताभ्याम् | तै: | | | | तया | ताभ्याम् | ताभि: |
| **चतुर्थी** | तस्मै | ताभ्याम् | तेभ्य: | पुँल्लिङ्गवद्रूपम् | | | तस्यै | ताभ्याम् | ताभ्य: |
| **पञ्चमी** | तस्मात् | ताभ्याम् | तेभ्य: | | | | तस्या: | ताभ्याम् | ताभ्य: |
| **षष्ठी** | तस्य | तयो: | तेषाम् | | | | तस्या: | तयो: | तासाम् |
| **सप्तमी** | तस्मिन् | तयो: | तेषु | | | | तस्याम् | तयो: | तासु |

**एतद् शब्द:**

पु. एष: एतौ एते ।
स्त्री. एषा एते एता: ।
क्ली. एतत् एते एतानि ।
अन्वादेशविषये एनम् एनौ एनान् इति रूपम् ।

एवं त्रिषु लिङ्गेषु सर्वासु विभक्तिषु च 'तद्' इति शब्दवद्रूपसाधनं बोधनीयम् । केवलं सु-विभक्तौ 'त'कारस्य 'तदो: स: सावनन्त्ययो:' इति 'स'कारे तस्य पुन: 'आदेशप्रत्यययो:' इति ष-त्वम् ।

**त्यद् शब्द:**

पुं. स्य: त्यौ त्ये ।
स्त्री. स्यत् त्ये त्यानि ।

एवं त्रिषु लिङ्गेषु सर्वासु विभक्तिषु च 'तद्' इति शब्दसवद्रूपसाधनं बोधनीयम् । केवलं 'सु'विभक्तौ 'त' इत्यस्य 'तदो: स: सावन्त्ययो:' इति 'स'कारे 'स्य:' इति रूपम् । त्यद् शब्दस्य गौणत्वे (नामवाचक:) तदा सर्वनामकार्य्यं न भवति । त्यद् त्यदौ त्यद: । अतित्यद् अतित्यदौ अतित्यद: ।

**IV. यद् शब्द:**

'त्यदादीनाम:' इति मुख्यं सूत्रम् । तद्शब्दवद्रूपम् ।
पुं. य: यौ यै ।
स्त्री. या ये या: ।
क्ली. यत् ये यानि ।

## V. किम्

'कै शब्दे' इत्यत: 'कायतेर्डिमि:' इति ड़िमि प्रत्यय: (कै + ड़िमि उणादि) इच्छाविषय:, ज्ञानविषय:, जिज्ञासाविषय: इत्यर्थक: । केवलं किम: स्थाने 'किम: क:' इति सूत्रेण 'क' इत्यादेश: । त्रिषु लिङ्गेषु सर्वासु विभक्तिषु च 'तद्' इति शब्दवद्रूपं प्रचलति ।

| | | | |
|---|---|---|---|
| पुं. | क: | कौ | के । |
| स्त्री. | का | के | का: । |
| क्ली. | किम् | के | कानि । |

**स्वावलोकनप्रश्नाः**

१. 'स' इति सिद्धये सकारविधायकं सूत्रं किम् ?

२. तद् शब्दस्य क: अर्थ: ?

३. 'ते' इति सिद्धये जस्स्थाने क: आदेश: ?

४. कस्मिन् वचने 'ते' इति निष्पद्यते ?

५. तद् शब्दस्य पुँल्लिङ्गे भ्यस्विभक्तौ किं रूपम् ?

६. 'ते' इति सिद्धये औड् स्थाने क: आदेश: ?

७. तद्-शब्दस्य स्त्रीलिङ्गे ङे विभक्तौ किं रूपम् ?

८. एतद्-शब्दस्य पुँल्लिङ्गे सुविभक्तौ किं रूपम् ?

९. किम् स्थाने विभक्तौ 'क' इत्यादेश: केन सूत्रेण विधीयते ?

१०. नान्तोपधाया: दीर्घ: केन सूत्रेण विधीयते ?

## ११.८. सारांश:

प्रियपाठका: अस्मिन् खण्डे हलन्तसर्वनामशब्दा: त्यद्, तद्, यद्, एतद्, इदम्, अदस्, किम् इत्येते कथं रूपसाधने प्रयोगविज्ञाने क्षेमा: भवन्ति तत् पर्य्यालोचितम् । बुद्धिस्थपरामर्शकत्वेन तेषां सर्वनामत्वम् । अत: त्रिलिङ्गे तेषां व्यवहार: । सर्वनामसंज्ञाया: फलविचारपुरस्सरं इदम्शब्दस्य अद्शब्दस्य तथा त्यद्-तद्-यद्-किम् शब्दानाञ्च प्रकृतिभागे आदेश: विभक्त्युद्देश्यकं कार्य्यञ्च प्रदर्शितम् । प्रत्येकं शब्दस्य कृते प्रयोगस्य कृते च उद्दिष्टानि प्राकरणिकसूत्राणि उत्थापितानि । तेषां सूत्राणां यथाग्रन्थं अर्थागमनं विहितम् । पुनश्च तेषां शब्दानां रूपसिद्धये यानि आनुसङ्गिकसूत्राणि प्रयुज्यानि भवन्ति तेषां संक्षिप्ततया कार्य्यं प्रतिनिर्द्दिष्टम् । शब्देषु एतेषु इदम्-शब्दस्य, अदस्-शब्दस्य, तद्-शब्दस्य, त्यद्-शब्दस्य, एतद्-शब्दस्य, यद-शब्दस्य, किम्-शब्दस्य च पृथक्तया रूपसाधनप्रकार: उपपादित: ।

## ११.९. आदर्शप्रश्ना:

I. **निबन्धात्मका: प्रश्ना: (प्रत्येकं २०/१५ अङ्का:)**

१. सर्वनामशब्दानामाशयं प्रकटीकृत्य हलन्तसर्वनाशब्दानां स्वरूपं विवृणत ?

२. सर्वनामसंज्ञोद्देश्यकं कार्य्यमुदाहरणमुखेन स्पष्टीकुरुत ?

३. इदम्-शब्दस्य त्रिलिङ्गे सर्वासु विभक्तिषु रूपं लिखत ?

४. अदस्-शब्दस्य त्रिलिङ्गे सर्वासु विभक्तिषु रूपं लिखत ?

५. तद्-शब्दस्य त्रिलिङ्गे सर्वासु विभक्तिषु रूपं लिखत ?

II. **विश्लेषणात्मकप्रश्ना: (प्रत्येकं १० अङ्का:)**

१. हलन्तसर्वनामशब्दानां रूपसाधने कानि प्रकरणस्थानि पाणिनीयसूत्राणि ?

२. इदम्-शब्दरूपसाधने कानि प्रकरणस्थानि पाणिनीयसूत्राणि ?

३. पुँल्लिङ्गतद्शब्दरूपसाधने कानि सूत्राणि प्रयोजनीयानि सन्ति प्रतिपादयत ?

४. 'त्यदानीनाम:', 'तदो: स: सावनन्त्ययो:' इति सूत्रद्वयस्य व्याख्यानं कर्त्तव्यम् ?

५. 'अदसोऽसेर्दादुदोम:' 'एत ठ्रद् बहुवचने' इति सूत्रद्वयस्य व्याख्यानं कर्त्तव्यम् ?

६. एतद्-शब्दस्य पुँल्लिङ्गे सप्तसु विभक्तिषु रूपाणि लिखत ?

III. **लघुप्रश्ना: (प्रत्येकं ५ अङ्का:)**

१. के सर्वादिगणीयशब्दा: लिखत ?

२. सर्वनामसंज्ञाया: फलं किम् ?

३. 'किम: क:' इति सूत्रस्य व्याख्यानं कुरुत ?

४. 'अनाप्यक:' इति सूत्रस्य व्याख्यानं कुरुत ?

५. 'नेदमदसोरको:' इति सूत्रस्य व्याख्यानं विधेयम् ?

६. 'इदोऽयम्' इति सूत्रस्य व्याख्यानं कार्य्यम् ?

७. अनेन इति पदस्य रूपसाधनं ससूत्रं कार्य्यम् ?

८. आभ्याम् इति निष्पत्तिप्रकारं ससूत्रं प्रतिपादयत ?

९. 'अस्याः' इति रूपसाधनं ससूत्रं विधेयम् ?

१०. 'असौ' इति कथं निष्पद्यते ससूत्रं विवेचयत ?

११. 'अनुस्याम्' इति साधनप्रकारं ससूत्रं विवृणत ?

१२. 'एनाम्' इति सिद्धिप्रकारं ससूत्रं निर्दिशत ?

## IV. **एकाङ्कप्रश्नाः (प्रत्येकं १ अङ्कः)**

१. सर्वनामसंज्ञकाः शब्दाः कति ?

२. सर्वनामशब्दः कस्य परामर्शकः ?

३. कस्मिन् विभक्तिद्वये सर्वनामशब्दानामेकरूपता दृश्यते ?

४. केन कारणेन त्यदादिशब्दानां सर्वनामत्वम् ?

५. 'स्मै' इत्यादेशः कस्याः विभक्तेः स्थाने जायते ?

६. ङि विभक्तौ सर्वनाम्नः आदेशः कः ?

७. जस्स्थाने श्यादेशविधायकं सूत्रं किम् ?

८. 'त्यदादीनामः' इति सूत्रेण विधीयमानः आदेशः केषां शब्दानां कृते उद्दिष्टः ?

९. इदमः कस्यां विभक्तौ परतः मकारोऽन्तादेशो भवति ?

१०. 'अनाप्यकः' इति सूत्रे 'आपि'-पदेन कस्य ग्रहणम् ?

११. 'एत ईद्बहुवचने' इति सूत्रोक्तबहुवचनशब्दस्य कः आशयः ?

१२. 'दश्च' इति सूत्रेण किं विधीयते ?

१३. 'त्यदादीनामः' इति सूत्रस्यापवादभूतं सूत्रं किम् ?

१४. त्यदादेः सम्बोधनं कथं नास्ति ?

१५. इद्रूपस्य अनादेशः कुत्र विभक्तौ विधीयते ?

१६. 'असौ' इत्यत्र सुलोपविधायकं सूत्रं किम् ?

१७. 'अदः' इति कस्यां विभक्तौ रूपम् ?

१८. अदस्शब्दस्य त्रिलिङ्गेषु कस्यां विभक्तौ समानरूपम् ?

१९. कस्मिन् वचने 'ते' इति रूपं निष्पद्यते ?

२०. नान्तोपधायाः दीर्घः केन सूत्रेण विधीयते ?

## ११.९. एकाङ्कप्रश्नानामुत्तराणि

१. ३५ २. प्रधानस्य ३. नपुंसकलिङ्गस्य प्रथमाद्वितीयाविभक्तौ ४. सर्वादिगणे पठितत्वात् ५. ङे ६. स्मिन् ७. जस: ८. त्यदादिशब्दानाम् ९. सौ १०. टा ११. बहूनामर्थानां वचनम् १२. मकारादेश: १३. इदमो म: १४. प्रयोगादर्शनात् १५. टाविभक्तौ १६. अदस् औ सुलोपश्च १७. नपुंसकलिङ्गस्य सु-अम्विभक्तौ १८. सर्वासां विभक्तीनां द्विवचने १९. औ, औट्, जस् २०. सर्वनामस्थाने चासम्बुद्धौ ।

********

# ।। द्वादशखण्डः।।

## हलन्तसंख्यावाचकशब्दानां रूपसाधनप्रकार: (ससूत्रम्)

### १२.१. प्रस्तावना

शब्दानुशासनप्रक्रियायां द्विविधा संख्या व्यवह्रियते । एका कृत्रिमा संख्या अपरा तु अकृत्रिमा संख्या । बहुगणशब्दौ वतुड़तिप्रत्ययान्तौ शब्दौ (बहु, गण, तावत्, कति) संख्यासंज्ञका: भवन्ति । एते शब्दा: कृत्रिमसंख्यासंज्ञका: भवन्ति । एक:-द्वि-त्रि-शतप्रभृतय: अकृत्रिमसंख्यसंज्ञका: भवन्ति । 'कृत्रिमाकृत्रिमयो: कृत्रिमे कार्य्यसम्प्रत्यय:' इति नियमानुसारं कृत्रिमसंज्ञां पुरस्कृत्य यद्यपि कार्य्यसाधनं तथापि लक्ष्यानुरोधात् व्यवस्था इति विचारानुसारं कदाचित् कृत्रिमया संज्ञया कार्य्यं कुत्र पुन: अकृत्रिमया संज्ञया कार्य्यम् । अकृत्रिमसंख्यावाचकशब्देषु अन्तिमवर्णोपस्थितिमादाय विभाजनद्वयम् । अजन्तसंख्यावाचकशब्दा:, हलन्तसंख्यावाचकशब्दाश्चेति । लिङ्गत्रयस्यानुसन्धानेन हलन्तपुँल्लिङ्गम्, हलन्तस्त्रीलिङ्गम्, हलन्तनपुंसकलिङ्गमिति विभाजनमागच्छति । शब्दाधिकारेऽस्मिन् हलन्तप्रकरणे हलन्तसंख्यावाचकशब्दानां चतुर्-पञ्चन्-षष्-सप्तन्-अष्टन्शब्दानां रूपसाधनं निर्दिष्टसूत्रविवेचनपुरस्सरं कृतं विद्यते ।

### १२.२. उद्देश्यम्

प्रियपाठका: ! अस्मिन् खण्डे भवन्त: अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

. के संख्यावाचका: शब्दा: ? तदधिगमिष्यन्ति ।
. संख्यावाचकशब्देषु हलन्तसंख्यावाचकशब्दान् ज्ञास्यन्ति ।
. हलन्तप्रकरणे पर्य्यालोचितान् संख्यावाचकशब्दान् अवगमिष्यन्ति ।
. हलन्तसंख्यावाचकशब्दानां सप्तविभक्तिषु साधुत्वविचारे उद्दिष्टानि पाणिनीय-सूत्राणि ज्ञेयानि भविष्यन्ति ।
. सूत्रोपात्तपारिभाषिकशब्दज्ञानपुरस्सरं सूत्राणामर्थावगमनं करिष्यन्ति ।
. 'चतुर्'शब्दस्य रूपसाधनविधिं ससूत्रं ज्ञास्यन्ति ।
. पञ्चन्-शब्दस्य रूपसाधनविधिं ससूत्रमवगमिष्यन्ति ।
. 'षष्'-शब्दस्य रूपसाधनविधिं ससूत्रमवगमिष्यन्ति ।
. 'सप्तन्'शब्दस्य रूपसाधनविधिं ससूत्रमवगमिष्यन्ति ।
. अष्टन्-शब्दस्य रूपसाधनविधिं ससूत्रं साधयिष्यन्ति ।

## १२.३. संख्यावाचकाः शब्दाः

प्रयोगानुशासनविधौ स्वरूपं संघटनप्रकारमादाय संज्ञा द्विविधा उपकल्पिता विद्यते । एका कृत्रिमा संज्ञा अपराऽकृत्रिमा संज्ञा । लक्षणप्रतिपादनपुरस्सरं वचनविधानपूर्वकं प्राग्वैयाकरण–वचनाधारपूर्वकं वा विज्ञेया संज्ञा कृत्रिमा संज्ञेति प्रतिपद्यते । व्यवरविधौ स्वतः प्रसिद्धिं या गता विद्यते साऽकृत्रिमा संज्ञेति प्रतिपत्तिः । तेनैव प्रकारेण विवेचनेन व्याख्यानेन च संख्यायाः कृते मार्गद्वयेन समाकलनमागम्यते । एका कृत्रिमा संख्या, यस्याः कृते 'बहुगणवतुडति संख्या' इति सूत्रमपेक्षितं वर्त्तते । 'बहु'शब्दः, 'गण'शब्दः, वतुप्रत्यान्तशब्दः (तावत्) 'इति'प्रत्ययान्तशब्दः (कति) संख्यासंज्ञकाः भवन्ति । अपरा भवति अकृत्रिमासंख्यासंज्ञकाः एक, द्वि, त्रि, चतुर्, पञ्चन्, सप्तन्, अष्टन्, नवन्, दशन्, एकादशन्, विंशति, त्रिंशत्, षष्टि, सप्तति, अशीति, नवति, शत, सहस्र ........ इत्यादयः शब्दाः । 'न'कारान्तशब्दाः पञ्चन्शब्दवद्रूपं लभन्ते । त्रिषु लिङ्गेषु तेषां शब्दानामेकरूपता । ऊनविंशतितः संख्यावचकशब्दानां नित्यस्त्रीलिङ्गता एकवचनान्तता । 'विंशत्याद्याः सदैकत्वे' इति नियमात् । प्रक्रियात्मककार्य्यसाधने 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्य्यसम्प्रत्ययः' इति नियमात् कृत्रिमायाः संज्ञायाः ग्रहणं जायते । किन्तु नियमोऽयं न सार्वत्रिकः, लक्ष्यानुरोधात् कुत्रचित् कृत्रिमया संज्ञया कार्य्यम्, कुत्रचिदकृत्रिमया संज्ञया कार्य्यम् । उभयगतिरिह भवति इति नियमनम् । उभयां संख्यायत इति संख्या इति तात्पर्य्येणावबोधनं स्वीकरणीयम् ।

**स्वावलोकनप्रश्नाः**

१. संज्ञा कतिविधा ? के च ते ?

२. कृत्रिमा संख्या कः ?

३. संख्यासंज्ञाविधायकं सूत्रं किम् ?

४. एक, द्वि, त्रि इति किम्भूता संख्या ?

५. 'विंशति' इति कस्मिन् लिङ्गे कस्मिन् वचने च व्यवह्रियते ?

६. प्रक्रियात्मककार्य्यसम्प्रत्ययः किम्भूतायां संज्ञायां जायते ?

७. संख्याशब्दस्य का व्युत्पत्तिः ?

## १२.४. हलन्तशसंख्यावाचका: शब्दा:

अकृत्रिमसंख्यावाचकशब्दानां विभाजनद्वयमागच्छति । अकारान्त-इकारान्तादिभावेन स्वरान्तसंख्यावाचकशब्दा: अजन्तसंख्यावाचकशब्दा: वा । तकारान्त-नकारान्तादिभावेन हलन्त-संख्यावाचकशब्दा: । येषां संख्यावाचकशब्दानां अन्त्ये हल्वर्णा: विद्यन्ते ते हलन्तसंख्यावाचकशब्दा इति । अवधातुं शक्यते यत् 'चतुर्' इति संख्यावाचकशब्दादारभ्य इमे शब्दा: 'र'-'त'-'न'-'ष'-कारान्तभावेन विदिता: । शब्दाधिकारे हलन्तप्रकरणे ते शब्दा: बोधनीया:

| | |
|---|---|
| 'र'कारान्तसंख्यावाचकशब्द: | चतुर् |
| 'न'कारान्तसंख्यावाचकशब्द: | पञ्चन्, सप्तन्, अष्टन् |
| 'ष'कारान्तसंख्यावाचशब्द: | षष् । |

एषु चतुर्-शब्दस्य पुँल्लिङ्गे स्त्रीलिङ्गे क्लीवलिङ्गे च भिन्नतया रूपं वर्त्तते । अन्येषां पञ्चन्-सप्तन्-अष्टन्-षष्-शब्दानां त्रिषु लिङ्गेषु एकरूपता विद्यते । सप्तसु विभक्तिषु पुँल्लिङ्गे यद्रूपं क्लीवलिङ्गे च तदेव रूपम् । एतेषां सर्वेषां शब्दानां बहुवचनं प्रयोगार्हता । अत: रूपसञ्चरणे रूपसाधने वा केवलं जस-शस-भिस्-भ्यस्-आम्-सुप-विभक्तय: बहुवचनरूपसाधनक्षमा: उत्पद्यन्ते ।

**स्वावलोकनप्रश्ना:**

१. संख्यावाचकशब्दानां किं विभाजनद्वयम् ?

२. हलन्तसंख्यावाचकशब्दा: इत्यनेन किं बुध्यते ?

३. हलन्तसंख्यावाचकशब्दा: किम्भूतेन वर्णेन विदिता: भवन्ति ?

४. शब्दाधिकारे हलन्तप्रकरणे के शब्दा: बोधनीया: सन्ति ?

५. केषां हलन्तसंख्यावाचकशब्दानां त्रिषु लिङ्गेषु एकरूपता वर्त्तते ?

६. शब्दाधिकारे हलन्तप्रकरणेऽनुशिष्टानां शब्दानां कस्मिन् वचने प्रयोगार्हता ?

## १२.५. चतुरादीनां हलन्तप्रकृतिकशब्दानां रूपसाधने उद्दिष्टानि पाणिनीयानि सूत्राणि

चतुर्, पञ्चन्, षष्, सप्तन्, अष्टन् इति संख्यावाचका: हलन्तप्रकृतिका: शब्दा:

प्रकरणेऽस्मिन् अनुशिष्टाः भवन्ति । तेषां सप्तसु बहुवचनात्मिकासु विभक्तिषु रूपसाधने सूत्राणीमानि प्रतिनिर्द्दिष्टानि भवन्ति

१. चतुरनडुहोरामुदात्तः (पा.सू. ७/१/९८)
२. षट्चतुर्भ्यश्च (पा.सू. ७/१/५५)
३. शरोऽचि (पा.सू. ८/४/४९)
४. षड्भ्यो लुक् (पा.सू. ७/१/२२)
५. ष्णान्ता षट् (पा.सू. १/१/२४)
६. नोपधायाः (पा.सू. ३/४/७)
७. अष्टन् आ विभक्तौ (पा.सू. ७/२/८४)
८. अष्टाभ्य औश् (पा.सू. ७/१/१२१)

इमानि सन्ति प्राकरणिकसूत्राणि । एतद्विहाय रूपसाधनविधौ यण्-वृद्ध्यादिकार्य्यसाधनाय आनुसङ्गिक-सूत्राणि प्रयोगार्थमुपस्थापनीयानि जायन्ते ।

**स्वावलोकनप्रश्नाः**

१. शब्दाधिकारे हलन्तप्रकरणे चतुरादीनां रूपसाधनाय कानि सूत्राणि सन्ति ?

२. 'चतुर्' इति शब्दोच्चारणपुरस्सरं रूपसाधनाय कति सूत्राणि सन्ति ?

३. अष्टन्-शब्दस्य रूपसिद्धये मुख्यसूत्रद्वयं किम् ?

## ११.६. चतुरादीनां शब्दानां रूपसाधनोद्दिष्टसूत्रोपात्तपारिभाषिकशब्दाः

चतुरादीनां संख्यावाचकहलन्तप्रकृतिकशब्दानां सप्तसु विभक्तिषु रूपसाधनोद्देश्येन अष्टौ सूत्राणि हलन्तप्रकरणे निर्द्दिष्टानि सन्ति । तत्र सूत्रसंघटने प्रयोजनानुसारं पारिभाषिकशब्दाः ग्रहणीयाः भवन्ति । तद्यथा उदात्तः, षट्, उपधा, विभक्ति, शर्, अच् ।

१. उदात्तः प्रकृते चतुरनडुहोरामुदात्तः (पा.सू. ७/१/९८) इति सूत्रे 'उदात्तः' इति पारिभाषिक-शब्दः उपात्तो विद्यते । 'उच्चैरुदात्तः' (पा.सू. १/२/२९) इति सूत्रेण उदात्तसंज्ञा विधीयते । ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् । स्वर-वर्णानामच्वर्णानां वा प्रतिपादितेषु ह्रस्वादिभेदेषु अयमेको भेदः ।

२. षट् 'षट् चतुर्भ्यश्च' (पा.सू. ७/१/५५), षड्भ्यो लुक् (पा.सू. ७/१/२२) इति सूत्रयो-रुपात्तोऽयं पारिभाषिकशब्दः । ष्णान्ता षट् (पा.सू.१/१/२४) इति सूत्रेण षट्संज्ञा विधीयते ।

'ष'कारान्ता 'न'कारान्ता च संख्या षट्संज्ञका भवति । यथा षष्, पञ्चन् इति ।

३. उपधा नोपधाया: (पा.सू. ३/४/७) इति सूत्रे स्थापितोऽयं पारिभाषिकशब्द: । 'अलोऽन्त्यात् पूर्व उपधा' (पा.सू. १/१/६५) इति सूत्रेण उपधासंज्ञा विधीयते । अन्त्याद् अल: पूर्वो वर्ण उपधासंज्ञ: स्यात् । यथा अष्टन् इत्यत्र न् कारात् पूर्ववर्ण: अ कार: उपधासंज्ञको भवति ।

४. विभक्ति 'अष्टन आ विभक्तौ' (पा.सू. ७/२/८४) इति सूत्रे सप्तम्यन्तेन प्रयोगो विहित: । सुपां तिङाञ्च एषा संज्ञा 'विभक्तिश्च' इति सूत्रेण प्रतिपन्ना । प्रकृते सुवन्तपदस्य प्रसङ्ग-दर्शनात् सुपां कृते एष: पारिभाषिक: शब्द: प्रतिनिर्दिष्ट: ।

५. शर् 'शरोऽचि' (पा.सू. ८/४/४९) इति सूत्रे शर् इति व्यवहृत: । 'आदिरन्त्येन सहेता' (पा.सू. १/१/७१) इति सूत्रेण संघटित: प्रारूपितश्च एष: प्रत्याहार: । श, ष, स इत्यतेषां बोध: ।

६. अच् अच् इति प्रत्याहार: । 'शरोऽचि' (पा.सू. ८/४/४९) इति सूत्रेण व्यवहृत: । 'आदि-रन्त्येन सहेता' इति सूत्रेण संघटितोऽवबुद्धश्च । अइउण् इत्यत आरभ्य ऐ औच् इति सूत्रं यावत् पठिता: वर्णा: अ, इ, उ, ऋ, लृ, ए, ऐ, ओ, औ इति भावेनावबोधनीया: ।

**स्वावलोकनप्रश्ना:**

१. उपधा इति किम् ?

२. 'षट्' संज्ञा का ?

३. सुपां तिङाञ्च का संज्ञा ?

४. 'शर्' इति किम् ? तत्र के वर्णा: गृहीता: ?

## १२.७. चतुदादिहलन्तप्रकृतिकशब्दरूपसाधनोद्दिष्टानां सूत्राणामर्थावगमनम्

### १. चतुरनडुहोरामुदात्त: (पा.सू. ७/१/९८)

चतुरनुडुहो:, आम्, उदात्त: इति पदविभाग: । चतुश्च अनडवांश्च चतुरनडुहो तयो: । अनु. सर्वनामस्थाने, अङ्गस्य । अर्थ: चतुर् अनडुह् इत्येतयो: सर्वनामस्थाने परत आम् आगमो भवति, स चोदात्त: । 'आम्' इति मित्वात् 'मिदचोऽन्त्यात् पर:' (पा.सू. १/१/४७) इति नियमानुसारम् अन्त्यात् अच: परं भवति । पुनश्च 'आगमा

अनुदात्ता भवन्ति (परि.११०) इति परिभाषया स आमागमः स्वतः अनुदात्तो भवति । अतः तस्योदात्तत्वं विधीयते । उदा. अनडवान्, चत्वारः ।

**२. षट् चतुर्भ्यश्च (पा.सू. ७/१/५५)**

'षट् चतुर्भ्यः', च इति पदविभागः । षट् च चत्वारश्च षट्चत्वारः तेभ्यः । अनु. नुट्, आमि, अङ्गस्य । षट्संज्ञकेभ्यश्चतुःशब्दाच्चोत्तरस्यामो नुट् भवति इति सूत्रार्थः । नुडागमस्य टित्वात् 'आद्यन्तौ टकितौ' इति नियमेन आमः आदौ भवति । 'ष्णान्ता षट्'

(पा.सू. १/१/२३) इति सूत्रेण ष् कारान्तस्य न कारान्तस्य च संख्यावाचकशब्दस्य षट्संज्ञा अवबोधिता जायते । उदा. षष् = षण्णाम्, पञ्चन् = पञ्चानाम्, नवन् = नवानाम्, दशन् = दशानाम्, चतुर् = चतुर्णाम् ।

**३. शरोऽचि (पा.सू. ८/४/४९)**

शरः = षष्ठ्यन्तं पदम्, अपि = सप्तम्येकवचनान्तं पदम् । अनु. न, द्वे, संहितायाम्। अचि परतः शरो द्वे न भवतः । 'अचो रहाभ्यां द्वे' (पा.सू. ८/४/४५) इति सूत्रेण द्वित्वं

'यर्' इत्यस्य प्राप्नोति । अनेन तन्निषिघ्यते । श,ष,स, इति वर्णानामच्पररहितानां द्वित्वं न भवति इत्याशयः । उदा. चतुर्षु, आदर्शः, आकर्षः ।

**४. षड्भ्यो लुक् (पा.सू. ७/१/२२)**

'षड्भ्यः' इति पञ्चमीबहुवचनान्तं पदम्, 'लुक्' इति प्रथमान्तं पदम् । अनु. जश्शसोः, अङ्गस्य । अर्थः षट्संज्ञकेभ्यः उत्तरयोः जश्शसोः लुग् भवति । 'ष'कारान्तस्य 'न'कारान्तस्य च संख्यावाचकशब्दस्य 'ष्णान्ता षट्' इत्यनेन षट् संज्ञा बोधनीया । उदा. पञ्च, सप्त, दश ..... शतन् = शतानि, सहस्रन् = सहस्राणि इत्यत्र सन्निपातपरिभाषया न लुक् ।

**५. ष्णान्ता षट् (पा.सू. १/१/२४)**

परश्च नश्च = ष्णौ । ष्टुत्वेन नस्य णः । ष्णौ अन्तौ यस्या सा ष्णान्ता प्रकृते स्त्रीविशिष्टान्यपदार्थबोधकबहुब्रीहेर्विशेष्यसाकाङ्क्षतया संख्या विशेषयितुं स्त्रीलिङ्ग-निर्देशः । 'बहुगण' इत्यतः 'संख्या' इत्यनुवर्त्तते । अतः ष्णान्ता नान्ता च संख्या षट्संज्ञा स्यात् इत्यर्थः ।

**६. नोपधायाः (पा.सू. ६/४/७)**

'न' इत्यविभक्त्यन्तं पदम् । उपधायाः इति षष्ठ्यन्तं पदम् । 'अङ्गस्य' इत्यधिकारः । विशेषणतया तदन्तग्राहकम् । 'ढ्रलोपे' इत्यतः दीर्घ इत्यनुवर्त्तते । 'नामि' इति सम्पूर्णं सूत्रमनुवर्त्तते । अतः नान्तस्य अङ्गस्योपधायाः नामि परतो दीर्घो भवति । पञ्चानाम् ।

**७. अषटन् आविभक्तौ (पा.सू. ७/२/८४)**

'अष्टन:' इति षष्ठ्येकवचनान्तं पदम् । स्वरूपपरकत्वेन एकवचनस्यैव साधुत्वम् । आ: इति प्रथमाविभक्त्यन्तं पदम् । 'विभक्तौ' इति सप्तम्येकवचनान्तं पदम् । अङ्गस्य इत्यधिक्रियते । अष्टनो विभक्तौ परत आकारादेशो भवति । अलोऽन्त्यस्य (पा.सू. १/१/५१) इति नियमेन अन्त्यस्याल: 'न'कारस्य स्थाने आकारादेशो भवतीति तात्पर्यम् । उदा. अष्टाभि:, अष्टाभ्य:, अष्टानाम् इति ।

**८. अष्टाभ्य औश् (पा.सू. ७/१/१२१)**

'अष्टाभ्य:' इति पञ्चम्यन्तं पदम्, औश् इति प्रथमान्तं पदम् । अनु. जश्शसो:, अङ्गस्य । कृताकाराद् अष्टन् शब्दाद् उत्तरयो: जश्शसो: स्थाने 'औश्' इत्ययमादेशो भवति । 'अष्टाभ्य:' इत्यत्र कृतात्वस्येद्मनुकरणं न तु लक्षणवशात् सम्पन्नम् । अन्यथा लाघवात् 'अष्टभ्य औश्' इति निर्देश: स्यात् । औश् इति शित्करणम् 'अनेकाल् शित्' इति सर्वादेशार्थम् । औश् इत्यत्रानेकालत्वव्यवस्था नैवाङ्गीकार्य्या । 'नानुबन्धकृत-मनेकाल्त्व'मिति विचारात् । उदा. अष्टन् + जस्/शस् = अष्टौ ।

**स्वावलोकनप्रश्नाः**

१. 'चतुरनडुहो:' इति सूत्रेण आमागमो भवति कुत्र ?

२. 'चतुरनडुहो:' इति सूत्रेण किमर्थमुदात्तो विधीयते ?

३. 'षट्चतुभ्यश्च' इति सूत्रेण किं विधीयते ?

४. चतुर्षु इत्यत्र 'ष'कारस्य द्वित्वं कथं न जायते ?

५. पञ्च इति सिद्धये जश्शसो: केन सूत्रेण लुग् भवति ?

६. कस्य षट्संज्ञा विधीयते ?

७. 'नोपधाया:' इति सूत्रेण किं भवति ?

८. 'अष्टन आ विभक्तौ' इत्यत्र अष्टन इति किं विभक्त्यन्तं पदम् ?

| |
|---|
| ९. 'औश' इत्यत्र शित्करणं किमर्थम् ? <br><br> १०. 'औश्' इत्यत्रानेकाल्व्यवस्था कथं नोपपन्ना ? |

## १२.८. लक्ष्यसिद्धिः (ससूत्रं चतुरादीनां शब्दानां रूपसाधनप्रकारः)

हलन्तप्रकृतिकाः संख्यावाचकशब्दाः चतुर्, पञ्चन्, षष्, सप्तन्, अष्टन् इत्येते शब्दाः प्रोक्ताः सन्ति प्रकृतप्रकरणे, येषां रूपसाधनं सप्तसु विभक्तिषु विचार्य्यते । ते सर्वे नित्यबहुवचनान्तशब्दाः । अतः केवलं जस्-शसादिषु विभक्तिषु रूपसञ्चरणमाकल्यते । पुनश्च 'चतुर्' इति शब्दं विहाय पञ्चन् प्रभृतीनां शब्दानां त्रिषु लिङ्गेषु एकरूपता दृश्यते ।

**१. चतुर् (पुँल्लिङ्गम्)** चतेरुरन् इत्युणादिषु चतुर्शब्दो व्यत्पादितः । नित्यबहुवचनान्तः ।

चत्वारः
- चतुर् + जस्
- चतु + आम् + र् + जस् चतुरनडुहोरामुदात्तः
- चतु + आ + र् + अस्
- चत् + व् + आ + र् + अस् इको यणचि
- चत्वारस्
- चत्वारः ।

चतुर्शब्दाज्जस्विभक्तौ चतुर् + जस् इति स्थिते 'चतुरनडुहोः' इति 'उ'काराद् 'मिदचोऽन्त्यात् परः' इति नियमेन आमागमः चतु + आम् + जस् इति स्थिते अनुबन्धकार्य्ये 'इको यणचि' इति सूत्रेण यण्कार्य्ये जसः सकारस्य रुत्वे विसर्गे च 'चत्वारः' इति रूपम् ।

चतुरः
- चतुर् + शस् इति स्थिते सर्वनामस्थानत्वभावात् 'चतुरनडुहोः' इति न आमागमः । शस् इत्यत्र अनुबन्धकार्य्ये 'स्'स्य रुत्वे विसर्गे च चतुरः इति ।

चतुभिः
- चतुर् + भिस् । केवलं 'स'कारस्य रुत्वे विसर्गे च रूपम् ।

चतुर्भ्यः
- चतुर् + भ्यस् । केवलं 'स'कारस्य रुत्वे विसर्गे च रूपम् ।

चतुर्णाम्
- चतुर् + आम्
- चतुर् + नुट् + आम् = षट्चतुर्भ्यश्च
- चतुर् + न् + आम्
- चतुर् + ण् + आम् रषाभ्यां नो णः समानपदे ।
- चतुर् + ण् + ण् + आम् अचो रहाभ्यां द्वे ।
- चतुर्णाम् ।

चतुर् + आम् इति स्थिते ह्रस्वाद्यन्तत्वाभावाद् नुय्यप्राप्ते 'षट्चतुभ्र्यश्च' इति सूत्रेण नुडागमे चतुर् + नुट् + आम् इति जाते अनुबन्धकार्य्ये चतुर् + न् + आम् इति स्थितौ 'रषाभ्याम्' इति सूत्रेण णत्वं ततश्च 'अचो रहाभ्याम्' इति द्वित्वे चतुर्ण्णाम् इति । णत्वोत्तरमेव द्वित्वमिति शास्त्रीयसिद्धान्तः ।

चतुर्षु — चतुर् + सुप्
चतुर् + सु
चतुर् + षु
चतुर्षु ।

चतुर् + सुप् इति स्थिते अनुबन्धादिकार्य्ये 'चतुर् + सु' इति दशायां 'खरवसानयोः विसर्जनीयः' इति विसर्जनीये प्राप्ते 'रोः सुपि' इत्यनेन तस्य नियमने 'अचो रहाभ्याम्' इति 'ष'कारस्य द्वित्वे प्राप्ते 'शरोऽचि' इति सूत्रेण तस्य निषेधे चतुर्षु इति रूपम् ।

चतुर् शब्दस्य स्त्रीलिङ्गे 'त्रिचतुरो स्त्रियां तिसृचतसृ' इति चतुर्स्थाने चतसृादेशे (चतसृ) अजन्तस्त्रीलिङ्गप्रकरणानुसारं तस्य रूपसञ्चरणम् ।

**चतुर् क्लीवलिङ्गे**

चत्वारि — चतुर् + जस्
चतुर् + शि = जश्शसोः शि
चतु + आम् + र् + शि = चतुरनडुहोरामुदात्तः
चतु + आ + र् + इ
चत् + व् + आ + र् + इ = इको यणचि
चत्वारि ।

चत्वारि — चतुर् + शस्
चतुर् + शि = जश्शसोः शि
चतुर् + इ
चतु + आम् + र् + इ = चतुरनडुहोरामुदात्तः

('शि सर्वनामस्थानम्' इति सूत्रेण आदिश्यमानस्य 'श' इत्यस्य सर्वनामस्थान संज्ञा । अतः अमागमः)

**२. पञ्चन्–शब्दः** पु. / स्त्री. / क्ली. ।

पञ्च — पञ्चन् + जस् / शस्
पञ्चन् + ( ) = षड्भ्यो लुक्
पञ्च + ( )
पञ्च ।

पञ्चभि:, पञ्चभ्य:, पञ्चभ्य: केवलं भिस् / भ्यस् विभक्तियोगाद्रूपम् ।

पञ्चानाम् पञ्चन् + आम्

पञ्चन् + नुट् + आम् षट्चतुर्भ्यश्च

पञ्चन् + न् + आम्

पञ्च ( ) + न् + आम् = न लोप: प्रातिपदिकान्तस्य

पञ्चा + नाम् = नोपधाया:

पञ्चानाम् ।

पञ्चसु = पञ्चन् + सुप् ।

शतानि, सहस्राणि शतन्शब्दसहस्रन्शब्दयो: नान्तसंख्याशब्दत्वात् षट्संज्ञायां 'षड्भ्यो लुक्' इति

जश्शसोर्लुक् स्यात् । सन्निपातपरिभषया तद्वारणमिष्यते । सर्वनामस्थानं परत्वेन उपजीव्य प्रवृत्तस्य नुम: सन्निपातपरिभाषया सर्वनामस्थानभूतजश्शसो-र्लुकं प्रति निमित्ताभाव: ।

**३. षष् / षड् – शब्द:**

षट् / षड् 'षो अन्तकर्मणि' इत्यत: क्विपि विचि वा 'पृषोदरादीनि यथोपदिष्टम्' इत्यकारस्य लोपे षष् । नित्यबहुवचनान्तत्वात् जस् / शस् । 'ष्णान्ता षट्' इति षट्संज्ञायां 'षडभ्यो लुक्' इति जश्शसोर्लुकि जश्त्वचर्त्वयो: षट्/षड् इति ।

षड्भि: षष् + भिस् झलां जश् झशि इति जश्त्वे विभक्तिघटक 'स'कारस्य

षड्भ्य: षष् + भ्यस् रुत्वे विसर्गे च रूपम् ।

षण्णाम् षष् + आम् इति दशायां 'षट्चतुर्भ्यश्च' इति नुडागमे षष् + नुट् + आम् अनुबन्धकार्य्ये षष् + न् + आम् ष्टुत्वे 'प्रत्यये भाषायां नित्यम्' इति नित्यमनुनासिके कार्य्ये षण्णाम् इति ।

षट्त्सु/षट्सु षष् + सुप् इत्यत्र जश्त्वे चर्त्वे षट्सु इति एवञ्च 'ङसि धुट्' इति धुटि षट्त्सु इति ।

४. प्रियपञ्चान:, प्रियषष:, प्रियषषाम् इत्यत्र बहुब्रीहिसमासत्वात् गौणत्वमत: 'षोड्भ्यो लुक्' इति लुगादिकार्य्यं न भवति । 'गौणमुख्ययो: मुख्ये कार्य्यसम्प्रत्यय:'' इति नियमात् कार्य्यसाधनाय ग्रहणम् ।

**५. अष्टन् – शब्द:** नित्यबहुवचनान्त: ।

अष्टौ अष्टन + जस् / शस् इति स्थिते

अष्ट 'अष्टन: आ विभक्तौ' इति सूत्रेण 'न'कारस्य आत्वे अष्टा+जश्/

शस् ततश्च 'अष्टाभ्य: औशस' इति जश्शस्स्थाने औशादेशे अष्टा + औश् वृद्धौ 'अष्टौ' इति । शित्वत् सर्वादेश:,'आदे: परस्य'

इति तु नात्र प्रवर्त्तते, 'अनेकाल्शित्' इति परेण तस्य बाधात् । अयम् औशादेश: 'षड्भ्यो लुक्' इत्यस्यापवाद: । आत्वाभावपक्षे षट्संज्ञां पुरस्कृत्य 'षड्भ्यो लुक्'इत्यनेन जश्शसो: लुकि 'अष्ट'इति रूपम् ।

| | | |
|---|---|---|
| अष्टाभि: | अष्टन् + भिस् | 'अष्टन: आ विभक्तौ' इत्यात्वम्, सकारस्य रुत्वे विसर्गे । |
| अष्टाभ्य: | अष्टन् + भ्यस् | |
| अष्टानाम् | अष्टन् + आम् | आत्वम्, नुडागम: अष्टानाम् इति रूपम् । |
| अष्टासु | अष्टन् + सुप् | आत्वम्, सुप: पकारलोप: इति रूपम् । |

अष्ट, अष्टभि: अष्टभ्य:, अष्टनाम्, अष्टसु — प्रिया: अष्टौ यस्येति बहुव्रीहिसमासे गोणत्वात् आत्व औशादेश-कार्य्यं न भवति । 'गौणमुख्ययो: मुख्ये कार्य्यसम्प्रत्यय:' इति नियमात् । तस्य शब्दस्य राजन्शब्दवद्रूपम् ।

| | | | |
|---|---|---|---|
| प्रथमा | प्रियाष्टा | प्रियाष्आनौ | प्रियाष्टान: |
| द्वितीया | प्रियाष्टानम् | प्रियाष्टानौ | प्रियाष्ट्न: |

**रूपलिखनप्रकार:**

| विभक्ति | वचनम् | चतुर् | पञ्चन् | षष् | अष्टन् |
|---|---|---|---|---|---|
| १ मा | बहुवचनम् | चवार: | पञ्च | षट्/षड् | अष्टौ / अष्ट |
| २ या | ,, | चतुर: | पञ्च | षट्/षड् | अष्टौ / अष्ट |
| ३ या | बहुवचनम् | चतुर्भि: | पञ्चभि: | षड्भि: | अष्टाभि: / अष्टभि: |
| ४ र्थी | ,, | चतुर्भ्य: | पञ्चभ्य: | षड्भ्य: | अष्टाभ्य: / अष्टभ्य |
| ५ मी | ,, | चतुर्भ्य: | पञ्चभ्य: | षड्भ्य: | अष्टाभ्य: / अष्टम्य: |
| ६ ष्ठी | ,, | चतुर्णाम् | पञ्चानाम् | षण्णाम् | अष्टानाम् / अष्टानाम् |
| ७ मी | ,, | चतुर्षु | पञ्चसु | षट्सु, षट्त्सु | अष्टासु / अष्टसु |

क्लीवलिङ्गे चतुर्शब्दस्य 'चत्वारि' 'चत्वारि' चतुर्भि .... इति रूपम् ।

**स्वावलोकनप्रश्नाः**

१. चतुर् शब्दस्य पुँल्लिङ्गे शस्विभक्तौ किं रूपम् ?

२. 'चतुर्णाम्' इति प्रयोगसिद्धये द्वित्वणत्वकार्य्ययो: कस्य पूर्वं प्रवृत्ति: ?

३. 'चतुर'शब्दस्य सुप्-विभक्तौ किं रूपम् ?

४. चतुर् शब्दस्य क्लीवलिङ्गे शस्विभक्तौ किं रूपम् ?

५. 'पञ्चन्'शब्दस्य आम्विभक्तौ किं रूपम् ?

६. 'शतानि', 'सहस्राणि' इत्यस्य जश्शसोः लुक् कथं न ?

७. षट् / षड् इति रूपं कथं सिध्यति ?

८. 'अष्टन्'शब्दस्य जस्विभक्तौ किं रूपम् ?

९. प्रियाष्टन्-शब्दस्य अष्टन्शब्दवद्रूपं कथं न भवति ?

१०. प्रियपञ्चानः इत्यत्र 'षड्भ्यो लुक्' इति सूत्रं कथं न प्रवर्त्तते ?

## १२.९. सारांशः

प्रियपाठकाः ! अस्मिन् खण्डे हलन्तप्रकृतिकसंख्यावाचकशब्दानां चतुर्-पञ्चन्-षष्- अष्टन्-शब्दानां सप्तसु विभक्तिषु रूपसाधनं ससूत्रं प्रतिपादितम् । इमे ते शब्दाः नित्यबहुवचनान्ताः । पञ्चन्-षष्-अष्टन्-शब्दानां त्रिषु लिङ्गेषु एकरूपता । रूपसिद्धये मुख्यतया अष्टौ प्राकरणिकसूत्राणि वर्त्तन्ते । षट्संज्ञकशब्दानां नुडागमः, जशशसोः लुक्, चतुर्-शब्दस्य जस्विभक्तौ आमागमः, अष्टन्शब्दस्य सर्वत्र विभक्तौ नकारस्य स्थाने आकारादेशः विकल्पेन । 'अष्टनः दीर्घात्' इति सूत्रे अष्टनः इति निर्देशः तत्कृते ज्ञापकः । आत्वाभावपक्षे पञ्चन्शब्दवद्रूपम् । प्रियाष्टान् शब्दस्य गौणत्वात् आत्वादेशादिकार्य्यं न प्रवर्त्तते राजन्वद्रूपम् । एवं प्रियपञ्चानः, प्रियषाषाम् इत्यादिषु शब्देषु षट्संज्ञोद्देश्यकं कार्य्यं न भवति गौणत्वात् । 'गौणमुख्ययोः मुख्ये कार्य्यसम्प्रत्ययः' इति नियमात् । इत्थं विवेचनमत्र विहितम् ।

## १२.१०. आदर्शप्रश्नाः

I. **निबन्धात्मकप्रश्नाः**

१. संख्यावाचकशब्दानां परिचयं भेदञ्च प्रतिपाद्य हलन्तप्रकृतिकसंख्यावाचकशब्दान् उपस्थापयत?

२. चतुरादीनां शब्दानां रूपसाधनोद्दिष्टसूत्रोपात्तपारिभाषिकशब्दान्नुल्लिख्य तेषामाशयं लिखत ?

II. **विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)**

१. हलन्तप्रकृतिकसंख्यावाचकशब्दानां विवरणमुपस्थापयत ?

२. चतुरादीनां हलन्तप्रकृतिकशब्दानां रूपसाधने उद्दिष्टानि पाणिनीयसूत्राणि प्रतिपादयत ?

३. 'चतुरनडुहोरामुदात्तः', 'नोपधायाः' इति सूत्रयोः व्याख्या कार्य्या ?

४. 'षट्चतुर्भ्यश्च', 'षड्भ्यो लुक्' इति सूत्रयोः व्याख्या कार्य्या ?

५. 'अष्टन आ विभक्तौ', 'अष्टाभ्यः औश्' इति सूत्रयोः व्याख्या कार्य्या ?

६. अष्टन् शब्दस्य उभयथारूपं सप्तसु विभक्तिषु लिखत ?

III. **लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१. का नाम संख्या ?

२. हलन्तप्रकृतिकसंख्यावाचकशब्दाः इत्यनेन किं बुध्यते ?

३. 'नोपधायाः' इति सूत्रस्य सूत्रस्य तात्पर्य्यं लिखत ?

४. 'षट्' इति पारिभाषिकशब्दं परिष्कुरुत ?

५. 'उपधा' इति पारिभाषिकशब्दं परिष्कुरुत ?

६. चतुर् शब्दस्य पुँल्लिङ्गे सप्तसु विभक्तिषु रूपाणि लिखत ?

७. षष् शब्दस्य सप्तसु विभक्तिषु रूपाणि लिखत ?

८. प्रियाष्टन् शब्दस्य रूपं कथं प्रवर्त्तते ?

IV. **एकाङ्कप्रश्नाः**

१. संख्यासंज्ञाविधायकं सूत्रं किम् ?

२. विंशति कस्मिन् लिङ्गे कस्मिन् वचने च व्यवह्रियते ?

३. संख्याशब्दस्य का व्युत्पत्तिः ?

४. केषां हलन्तसंख्यावाचकशब्दानां त्रिषु लिङ्गेषु एकरूपता वर्त्तते ?

५. उपधा इति किम् ?

६. षट् संज्ञा का ?

७. सुपां तिङाञ्च का संज्ञा ?

८. 'चतुरनडुहोः' इति सूत्रेण आमागमो भवति कुत्र ?

९. 'चतुरनडुहोः' इति सूत्रेण किमर्थमुदात्तो विधीयते ?

१०. 'षट्चतुर्भ्यश्च' इति सूत्रेण किं विधीयते ?

११. चतुर्षु इत्यत्र 'ष'कारस्य द्वित्वं कथं न भवति ?

१२. 'ओश्' इत्यत्र शित्करणं किमर्थम् ?

१३. 'औश्' इत्यत्रानेकालसव्यवस्था कथं नोपपन्ना ?

१४. चतुर् शब्दस्य क्लीवलिङ्गे शस्विभक्तौ किं रूपम् ?
१५. अष्टन् शब्दस्य जस्विभक्तौ किं रूपद्वयम् ?
१६. 'शतानि' 'सहस्राणि' इत्यत्र जश्शसोः लुक् कथं न भवति ?
१७. प्रियाष्टन्–शब्दस्य अष्टन् शब्दवद्रूपं कथं न भवति ?
१८. 'चतुर्ण्णामस' इति प्रयोगसिद्धये द्वित्वणत्वकार्य्ययोः कस्य पूर्वं प्रवृत्तिः ?
१९. चतुर् + सुप् इत्यत्र सिद्धं रूपं किम् ?
२०. पञ्चन् शब्दस्य आम्विभक्तौ किं रूपम् ?
२१. षष् + सुप् इत्यत्र सिद्धं रूपद्वयं किम् ?
२२. चतुर् इति कृत्रिमा अकृत्रिमा संख्या सञ्ज्ञा वा ?

## १.११. एकाङ्कप्रश्ननानामुत्तराणि

१. बहुगणवतुडति संख्या २. त्रिषु लिङ्गेषु एकवचने ३. संख्यायते इति ४. 'न'कारान्त ५. अलोऽन्त्यात् पूर्वम् ६. ष्णान्ता षट् ७. विभक्ति ८. अन्त्यात् अच् परः ९. आगमाः अनुदात्ताः १०. नुडागमः ११. 'शरोऽचि' इति निषेधात् १२. सर्वादेशार्थम् १३. नानुबन्धकृतमनेकाल्त्वम् १४. चत्वादि १५. अष्टौ/अष्ट १६. सन्निपातपरिभाषा १७. गौणत्वात् १८. णत्वस्य १९. चतुर्षु २०. पञ्चानाम् २१. षट्त्सु / षट् सु २२. अकृत्रिमा ।

*******